शब्दानुशासने उत्सर्गापवादशास्त्रविमर्शः

चक्रवर्त्ती शेषनाथ मिश्रः

Kw.

शब्दानुशासने

उत्सर्गापवादशास्त्रविमर्शः

चक्रवर्ती शेषनाथ मिश्रः

व्याकरणाचार्यः एम० ए०

किशोर विद्या निकेतन

भदैनी, वाराणसी

१९८५

प्रकाशक:

किशोर विद्या निकेतन
बी० २।२३६ ए० भदैनी
वाराणसी २२१००१

© लेखक:—
प्रथम संस्करण -१९८५

मूल्य ६०-००

मुद्रक—जगन्नाथ प्रिन्टर्स बी० ३१/४३ संकट मोचन
भोगाबीर, वाराणसी

श्रीगुरुवराणां
चक्रवर्त्तिरामाधीनचतुर्वेदिमहानुभावानां
करकमलयोः
सादरमेष विमर्शः
समर्प्यते

विषय-सूची

विषयः	पृष्ठ
प्रथमो विमर्शः	१
उत्सर्गापवादशास्त्रस्वरूपम्	,,
अपवादशास्त्रप्रवृत्तिप्रकारः	३
द्वितीयो विमर्शः	१०
एकः पूर्वपरयोरित्यधिकारस्थ गुणशास्त्रविवेचनम्	,,
तदपवादशास्त्राणि	१२
गुणापवादभूतानि वार्तिकानि	,,
अङ्गाधिकारस्थगुणविधायकोत्सर्गापवादशास्त्रविवेचनम्	,,
एतदपवादसूत्राणि	१९
वृद्धिशास्त्रोत्सर्गापवादविवेचनम्	२०
अङ्गाधिकारस्थवृद्धिशास्त्रसम्बन्ध्युत्सर्गापवादभावविमर्शः	२२
तृतीयो विमर्शः	२९
दीर्घशास्त्र परिशीलनम्	,,
अङ्गाधिकारस्थ दीर्घविधायकशास्त्राणि	३०
ह्रस्व विधि विवेचनम्	३७
ह्रस्व विधायक शास्त्राणि	३८
लोपशास्त्रविमर्शः	४०
प्रत्ययसम्बन्धिलोपशास्त्राणि	४७
आगमविधिविमर्शः	५४
चतुर्थो विमर्शः	६६
षत्वसम्बन्ध्युत्सर्गापवादशास्त्राणि	,,
आदेशसम्बन्धिषत्वविधि	६७
उपसर्गस्थनिमित्तादेशसम्बन्धिषत्वविधिः	६९
आदेशरूप सकारसम्बन्धिषत्वनिषेधरूपापवादसूत्राणां परिचयः	७०
प्रत्ययसम्बन्धिषत्वविधि बिमर्श	७१
षत्वसम्बन्ध्यपवादविरहित विशेषशास्त्राणां वर्गीकरणं तदुदाहरणानि च	७२
णत्वसम्बन्ध्युत्सर्गापवादशास्त्र विवेचनम्	७४
प्रकृतिसम्बन्धिणत्वविधिः	७५
प्रत्यय सम्बधिणत्वविधिः	७७
णत्वविधौ निषेधरूपापवादसूत्राणि	७८

पञ्चमो विमर्शः ८०

प्रत्ययविधानोद्देश्यभूताः प्रकृतयः "
धातुविहितकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि ८१
स्त्र्यधिकार विहितधातुसम्बन्धिप्रत्ययानामुत्सर्गापवादत्वम् ८४
क्तखलर्थविधायकसूत्रविवेचनम् ८७
कर्तृवाचिकृत्प्रत्ययानामुत्सर्गापवादत्वम् ८९
कर्मकारकोपपदकर्तृवाचिकृत्प्रत्ययानामुत्सर्गापवादत्वम् ९२
भाववाचिकृत्प्रत्ययविधायक शास्त्राणामुत्सर्गापवादत्वम् ९९
'एरच्सूत्रापवादशास्त्राणि' १०३
ॠदोरप सूत्रस्यापवादशास्त्राणि १०५
गृहवृहनिश्चिगमश्चेतिशास्त्रस्यापवादशास्त्राणि १०६
करणाधिकरणार्थकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम् १०७
तच्छीलाद्यर्थकप्रत्ययविधायक शास्त्राणामुत्सर्गापवादत्वम् १०९

षष्ठो विमर्शः ११२

धातुविहितङ् प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि "
लडादिदशलकाराणामुत्सर्गापवादत्वम् "
लकारादेशतिङामुत्सर्गापवादशास्त्राणि ११८
तिङादेशानामुत्सर्गापवादत्वम् ११९
विकरणप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम् १२१
आत्मनेपदपरस्मैपदविधायकशास्त्राणामुत्सर्गापवादत्वम् १२४

सप्तमो विमर्शः १३०

प्रातिपदिकविहितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि "
स्त्र्यधिकारोक्तप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम् "
ऋन्नेभ्योङीबिति शास्त्रस्यापवादशास्त्राणि १३४
स्त्रीप्रत्ययसम्बन्ध्यादेशविधायकशास्त्रयोरुत्सर्गापवादत्वम् १३५
स्वौपस्थानिकादेशेषूत्सर्गापवादत्वम् "
प्रातिपदिकस्थानीयादेशेषूत्सर्गापवादत्वम् १३८
सुबन्ताद्विहिततद्धितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि १४२
अपत्यार्थकप्रत्ययेषूत्सर्गापवादत्वम् १४३
अत इञितिशास्त्रस्यापवाद शास्त्राणि १४६
रक्ताद्यर्थेषूत्सर्गापवादत्वम् १४८

चातुरर्थिकप्रत्ययानामुत्सर्गापवादत्वम्	१५२
शैषिकप्रत्ययानामुत्सर्गापवादत्वम्	१५४
"वृद्धाच्छः" इत्यस्यापवादशास्त्राणि	१६०
विकारार्थकप्रत्ययेषूत्सर्गापवादत्वम्	१६७
प्राग्वहतीयप्रत्ययानामुत्सर्गापवादत्वम्	१७१
प्राग्घितीयप्रत्ययानामुत्सर्गापवादत्वम्	१७४
छप्रत्ययविधेरपवाद सूत्राणि	१७५
ठक्ठञ् प्रत्ययाधिकारान्तर्गत सामान्य विशेषशास्त्राशि	१७६
भावकर्मार्थक प्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादत्वम्	१८२
मत्वर्थीप्रत्ययानामुत्सर्गापवादत्म्	१८३
अष्टमो विमर्शः	**१८६**
स्वार्थिकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम्	,,
विभक्तिसञ्ज्ञकस्वार्थिक प्रत्ययानामुत्सर्गापवादत्वम्	१८७
अस्तातिप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि	१८८
कप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि	१९१
ककन्कृत्वसुच्प्रत्ययोरपवादशास्त्राणि	१९३
नवमो विमर्शः	**१९५**
कारकविभक्तिविधावुत्सर्गापवादत्वम्	,,
विशेषशास्त्रविहितद्वितीयादिविभक्तिसम्बन्ध्युत्सर्गापवादत्वम्	१९८
षष्ठीविभक्तेरपवादशास्त्राणि	२०१
समाससम्बन्ध्युत्सर्गापवादशास्त्राणि	२०४
समासविध्यङ्गभूतशास्त्रेषूत्सर्गापवादभावः	२०७
अलुगधिकारस्यापवादशास्त्राणि	२११
दशमो विमर्शः	**२१३**
उदात्तादिस्वरविधावुत्सर्गापवादत्वम्	,,
प्रातिपदिकस्वरसम्बन्ध्युत्सर्गापवादशास्त्राणि	२१५
प्रत्ययस्वरविधावूत्सर्गापवादत्वम्	२१६
समासस्वरसम्बन्ध्युत्सर्गापवाद शास्त्राणि	२१८
तिङन्तपदस्वरविधावूत्सर्गापवादभावः	२२९
समापनम्	**२३०**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

व्याकरणविभागाध्यक्षचराणां

पण्डितश्रीरामप्रसादत्रिपाठिमहानुभावानां

शुभसंमतिः

श्रीहरिः शरणम्

'दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः' ।

इत्यनया श्रुत्या सत्यासत्ययो व्याकृतिं विधाता प्रजापतिः प्रथमो वैयाकरणः । अनयैव सरण्या पश्यन्तीपरयोः, मध्यमावैखर्योः ध्वनिस्फोटयोः पदवाक्ययोः, पदपदार्थयोः, प्रकृतिप्रत्यययोश्च पृथक्करणत्वरूपं व्याकरणत्वं दृष्टिपथमानेयम् । ईदृशं महनीयं व्याकरणशास्त्रमद्यत्वे पाणिनीयमेव । तच्च संज्ञा-परिभाषा-विधि-नियमादिभेदविशिष्टसूत्रसमुदायविलसितं विराजते । तेषु सूत्रेषु पूर्वोक्तपद्धत्या उत्सर्गापवादभेदाभ्यां पृथक्कृतेः सूचनां प्रदत्तवान् भगवान् भाष्यकारः—'सामान्यविशेषवल्लक्षणं प्रवर्त्यमिति ग्रन्थेन । अत्र सामान्यमुत्सर्गशास्त्रं व्यापकधर्माऽवच्छिन्नोद्देश्यताकं भवति, अपवादशास्त्रं विशेषशास्त्रम्, तच्च व्याप्यधर्माऽवच्छिन्नोद्देश्यताकं भवति । यथा-आमि सर्वनाम्नः सुडिति विशेषधर्मवदपवादशास्त्रम्, तदीयोद्देश्यताऽवच्छेदकंरूपम् - अवर्णान्ताङ्गाव्यवहितोत्तरत्वसर्वनामविहितत्वोभयधर्मविशिष्टाम्त्वम् । ह्रस्वनद्यापो नुडिति सामान्यमुत्सर्गशास्त्रं तदीयोद्देश्यताऽवच्छेदकं रूपम्-ह्रस्वान्तत्व-नद्यन्तत्व-आबन्तत्वान्यतमधर्मविशिष्टाङ्गत्वाऽवच्छिन्नाव्यवहितोत्तरत्वविशिष्टाम्त्वम् । एतच्च आमि सर्वनाम्न इतिसूत्रीयोद्देश्यतावच्छेदकरूपापेक्षया व्यापकमस्ति । अतस्तादृशापवादशास्त्रीयंव्याप्यं यदुद्देश्यताऽवच्छेदकं रूपम्, तदवच्छिन्नातिरिक्तत्वेनोत्सर्गशास्त्रीयोद्देश्यताऽवच्छेदकं यद् व्यापकं रूपं तदवच्छिन्ने संकोचः क्रियतेऽपवादशास्त्रेण । इदमेव फलं बोध्यमपवादशास्त्रेणोत्सर्गशास्त्रस्य बाधेन ।

इदमपि वैयाकरणैर्न विस्मर्तव्यम्-यद् अपवादशब्दस्तत्रन्यायीयबाधक विषये एव मुख्यः। अन्यथानवकाशत्वादिना बाधकविषये बाधकशब्द एव मुख्यः, अपवादशब्दो गौणः। उक्तं च भगवता भाष्यकृता-नहि गणोरीत्त्वमपवादत्वाद्धलादिःशेषं बाधते, किंतर्हि अनवकाशत्वादिति ग्रन्थेन।

ग्रन्थे चात्रोभयविधोऽपवादशब्दः प्रयुक्तः। अत्र प्रायेणाष्टाध्याय्यां व्यवहृतानि यान्युत्सर्गशास्त्राणि, यानि च तदीयापवादशास्त्राणि, यानि चोभयविधानि, तेषां समेषां नामग्राहं ससमन्वयं विश्लेषणेन भूयान परिश्रमः स्वोपज्ञता च प्रतीयते आयुष्मतः प्रेयसः श्रीशेषनाथमिश्रस्य।

एतद्ग्रन्थाध्ययनेन अनुसन्धातृच्छात्राणां कृते विशिष्टः सुलभो मार्गो निर्दिष्टो भविष्यति, येन तैरनुसन्धानकार्येऽवश्यं साफल्यं प्राप्स्यते। विदुषां चापि नूनं सन्तोषं जनयिष्यतीति शुभाशीर्वचोभिरेनं संवर्धयन्नदसीयं शुभोदर्कं कामयते—

नागपञ्चमी
वि० सं० २०४२

रामप्रसादत्रिपाठी

काशी हिन्दू विश्वविद्यालयस्य

व्याकरणविभागाध्यक्षाणां

चक्रवर्तिश्रीरामाधीनचतुर्वेदिमहोदयानां

शुभसंमतिः

महर्षिपाणिनेः सूत्ररचनायां प्राधान्येनोत्सर्गापवादात्मिका पद्धतिः प्रवृत्ता । अनयैव पद्धत्या शैल्या वा शिष्टैः प्रयुक्तानां पदानामन्वाख्यानं लघुनोपायेन सम्पन्नम् । अतएव शब्दानां प्रतिपत्तौ प्रतिपदपाठस्यानभ्युपायत्वं समुद्घोषयता महाभाष्यकारेण पतञ्जलिना 'किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम्, येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्, किंपुनस्तत् ? उत्सर्गापवादौ, कश्चिदुत्सर्गः कर्त्तव्यः, कश्चिदपवादः' इति सिद्धान्तितम् । एषा चोत्सर्गापवादशैली न केवलं व्याकरणशास्त्रमुपकरोति, अपि तु महर्षिप्रोक्तमखिलं शास्त्रं व्याप्नोति । तथा चोक्तं महाभारते—

> उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः ।
> अध्यात्मचिन्तामाश्रित्य शास्त्राण्युक्तानि भारत ।। इति,

व्याकरणाचार्येण श्रीशेषनाथमिश्रमहोदयेन विरचितः शब्दानुशासने उत्सर्गापवादशास्त्रविमर्शनामको ग्रन्थश्च तत्र समीक्षात्मकः । ग्रन्थेऽस्मिन् महर्षिपाणिनेः सूत्राणामुत्सर्गापवादसम्बन्धः पर्यालोचितः । कस्य सामान्यसूत्रस्य किं कानि वा विशेषसूत्राणि सन्ति, ? तथा तेषां विशेषसूत्राणामपि ततोऽपि विशेषसूत्राणि च कानीति सम्बन्धान्वेषणे महान् प्रयत्नोऽत्र कृतो लेखकेन विदुषा । तद्यथा- 'आद्गुणः' इति सामान्यसूत्रस्य 'अकः सवर्णे दीर्घः', 'वृद्धिरेचि-' प्रभृतिविशेषसूत्राण्युपन्यस्य पुनरेषाम् 'अतोगुणे', 'एङि पररूपम्' इत्यादीनि ततोऽपि विशेषसूत्राणि प्रस्तुतानि । एवमन्यविधिसूत्राणां सम्बन्धविमर्शोऽपि सफलः प्रयासो जातः । स च सर्वथा समुचितः ।

तस्मादेष ग्रन्थो व्याकरणशास्त्रस्याध्ययने महत्सौकर्यं सम्पादयिष्यतीति मे सुनिश्चितो विश्वासः—

श्रावणीरक्षाबन्धनम्, — रामाधीनचतुर्वेदिनः

वि० सं० २०४२,

प्रस्तावना

वेदाङ्गेषु प्रधानं व्याकरणशास्त्रं शब्दानुशासनपदेन व्यवह्रियते। तथा च महर्षिपतञ्जलिर्महाभाष्यग्रन्थस्योपक्रमे 'अथशब्दानुशासनमिति' प्रतिजानीते। शब्दानुशासनं हि अपौरुषेयवेदशास्त्रं शिष्टोपदिष्टशब्दपरम्पराञ्चाश्रित्य प्रतिसमयं बुधैः प्रारभ्यते। तथा चोक्तं शब्दतत्त्वविदा भर्तृहरिणा - "तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।

आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्॥"[1] इति,

स्ववृत्तावेतदव्याख्याने च 'तस्मादपौरुषेयमनतिशङ्कनीयं पुरुषहितोपदेशाय प्रवृत्तमाम्नायं प्रमाणीकृत्य पृषोदरादिवच्च साधुशब्दप्रयोगेषु शिष्टाचरितमविच्छिन्नपारम्पर्यं स्वचरणसमाचारं परिगृह्य विरोधे च स्थितविकल्पान्युत्सर्गापवादवदन्ति पूर्वेषामृषीणां स्मृतिशास्त्राणि प्रतिकालं दृष्टशब्दस्वरूपाव्यभिचाराणि प्रमाणिकृत्येदमाचार्यैः शब्दानुशासनं प्रक्रान्तमनुगम्यते' इत्युक्तम्।

एतवता पूर्वेषामृषीणां स्मृतिशास्त्राण्यप्युत्सर्गापवादभावेन व्याकरणशास्त्रारम्भे प्रमाणभूतानीति स्पष्टं प्रतीयते।

व्याकरणशास्त्रमपि शब्दस्मृतिग्रन्थः, यतो हि यथा स्मृत्युक्तं भक्ष्याभक्ष्यगम्यादिविषयकमाचारं शिष्टा नोल्लङ्घयन्ति, तथैव शिष्टपरम्पराप्राप्तशब्दसाधुत्वज्ञानविषयकव्याकरणस्मृतिशासनमपि नोल्लङ्घनीयमिति शिष्टाचारः। अतएवानादिपरम्पराप्राप्तशब्दसाधुत्वज्ञानविषयिणीं व्यवस्थां स्थिरीकर्तुं शिष्टैः शब्दसाधुत्वविषया व्याकरणस्मृतिर्निबध्यते। तदेतत्सर्वम्-

'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
'अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्[2]॥
'नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति।
'तस्मान्निबध्यते शिष्टैः साधुत्वविषयास्मृतिः[3]॥

इति कारिकाभ्यामाभ्यां तेनैव महाविदुषा भर्तृहरिणा सिद्धान्तितम्।

'पृषोदरादीनि यथोपदिष्टमि'ति सूत्रभाष्ये च महर्षिपतञ्जलिः-कैः पुनरुपदिष्टाः? शिष्टैः के पुनः शिष्टाः? वैयाकरणाः, कुत एतत्? शास्त्र-

१ - वाक्यपदीय ब्रह्मकाण्डम् ४३   २. वा० प० ब्र० १४३

३. वा० प० ब्र० २९

पूर्विका हि शिष्टिः। वैयाकरणाश्च शास्त्रज्ञाः, यदि तर्हि शास्त्रपूर्विका शिष्टिः, शिष्टिपूर्वकं च शास्त्र, तदितरेतराश्रयं भवति, इतरेतराश्रयाणि च न प्रकल्पते। एवं तर्हि निवासतश्चाचारतश्च। स चाचार आर्यावर्ते एव। कः पुनरार्यावर्तः ? प्रागादर्शात्प्रत्यक्कालकवनाद् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्। एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अनुगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः", इति शिष्टलक्षणमुक्त्वा यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमाष्टाध्याय्या क्रियते इति प्रश्नमुद्भाव्य, शिष्टपरिज्ञानार्थाष्टाध्यायी[1], इति समाहितवान्।

भगवता पुरुषोत्तमेन श्रीकृष्णेनापि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। यत् प्रमाणं कुरुते लोकस्तदनुवर्तते।[2]" इति गीतम्।

शब्दसाधुत्वप्रतिपत्तौ कार्याकार्यव्यवस्थितौ च शिष्टव्यवहार एव प्रमाणकोटिं भजते। स एव व्यवहारः शास्त्ररूपेण शिष्टैर्यथासमयं निबध्यते स्मरणार्थमितिमतं सिद्धम्।

शिष्टव्यवहारे च सामान्यविशेषभावः स्वाभाविको दृश्यते। यतो हि न हि सर्वे सामान्यविषयः सर्वदा भवन्त्युपयुक्ताः, विशेषावसरे तत्र संकोचविकासौ भवतः। यथा "रात्रौ न स्नायादिति धर्मशास्त्रस्य सामान्यानुशासने "राहूपरागे रात्रावपि स्नायादिति" विशेषविधिः प्रवर्तते। एवं 'मा हिंस्यात् सर्वभूतानीति" यत्रोत्सर्गतः समनुशिष्यते तत्र "आग्निमारुतीमनड्वाहीमालभेत" "पशुना यजेत" इत्यादि विशेषविधयोऽपि श्रूयन्ते। अत एव सर्वेऽप्युत्सर्गाः सापवादाः इति बुधाः समुद्घोषयन्ति।

महाभारते च स्पष्टमेवोक्तम्–उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः। आध्यात्मचिन्तनमाश्रित्य शास्त्राण्युक्तानि भारत[3]॥ इति। तस्माच्छिष्टोपदिष्टशास्त्राणां व्यवस्था सामान्यविशेषात्मकोत्सर्गापवादभावमाश्रित्य प्रवृत्तेति निश्चितम्।

शब्दानुशासने सूत्राणामुत्सर्गापवादभावश्च सर्वविधसाधुशब्दानां प्रतिपत्तिसौकर्याय स्वीकृतः। अनया सूत्राणामुत्सर्गापवादव्यवस्थया च यद्यपि लघुनोपायेन शब्दानां साधुत्वविज्ञाने सौलभ्यमस्ति, तथापि कस्योत्सर्गशास्त्रस्य कान्यपवादशास्त्राणि, तेषामपवादशास्त्राणामप्यपवाद-

---

१– म० भा० पा० सू० ६।३।१०९

२– श्रीमद्भगवद्गीता—अ–० ३ श्लोक० २१

शास्त्रं किमिति विवेचनं नैव सुलभम्, यतोहि शिष्टप्रयुक्तविभिन्नपदानामन्वाख्याने महर्षिपाणिनेरुत्सर्गापवादशास्त्राणां क्रमबद्धपरम्परा विद्यते। तत्रैकस्योत्सर्गशास्त्रस्यानेकविधापवादशास्त्राणामप्यपवादशास्त्राणि दृश्यन्ते। यथा सुध्युपास्यः, मध्वरिप्रभृतिपदान्वाख्याने चरितार्थ्यस्य यण्विधायकस्य इकोयणचीत्युत्सर्गशास्त्रस्य "श्रीशः" "भानूदय" इत्यादौ दीर्घविधायकेन "अकः सवर्णे दीर्घः" इति विशेषशास्त्रेण बाधो भवति पुनश्च हरी इमौ "अकः सवर्णे दीर्घः" इति विशेषशास्त्रस्यापि प्रकृतिभावविधायकेन "प्लुतप्रगृह्या-ऽचि नित्यम्" इत्यनेन भवति बाधः।

एवं "भवति" इत्यत्र भू+अ+ति इत्यवस्थायां प्राप्तं यणं प्रबाध्य सार्वधातुकार्धधातुकयोरितिविशेषशास्त्रेण गुणो विधीयते चितः स्तुतः इत्यादौ तु स गुणो क्ङितिचेति शास्त्रेण निषिद्धः। एतन्निषेधशास्त्रञ्च "शेते" इत्यत्र "शीङः सार्वधातुके गुणः" इति विशेषशास्त्रेणापवाद्य गुणो विधीयते।

किञ्च शब्दानुशासने सामान्यतः विधिरूपं निषेधरूपञ्चेति द्विविधमपवादशास्त्रं दृश्यते। तत्र विधिरूपापवादशास्त्रदृष्टान्ते "एचोऽयवायावः" इत्युत्सर्गशास्त्रस्य "एङःपदान्तादति" ङसिङसोश्च" इन्द्रे चेत्येवं भूतान्यपवादशास्त्राणि समायान्ति। एभिर्हि पूर्वरूपावङ्विधिभ्यामयवादेशौ बाध्येते। तेन हरेऽव, हरेः गवेन्द्र इति पदानि सिध्यन्ति। निषेधरूपापवादशास्त्रोदाहरणे च "आर्धधातुकस्येड्वलादेः" इत्युत्सर्गशास्त्रस्य 'नेड्वशिकृति' 'तितुत्रतथसिसुसरकसेषु च' एकाच उपदेशेऽनुदात्तात्' 'श्र्युकः किति' 'सनिग्रहगुहोश्च' इत्यादि शास्त्राणि प्रसिद्धान्येव। एषां निषेधरूपापवादशास्त्राणामपि प्रतिप्रसवरूपेण अपवादशास्त्राणि प्रवर्तन्ते। तेन आदिवान् ददिवानित्यत्र 'नेड्वशिकृति' इति निषेधसूत्रमपवाद्य 'वस्वेकाजाद्धसाम्' इति विशेषसूत्रेण इडविधिः सिध्यति।

तदित्थं शब्दानुशासनविषयकोत्सर्गापवादशास्त्राणां क्रमबद्धः परिचयः एकत्र यथा भवेदिति भावनया मयात्र प्रयत्नो विहितः। तत्र तत्तद् विधिशास्त्राणामधिकारसूत्राण्याधारीकृत्य उत्सर्गशास्त्राणामपवादशास्त्रैः साकं यथालक्ष्यं सम्बन्धक्रमो विविच्य दर्शितः।

अस्य ग्रन्थस्य परिपूर्त्तौ च येषां पूज्यनां डॉ० श्रीसीतारामशास्त्रिमहाशयानां, चक्रवर्तिश्रीपण्डितरामाधीनचतुर्वेदिमहोदयानां डॉ० रामअवध पाण्डेयमहानुभावानां च दिग्दर्शनमुपलब्धम्, एतदर्थं तेषां समेषां विदुषां सर्वथोपकारभारं वहामि।

मम मित्रेण साहित्याचार्य एम. ए. इत्युपाधिधारिणा श्रीकपिल देवगिरिमहाशयेनाऽस्य ग्रन्थस्य मुद्रणे प्रारूप(प्रूफ)संशोधने च यत् साहाय्यं विहितं तदर्थमेतस्मै धन्यवाद वितरन् प्रसीदामि।

काशीस्थकिशोरविद्यानिकेतनसंचालकेन श्रीनन्दकिशोरद्विवेदिना चैष ग्रन्थः प्रकाशितः, अतः सोऽपि धन्यवादार्हः।

अस्य मुद्रणे याः काश्चन त्रुटयः भ्रमाज्जाताः ताश्च विज्ञैः स्वयमेव संशोध्य पठितव्या इति विनिवेदयति—

ऋषिपंचमी
वि० स० २०४२ (१९८५)
वाराणसी

विदुषामनुगः
शेषनाथमिश्रः

सहायकग्रन्थानां परिचयः

ग्रन्थाः	लेखकाः प्रकाशकारश्च
१:-सिद्धान्तकौमुदी	भट्टोजिदीक्षितः
२:-काशिका	जयादित्यवामनौ
३:-महाभाष्यम्	महर्षिपतञ्जलिः
४:-लघुशब्देन्दुशेखरः	नागेशभट्टः
५:-परिभाषेन्दुशेखरः	"
६:-मनुस्मृतिः	मनुः
७:-वाक्यपदीयम्-	भर्तृहरिः-
८:-तत्त्वबोधिनो	श्रीज्ञानेन्द्रसरस्वती
९:-अष्टाध्यायी	महर्षिपाणिनिः
१०:-वैयाकरणभूषणसारः	कौण्डभट्टः
११:-छान्दोग्योपनिषद	गीताप्रेस गोरखपुर
१२:-श्रीमद्भगवद्गीता	"
१३:-बालमनोरमा	वासुदेवदीक्षितः
१४:-महाभारतम्	महर्षिव्यासः

॥ श्रीमङ्गलमूर्त्तये नमः ॥

शब्दानुशासने उत्सर्गापवादशास्त्रविमर्शः

प्रथमो विमर्शः

यदनुग्रहमात्रेण सिद्धं शब्दानुशासनम् ।
तं महेशमहं वन्दे प्रकाशावाप्तये मुदा ॥१॥
विशेषशास्त्रमालोच्य शेषे सामान्यलक्षणम् ।
प्रवर्तते यथालक्ष्यं तत्सर्वमिह चिन्तये ॥२॥

उत्सर्गापवादशास्त्रस्वरूपम्

महेश्वरप्रसादात्प्राप्तमिदं पाणिनीयं शब्दानुशासनं नाम शास्त्रं सुमहदस्ति । शास्त्रेऽस्मिन् वैदिकानां लौकिकानाञ्च शब्दानामनुशासनं यथा विहितमस्ति तथान्यत्र नोपलभ्यते । एतच्च महर्षिपाणिनेः तपसः फलं भाति यत् सम्पूर्णसंस्कृतवाङ्मयस्य साधुशब्दानां परिचयश्चतुस्सहस्रसूत्रसंहितयैव सुलभो भवति । तत्र सूत्राणि किल षड्विधानि सन्ति । तथा च प्रसिद्धमस्ति—

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ॥ इति ।

एषु षड्विधसूत्रेषु विधिशास्त्रस्य प्राधान्यमस्ति । विधिशास्त्रोपकाराय च अन्येषां संज्ञापरिभाषानियमातिदेशाधिकारसूत्राणामावश्यकता वरीवर्ति । एषु सर्वेषु षड्विधसूत्रेषु प्रायशो बहुत्र सामान्यविशेषभावो दरीदृश्यते । सामान्यविशेषभाव एव व्याप्यव्यापकभावरूपेण उत्सर्गापवादभावरूपेण च शास्त्रेषु व्यवहृतो भवति । तस्माद् यं कमपि भावमेकमादाय विमर्शे सर्वेषां सूत्राणां वर्गीकरणं सम्पद्यते ।

अत एव महाभाष्यकारो महर्षिपतञ्जलिः शब्दानां प्रतिपत्तौ प्रतिपदपाठमनादृत्य सामान्यविशेषभावेन लक्षणप्रवर्तनमेव शब्दप्रतिपत्तिकारणमङ्गीकृतवान् । तद्यथा—"अनभ्युपाय एषः शब्दानां प्रतिपत्तौ प्रति-

पदपाठः। एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति, वर्षशतं जीवति. चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यागमनकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ कश्चिदुत्सर्गः कर्त्तव्यः कश्चिदपवादः। कथं जातीयकः पुनरुत्सर्गः कर्त्तव्यः, कथं जातीयकोऽपवादः सामान्येनोत्सर्गः कर्त्तव्यः। तद्यथा–'कर्मण्यण्'। तस्य विशेषेणापवादः। तद्यथा—'आतोऽनुपसर्गे कः[१]' इत्येवं लघुनोपायेन शिष्टप्रयुक्तशब्दानां समाधानं पाणिनीयशास्त्रे उत्सर्गापवादरूपेण सम्पन्नमिति भाष्यकारस्य सङ्केतो निश्चीयते। तत्र सामान्यशास्त्रं व्यापकशास्त्रं वा उत्सर्गपदेन गृह्यते। विशेषशास्त्रं व्याप्यशास्त्रं वा अपवादपदेन बोध्यते। अपवादशास्त्रं हि सामान्यशास्त्रमपोद्यते-बाध्यते अनेनेति व्युत्पत्त्या स्वस्मिन् विषये उत्सर्गशास्त्रं न सहते। यदि उत्सर्गशास्त्रमपवादशास्त्रविषयेऽपि प्रवर्तेत तदा अपवादशास्त्रस्य किमपि लक्ष्यमेव न स्यात्। अत एव 'निरवकाशो विधिरपवादः' इति लक्षणमपवादशास्त्रस्य सामान्यरूपेण व्यवह्रियते शास्त्रेषु विज्ञैः। एतन्मूलकमेव 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' इति परिभाषया अपवादस्वरूपं परिष्कृतं भवति। तथा च व्याख्यातं नागेशभट्टैः 'विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधः। तदप्राप्तियोग्येऽचारितार्थ्यं ह्येतस्य बाधकत्वे बीजम्। अत एवा'यादय' इति सूत्रे गोपायिष्यतीत्यादावायादीन्बाधित्वा परत्वात् स्यादयः प्राप्नुवन्तीत्याशङ्क्यानवकाशा आयादय इति भाष्ये उक्तम् इत्यादिना[२]।' अपि च 'सत्यपिसम्भवे बाधनं भवति' तद्यथा 'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय' इत्यत्र तक्रदानेन दधिदानस्य बाधो भवति। यद्यपि तक्रदानोत्तरं दधिदानमपि तत्र सम्भवेत् तथापि तक्रदानेन दधिदानस्य बाधो जायते। तथैव 'अपवादशास्त्रस्य चारितार्थ्येऽपि उत्सर्गशास्त्रस्य तदपवादलक्ष्ये प्रवृतिर्न भवतीति[३]' भाष्यमपि अपवादस्वरूपं निर्धारणे-

१. महाभाष्यपस्पशाह्निके। २. परिभाषेन्दुशेखरस्य बाधबीजप्रकरणे।
३. महाभाष्यम्।

प्रवर्तते। तदित्थमपवादशास्त्रस्वरूपं निष्पन्नम्। एतद्भेदास्तदुदाहरणानि चानुपदं प्रदर्शयिष्यन्ते।

अपवादशास्त्रप्रवृत्तिप्रकारः

तत्र तावदपवादो द्विविधः—असति सम्भवे सर्वथा निरवकाशत्वाद् बाधकः, सति सम्भवे तक्रकौण्डिन्याय प्रतिपाद्य बाधकश्चेति। तद्यथा गां ददातीति विग्रहे 'कर्मण्यण्:[१]' इति सामान्य सूत्रस्य प्राप्तौ 'आतोऽनुपसर्गेकः [२]' इति विशेषशास्त्रेण आदन्तादनुपसर्गाद्धातोः कः प्रत्ययो विधीयते। अतोऽनेन विशेषसूत्रेणाण् प्रत्ययस्य निरवकाशत्वाद् बाधो भवति। यदि सर्वत्र कर्मण्युपपदे धातोरणेव स्यात्तदा 'आतोऽनुपसर्गे कः' इति सूत्रं व्यर्थमेव भवेत्। तस्माद् विशेषशास्त्रस्य असति संभवे विशेषशास्त्रेण सामान्यशास्त्रस्य बाधो भवत्येव। सति सम्भवे चापवादशास्त्रस्योदाहरणन्तु 'मिदचोऽन्त्यात्परः[३] इति सूत्रम्। तथाहि पूर्वोक्ततक्रकौण्डिन्यन्यायेनं यशांसि, पयांसीत्यादौ 'मिदचोऽन्त्यात्परः' इति परिभाषासूत्रसाहाय्येनान्त्यादचःपरः 'नपुंसकस्यझलच[४]' इति सूत्रेण नुम्विधीयते। तत्र अचोऽन्त्यात्परे नुमि कृतेऽपि 'अलोऽन्त्यस्य[५]' इति सामान्यपरिभाषा सूत्रसाहाय्येनान्त्यस्यापि नुम्सम्भवः स्यात्। पुनरपि 'मिदचोऽन्त्यात्परः' इति विशेषपरिभाषासूत्रनियमेन सामान्यरूपोत्सर्गस्य अलोऽन्त्यस्येति शास्त्रस्य बाधो भवति।

तदित्थमसति सम्भवे बाधकः, सति सम्भवे बाधकश्चेति द्विविधोऽपवादशास्त्रस्य भेदो जातः। किञ्च अपवादशास्त्रं प्रकारान्तरेणापि द्विधा जायते। तत्र बाध्यसामान्यचिन्तापक्षः—बाध्यविशेषचिन्तापक्षयोर्मध्ये लक्ष्यानुसारादन्यतरेण पक्षेणापवादशास्त्राणि प्रवर्त्तन्ते। तत्र तावत् 'मद्विषये यद्यत्प्राप्नोति तत्सर्वं मया बाध्यमिति बाध्यसामान्यचिन्तापक्षस्य स्वरूपम्। एतदुदाहरणं हि उपैति, प्रष्ठौहः, इत्यत्र 'एत्येधत्यूठ्सु[६]' इति सूत्रेण वृद्धिर्विधीयते। तत्र 'उपैति' इत्यत्र 'एङि पररूपम्[७]' इति सामान्यसूत्रेण पररूपं प्राप्नोति, प्रष्ठौह इत्यत्र 'आद्गुणः[८]' इत्युत्सर्गसूत्रेण गुणः प्राप्नोति। तदेतत् सर्वं प्रबाध्य 'एत्येधत्यूठ्सु वृद्धिरेव भवतीति बाध्यसामान्यचिन्तापक्षेणात्र बाधः।

---

१. पा० सू० ३।२।१
२ पा० सू० ३।२।३
३. पा० सू० १।१।४७
४. पा० सू० ७।१।७२
५. पा० सू० १।१।५१
६. पा० सू० ६।१।८९
७. पा० सू० ६।१।९४
८. पा० सू० ६।१।८७

अनेकोत्सर्गसूत्रप्राप्तिप्रसंगे कस्यापि एकस्यैव विशेषशास्त्रस्य यदा बोधः तदा बाध्यविशेषचिन्तापक्षः शास्त्रेणाश्रयणीयोभवति । तद्यथा—'अवेहि' इत्यत्र बाध्यविशेषचिन्तया 'एत्येधत्यूठ्सु[१]' इति सूत्रेण केवलस्य 'एङि पररूपम्[२]' इतिसूत्रविहितस्यैव पररूपस्य बाधो भवति न तु ओमाङोश्चेति[३] सूत्रविहितपररूपस्यापि। तस्मादत्र ओमाङोश्चेति पररूपं भवत्येव। यद्यप्यत्र 'एत्येधत्यूठ्स्विति अपवादरूपवृद्ध्या पररूपत्वेन उभयोरपि पररूपयोर्बाधः सम्भवेत् तथापि प्रथमोपस्थितत्वात् 'एङिपररूपम्' इति विशेषपररूपस्यैव बाधो भवति। 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति परिभाषापि एतदर्थसूचिकैव। अत्र रहस्यमिदमस्ति यत् प्रथमोपस्थितमेङिपररूपमित्युत्सर्गशास्त्रं प्रबाध्य 'उपैति इत्यादि प्रयोगे सावकाशावृद्धिः बुद्धौ पश्चादुपस्थितमपि 'ओमाङोश्चेति' पररूपशास्त्रं बाधितु ं न प्रवर्तते निरवकाशत्वरूपत्वाभावात्। अपितु अपवादो यद्यन्यत्र चरितार्थः तर्हि परेण बाध्यते इति सिद्धान्तानुसारेण परस्मिन् ओमाङोश्च इति शास्त्रे एव एत्येधत्यूठ्स्विति शास्त्रापेक्षया बलवत्वं सिध्यति। तस्मादवेहीत्यत्र 'विप्रतिषेधे परं कार्यम्[४]' इति परिभाषासूत्रबलेन परेण ओमाङोश्चेति शास्त्रेण पररूपमेव भवति। अस्तु।

शब्दानुशासनं नामशास्त्रं हि प्रयुक्तानां लक्ष्याणां साधुत्वसम्पादनाय प्रवर्तत इति सिद्धान्तः। तस्मात् शिष्टप्रयुक्तानां शब्दानामन्वाख्याने उत्सर्गापवादशास्त्राणां प्रवृत्तौ सङ्कोचविकासावपि भवतः। तत्रोत्सर्गशास्त्राणां प्रबाधनाय अपवादशास्त्रप्रवृत्तावपि अनेके नियमाः स्वीक्रियन्ते शाब्दिकैः। तथाचोक्तमेवेदानीमपवादशास्त्रविषये 'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरानि' ति। एवं विषयेऽस्मिनन्येऽपि अपवादशास्त्रप्रवृत्तिसङ्कोचनियमाः सन्ति, ते सर्वेऽपीह प्रकृतत्वात् संगृह्य यथा लक्ष्यं व्याख्यास्यन्ते। यतोहि अपवादस्वरूपनिर्धारणं तद्भेदनिर्धारणञ्च अपवादशास्त्रप्रवृत्तिप्रयोजकविशेषनियमस्वरूपज्ञानं विना नैव भवितुमर्हति। तत्र यथा पूर्वोक्तापवादप्रवर्तकविशेषनियमेन 'अवेही' त्यत्र एत्येधत्यूठिति वृद्ध्या नोत्तरविधेः ओमाङोश्च इत्यस्य बाधः, अपित्वनन्तरविधिरेङिपररूपमित्यस्यैव बाधो जातः। तथैव 'मध्ये अपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरानि'ति नियमोऽपि स्वीक्रियते। तेन विम्बोष्ठी

---

१. पा० सू० ६।१।८९ २. पा० सू० ६।१।९४
३. पा० सू० ६।१।९४ ४. पा० सू० १।४।२

सुजङ्घी' इत्यादौ 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधादि ' ति सामान्यसूत्रस्थ 'संयोगोपधा' दिति पर्य्युदासस्यपूर्वस्य तत उत्तरेण 'नासिकोदरौष्ठजङ्घा-दन्तकर्णशृङ्गाच्चेति[2] विशेषसूत्रेण बाधो भवति। न तु 'सहनञ् विद्यमान-पूर्वाच्चे[3] त्युत्तरस्य सामान्यसूत्रस्य। तेन 'सहनासिके'त्यत्र ङीष्निषेधः सिद्धः। अत्रापि अपवादशास्त्रस्य प्राबल्ये निरवकाशत्वमेव बीजम्। यतोहि नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्चे' त्यपवादशास्त्रं तुङ्गनासिकी, कुम्भो-दरीत्यत्र 'नक्रोडादि बह्वचः[4]' इति निषेधसूत्रं पूर्वोक्तपुरस्तादपवादन्या-येन बाधित्वा बिम्बोष्ठीत्यादौ च 'स्वाङ्गोपसर्जनादसंयोगोपधादि' ति शास्त्रञ्च प्रबाध्य चरितार्थमस्ति। तस्मात् 'नासिकोदरौष्ठजङ्घादन्तकर्ण-शृङ्गाच्च' सहनञ्विद्यमानपूर्वाच्चे' ति शास्त्रयोरन्यत्र क्रमशः बिम्बोष्ठी सुकेशी त्यादौ सावकाशत्वेन तुल्यबलत्वात् 'विप्रतिषेधे परं कार्यम्[5]' इति नियमात् 'सहनासिके' त्यत्र निषेध एव युक्तः। इमामेव युक्ततां 'मध्ये अपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषाऽपि अनुवदति। यत्र च परस्परं सूत्रापेक्षया पूर्वत्वं परत्वं वा विधिशास्त्रेषूपलभ्यते तत्रैवो-त्सर्गापवादविषये पूर्वोक्तपरिभाषा द्वयस्य प्रवृत्तिः। यत्र च एकेनैव विधि-शास्त्रेणोत्सर्गेण कार्यद्वयं विधीयते तत्र तदपवादशास्त्रेण उत्सर्गशास्त्रविधेय-भूतयोरुभयोरपि कार्ययोर्बाधः? उताहो अन्यतरस्य? तत्रापिपूर्वस्य परस्य-वेति? तथाहि—'सेर्ह्यपिच्च' इत्युत्सर्गशास्त्रेण 'जुहुधि' इत्यादौ सेर्हित्वं तस्य चापित्वमिति कार्यं द्वयं विधीयते—तदनुवर्त्तते तदपवादशास्त्रं 'वाच्छन्दसि' इति। तथा च अपवादशास्त्रेणानेन केवलमपित्वमेव वा विकल्पेन विधेयम् उत हित्वम्-उताहो उभयमेवेति प्रश्ने 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषोक्तमार्गेणैवात्र व्यवस्था सम्पादनीयेति निर्णयः। तदा चात्र वाच्छन्दसीत्यनेन अनन्तरस्य अपित्वस्यैव विकल्पविधानं न तु हेरपीति भावः। तेन युयोध्यस्मज्जहुराणमेनः' इति वैदिकवाक्यस्थे 'युयोधि' इति पदे अपित्वाभावेहि गुणः सिद्धः। एवं प्रतिषेधोऽपि सन्नि-कटस्थस्यैव भवति। तद्यथा 'नेटी[6]' ति सूत्रेण 'वदव्रजहलन्तस्याचः[7]' इति विहिताया एव वृद्धेः प्रतिषेधो दृश्यते, न तु 'सिचि वृद्धिः परस्मैपदेष्वि[8]' ति शास्त्रविहितव्यवहितवृद्धेः। तेन 'अदेवीदित्यत्र वृद्धिनिषेधो', न तु 'अलावीद्' इत्यत्र। यथा लक्ष्यं क्वचित् व्यवहितस्यापि शास्त्रस्य विधिः, प्रतिषेधो वा जायते। यथा "टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठ-

१. पा० सू० ४।१।५४ २. पा० सू० ४।१।५५ ३. पा० सू० ४।१।५७
४. पा० सू० ४।१।५६ ५. पा० सू० १।४।२ ६. पा० सू० ७।२।४
७. पा० सू० ७।२।३ ८. पा० सू० ७।२।१

ञ्कञ्ववरपः[१]' इति सूत्रादव्यवहितपूर्वं डाब्विधायकं 'डाबुभाभ्यामन्यतरस्याम्[२]' इति शास्त्रमस्ति, किन्तु समीपस्थेन टिड्ढाणञिति शास्त्रस्य तदव्यवहितेन 'ऋन्नेभ्योङीप्[३]' इति विधेयेन ङीपा एव सम्बन्धो भवति न तु समीपस्थेन डापा। एवमेव पञ्च स्त्रियः इत्यत्र च स्वसाननान्दा दुहितेत्यादौ च 'न षट्स्वस्रादिभ्यः[४]' इति शास्त्रेण व्यवहितयोरपि डाब्ङीपोः प्रतिषेधः सिध्यति। तस्मादुत्सर्गापवादशास्त्राणां क्वचिदानन्तर्यमन्तरेणापि प्रवृत्तिर्यथा लक्ष्यं सम्पद्यते।

किञ्च उत्सर्गापवादशास्त्रप्रवृत्तिविषये 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' 'प्रकल्प्य चापवादविषयं तत् उत्सर्गोऽभिनिविशते' इति परिभाषा द्वयमपि व्यवस्थार्थम् उपतिष्ठते। तत्र लक्षणमाधारीकृत्य शब्दसंस्कारपक्षे प्रथम परिभाषायाः प्रवृत्तिः, लक्ष्यमाधारीकृत्य च द्वितीयपरिभाषायाः प्रवृत्तिरिति विवेकः।

अत्रायमेव निष्कर्षो भाति यत् यदुत्सर्गशास्त्रम् अपवादशास्त्रमपर्यालोच्यैव प्रवर्तेत, तदा उत्सर्गशास्त्रेण कार्ये निष्पन्ने सति अपवादशास्त्रं भुक्तवन्तं प्रति मा भुङ्क्था इति निषेधवन्निरर्थकमेव स्यात्। अपवादशास्त्रस्य नैरर्थक्यमेव च तद्बलवत्त्वे बीजमिति निरवकाशो विधिरपवाद इत्यपवादस्वरूपं पूर्वोक्तं प्रसिद्धमेव। अत एव 'अपवादो हि यद्यन्यत्र चरितार्थः तर्ह्यन्तरङ्गेण बाध्यते' इति परिभाषाया अवसरः समायाति। शास्त्राणां परस्परं बाध्यबाधकभावरूपं बलवत्त्वं सामान्यत एष खलु नियमो निर्धारितो वर्तते यत् 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति। अर्थात् पूर्वस्माच्छास्त्रात् परशास्त्रं बलवद्भवति। तथा च सूत्रमस्ति 'विप्रतिषेधे परं कार्यमि'ति। एवं परस्मादपि शास्त्रान्नित्यं शास्त्रं प्रबलमस्ति। एवमेवाग्रे नित्यशास्त्रादपि अन्तरङ्गशास्त्रं तथा अन्तरङ्गशास्त्रादप्यपवादशास्त्रञ्च सर्वथा प्रबलमिति पद्धतिः प्रसिद्धा। किन्तु यदि अपवादशास्त्रम् अन्यत्र चरितार्थं स्यात्तर्ह्यन्तरङ्गशास्त्रस्यैव बलवत्त्वं बोध्यम्। यतो हि अपवादशास्त्रस्य तदानीं निरवकाशरूपापवादत्वमेव नास्ति। अत एव 'अयजे इन्द्रम्' इत्यत्र 'अयज इ इन्द्रम्' इत्यवस्थायाम् 'आद् गुण' इति सामान्यान्तरङ्गशास्त्रापेक्षया 'अकः सवर्णे दीर्घ[५]' इति अपवादशास्त्रस्य प्रवृत्तिरेव भवितुमर्हति सामान्यनियमात्। किन्तु 'आद् गुण' इति सामान्यशास्त्रस्य

---

१. पा० सू० ४।१।१५
२. पा० सू० ४।१।१३
३. पा० सू० ४।१।५
४. पा० सू० ४।१।१०
५. पा० सू० ६।१।१०१

यत्र प्रवृत्ति र्न भवति तत्रापि 'अकः सवर्णे दीर्घ' इति विशेषशास्त्रस्य 'श्रीश' इत्यादौ चारितार्थ्यमस्ति। अत 'अयज इ इन्द्रम्' इत्यत्र अन्तरङ्गत्वाद् गुण एव भवति, न तु दीर्घः। यतो हि तदप्राप्तियोग्येऽचारितार्थ्यम् अपवादशास्त्रस्य बाधकत्वे बीजमिति सिद्धान्तः। स चेह न सङ्घटते–'श्रीश' इत्यादौ 'आद् गुण' इति सामान्यसूत्रस्य अप्राप्तियोग्येऽपि सवर्णदीर्घस्य चारितार्थ्यसम्भवात्। तस्मादपवादत्वमेवेह सवर्णदीर्घस्य नास्तीति भावः।

अपवादशास्त्रस्य निरवकाशरूपबलवत्त्वेऽपि सङ्कोचविकासौ यथालक्ष्यमन्यत्रापि दृश्यते। तद्यथा—'अजीगणदि' त्यत्र 'ई च गणः[१]' इत्यपवादशास्त्रस्य प्रवृत्तौ अभ्यासलोपो न स्यात्, यतो हि 'हलादिः शेषः[२]' इति सामान्यशास्त्रेण अभ्यासणकारस्येह लोपे जाते सति गणत्वाभावात् 'ई च गण' इत्यस्य निरवकाशत्वमेव स्यात्। निरवकाशत्वाच्च अभ्यासलोपस्येति सामान्यशास्त्रस्य बाधो भवेत्। तस्मादपवादशास्त्रविषये 'अभ्यासविकारे बाध्यबाधकभावो नास्ती' ति परिभाषाविषयकः सङ्कोचः पुरस्सरति। अत्र सङ्कोचरूपनियमे महर्षिपाणिनेः 'दीर्घोऽकित[३]' इति सूत्रस्थम् 'अकित' ग्रहणमपि ज्ञापकमस्ति। यतो हि 'यंयम्यते, रंरम्यते' इत्यादौ 'दीर्घोऽकित' इति सूत्रेणाभ्यासस्य दीर्घो मा भूदेतदर्थमेवाकिद् ग्रहणमस्ति। तत्र यदि 'यम् यम्यते' इत्यवस्थायां 'हलादिः शेषः' इति शास्त्रेण पूर्वमभ्यासलोपः स्यात्तर्हि अनुनासिकान्तत्वाभावात् 'नुगतोऽनुनासिकान्तस्य[४]' इति विशेषशास्त्रस्य प्रवृत्तिरेव न भवेत्। ततश्च निरवकाशत्वान् यदि हलादिशेषं बाधेत तदा नुकि कृतेऽजन्तत्वाभावादेव दीर्घस्यात्र प्राप्ति र्न स्यात् अतः किद्ग्रहणं व्यर्थं भवेत्। तच्च व्यर्थीभूय ज्ञापयति यत् अभ्यासविकारेऽपवाद नियमप्रवृत्तेरवकाशो नास्तीति। तेनात्र नुकि कृते धातोरभ्यासस्य लोपे च जाते कित्त्वादेव दीर्घो न भवतीत्यकिद्ग्रहणस्य स्वांशे चरितार्थ्यं स्पष्टं भवति।

एवमेव 'कर्त्तव्यम्, करणीयम्, कार्यमि'त्यादिप्रयोगानेकस्मिन्नेवार्थे व्यवहृतानभिलक्ष्य अपवादशास्त्रस्य बाध्यबाधकभावे विकासोऽपि स्वीक्रियते बुधैः। तथा च सूत्रं महर्षिपाणिनेः 'वाऽसरूपोऽस्त्रियाम्[५]' इति। अस्यार्थस्तु–अस्मिन् धात्वधिकारेऽसमानरूपः प्रत्ययो विल्पेन बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वेति काशिकावृत्तौ प्रसिद्धः। तेन 'ऋहलोर्ण्यत्[६]'

१. पा० सू० ७।४।९७।
२. पा० सू० ७।४।६०।
३. पा० सू० ७।४।८३।
४. पा० सू० ३।१।९४
५. पा० सू० ७।४।८५।
६. पा० सू० ३।१।१२४

इत्यपवादशास्त्रेण 'तव्यत्तव्यानीयरः[१]' इत्युत्सर्गशास्त्रस्य वैकल्पिको बाधः स्वीक्रियते। तस्मात् कृधातोर्ण्यति 'कार्यम्' इत्यपवादशास्त्रस्योदाहरणम्, कर्त्तव्यम्, करणीयम् इत्यादि च सामान्यशास्त्रस्येत्युभयोः शास्त्रयोः समावेश एकत्र प्रसिध्यति। यदि उत्सर्गशास्त्रेण 'धातोरि[२]' ति सूत्राधिकारविहितसामान्यशास्त्रस्य नित्यतेव बाधः स्यात्तदा कार्यमित्येव व्यवह्रियेत, लोके न तु कर्त्तव्यम्, करणीयमिति। तस्मात् स्त्र्यधिकारविहितप्रत्ययं परित्यज्य धातोरित्यधिकारविहितप्रत्ययेष्वपवादशास्त्रं सामान्यशास्त्रमपि समनुगृह्णाति। किन्तु 'स्त्रियां क्तिन्[३]' इत्यादि सामान्यशास्त्रविहितक्तिन्प्रभृतिप्रत्ययास्तुतत्तद्विशेषशास्त्रेण नित्यमेव बाध्यन्ते। अत एव 'चिकीर्षा, जिहीर्षा' इत्यत्र प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्यय एव 'अप्रत्यात्[४]' इति विशेषसूत्रेण दृश्यते, न तु क्तिन् प्रत्ययोऽपि। अतः 'चिकीर्षतिः, जिहीर्षतिरि' त्यादिप्रयोगाणामनभिष्पत्तौ लोके व्यवहाराभाव एव कारणमिति ज्ञेयम्। अत्र 'वाऽसरूपोऽस्त्रियामि[५]' ति सूत्रेऽसरूपपदेनानुबन्धकृतमसारूप्यं न गृह्यते। अत एव पूर्वोक्तभाष्योदहारणे 'कर्मण्यण्[६]' इति सामान्यसूत्रस्य 'गोदः, कम्बलद' इत्यादौ 'आतोऽनुपसर्गे क[७]' इति विशेषशास्त्रविहितकप्रत्ययेन अण् प्रत्ययस्य नित्यमेव बाधो भवति। यतो हि अनुबन्धविनिर्मुक्तयोः सतोः 'क' अण् इत्युभयोः प्रत्यययोः सारूप्यमेव दृश्यते न तु वैरूप्यमिति। तस्मादपवादशास्त्रस्य वैकल्पिकप्रवृत्तौ कार्यम्, करणीयम्, कर्त्तव्यमित्यादीन्युदाहरणानि सूत्रस्यास्य बोध्यानि। अत्र धातुविहितप्रत्ययेषु 'अनुबन्धकृतमसारूप्यं न स्वीक्रियते' इत्यत्र 'ददः, दायः, दधः, धाय' इत्येतान् प्रयोगानभिलक्ष्य महर्षिपाणिनेः 'ददातिदधात्योर्विभाषा[८]' इति सूत्रेण वैकल्पिकं शविधानमेव प्रमाणमस्ति। यदि अनुबन्धेनापि असारूप्यं स्यात्तदा वाऽसरूपोऽस्त्रियामिति नियमेनैवात्रापि वक्ष्यमाणश्याद्व्यधेति सामान्यसूत्रस्य ददातिदधात्योरित्यपवादशास्त्रेण वैकल्पिको बाधः सम्भवेदेव। ततः पुनः सूत्रे विभाषाग्रहणं नानुबन्धकृतमसारूप्यमिति सिद्धान्तं प्रसाध्य स्वांशे साफल्यमनुभवति।

शब्दानुशासनशास्त्रस्य प्रवृत्ति र्हि यथालक्ष्यं भवति। ततश्च यथा सामान्यशास्त्रविहितविधेर्विशेषशास्त्रविहितविधिनापवादो दृश्यते, तथैव

---

१. पा० सू० ३।१।९६
२ पा० सू० ३।१।९१
३. पा० सू० ३।३।९४
४. पा० सू० ३।३।१०२
५ पा० सू० ३।१।९४
६. पा० सू० ३।२।१
७. पा० सू० ३।२।३
८. पा० सू० ३।१।१३९
९. पा० सू० १।१।४१

लक्ष्यमभिलक्ष्यापवादशास्त्रनियमस्य क्वचिन्निषेधोऽपि स्वीक्रियते । तत्र तावदस्य प्रकृतस्य वाऽसरूपोऽस्त्रियामिति नियमस्य प्रतिषेधरूपेण 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति' 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति' 'लादेशेषु वाऽसरूपविधिर्नास्ति' इति परिभाषात्रयं स्वीकृतमस्ति। तदुदाहरणानि चेह यथाक्रमम् उपस्थाप्यन्ते । तत्र कर्ता, कटानित्यत्र 'ण्वुल्तृचावि[1]'ति सामान्यसूत्रं प्रबाध्य 'तृन्[2]' इति विशेषशास्त्रस्य प्रवृत्तिर्भवति । यदि चात्रापि वाऽसरूपविधिः स्यात्तदा कारकः, कटान् इत्यपि व्यवह्रियते, किन्तु क्तार्थे तथा व्यवहारो न जायते । तस्मात् 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ती'ति नियमः शब्दानुशासने प्रवर्तते । एवं ताच्छीलिकेषु प्रत्ययेषु वाऽसरूपविधेरप्रवृत्तावपि छात्रस्य हसितम्, हसनञ्चेत्यादौ ताच्छील्याभावे 'भावे[3]' इति सामान्यसूत्रविहितासरूपो घञ्-प्रत्ययोऽपि प्राप्नोति । इच्छति भोक्तमित्यत्र च असरूपौ लिङ्लोटौ; तथा इषत्पानः सोमो भवता इत्यत्र खल् प्रत्ययोऽपि स्यात् । तद्वारणार्थमेव 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ती'ति प्रतिषेधोऽपि जागर्ति। तथा श्वः पक्तेत्यत्र 'अनद्यतने लुट्[4]' इति विशेषशास्त्रेण 'लृट् शेषे च[5]' इति सामान्यसूत्रस्य वैकल्पिको बाधः प्राप्तः, तन्निवारणार्थञ्च 'लादेशेषु वाऽसरूपविधि र्नास्ति' इति तृतीयप्रतिषेधरूपपरिभाषा वाऽसरूपोऽस्त्रियामिति नियमं प्रतिषेधति। सर्वेष्वेषु प्रतिषेधनियमेषु महर्षिपाणिनेः सूत्राण्यपि प्रामाण्यरूपेणोपतिष्ठन्ते, तानि च यथावसरं निबन्धेस्मिन् व्याख्यास्यामः ।

तदित्थमिह महाभाष्यपरिभाषेन्दुशेखरादिग्रन्थेषु प्रसिद्धापवादशास्त्रप्रवत्तिप्रकारा विवेचिताः। एनानेवापवादशास्त्रप्रवृत्तिप्रकारान् पुरस्कृत्य सर्वेषां सामान्यविशेषसूत्राणां यथालक्ष्यं प्रवृत्ति निवृत्ति र्वा भवति। एतत् सर्वमाधारीकृत्य यथाधिकारसूत्रमुत्सर्गापवादशास्त्राणां विवेचनं प्रस्तूयते ।

इति प्रथमो विमर्शः

---

१. पा० सू० ३।१।१३३
२. पा० सू० ३।२।१३५
३. पा० सू० ३।३।१८
४. पा० सू० ३।३।१५
५. पा० सू० ३।३।१३

द्वितीयो विमर्शः

एकः पूर्वपरयोरित्यधिकारस्थगुणशास्त्रविवेचनम्

तत्र तावत् संज्ञासूत्रेषु माङ्गलिक आचार्यो महर्षि पाणिनिः यद्यपि 'वृद्धिरादैच्'[1] इति प्रथमं सूत्रं तदनु 'अदेङ् गुणः'[2] इति संज्ञासूत्रञ्चोपात्तवान्, तथापि यत्र गुणवृद्ध्योर्विधानमस्ति तत्र 'आद्गुण'[3] इति सूत्रादनन्तरमेव 'वृद्धिरेचि'[4] इति वृद्धिशास्त्रस्य सन्निवेशो कृतः। अत एव मयाप्यत्र गुणशास्त्रमेवादौ विविच्यते। वस्तुतः 'अदेङ् गुण' इति सूत्रेण येषां वर्णानां गुणसंज्ञा विधीयते ते किल वर्णसमाम्नायेऽपि प्रथममुपात्ताः सन्ति, तदनु च वृद्धिसंज्ञका वर्णाः समायान्ति। तस्मादपि कारणाद् गुणविधेरनन्तरं वृद्धिविधेः सन्निवेशो युज्यते। 'वृद्धिरादैच्' इति संज्ञासूत्रस्य 'अदेङ् गुण' इति सूत्रात्प्रथमोपादाने तु मङ्गलमेव बीजम्। अत एवोद्देश्यविधेयभावक्रमस्यापि परित्यागस्तत्र शोभनं प्रतिभाति। तथा चोक्तं कात्यायनेन मुनिना—'वृद्धिरादैजिति मङ्गलार्थमिति'। व्याख्यातञ्चैतत् महाभाष्यकारेण 'एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषकाणि भवन्त्यायुष्मत् पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा 'आद् गुण' इति यथेति'[5]।

किञ्च लोकेऽपि सत्वादिगुणानामुपस्थितावेव वृद्धिर्दृश्यते। न हि गुणमन्तरेण वृद्धिः कुत्राप्युपलभ्यते। तस्मात् प्रथमं गुणसम्बन्ध्युत्सर्गापवादशास्त्राणामत्र विवेचनं क्रियते। तत्र तावच्छब्दानुशासनस्य सर्वेऽपि विषयः किमप्यधिकारसूत्रमाधारीकृत्यैव प्रवर्तन्ते। नेह विनाधिकारं प्रवृत्तिः कस्यापि विधेर्लभ्यते। अतो गुणशास्त्रप्रवृत्तिरपि द्विविधस्याधिकारसूत्रस्याध्यक्षे परिलक्षिता भवति। तत्र तावत् 'एकः पूर्वपरयोरि[6]'त्यधिकारे अच्सन्धिरूपकार्याणि जायन्ते। 'संहितायाम्[7]' इत्यधिकारसूत्रमपि

---

१. पा० सू० १।१।१
२. पा० सू० १।१।२
३. पा० सू० ६।१।८७
४. पा० सू० ६।१।८८
५. महाभाष्यम् १।१।१
६. पा० सू० ६।१।८४
७. पा० सू० ६।१।७२

तत्रापेक्षितमस्ति, सोऽधिकारश्च सामान्यतोऽज्झलादिसर्वविधकार्येषु प्रवर्तते। एष किल पूर्वपरयोरेकादेशरूपोऽधिकारस्त्वच्सन्धिमात्रमेव व्याप्नोति। अस्मिन्नधिकारे प्रस्तुत 'आद्गुण' इत्युत्सर्गयोगः कृष्णर्द्धिः, उपेन्द्रः, गङ्गोदकमित्यत्र प्रवर्तते। एतान्युदाहणानि 'अदेङ्गुण' इति शास्त्रबोध्यगुणसंज्ञकानाम् अ, ए, ओ इत्यक्षराणामाद्गुण इति सूत्रविधेयानां यथाक्रमं वर्तन्ते। एतस्य गुणस्यापवादः पूर्वन्तावत् दीर्घविधिः, तदनु वृद्धिविधिश्चेत्युभौ स्तः। तद्यथा दैत्यारिरित्यत्र दैत्य अरिरिति विग्रहे 'आद्गुण' इति सामान्यशास्त्रेण पूर्वपरयोरेकादेशोऽकारगुणः प्राप्नोति, किन्तु सवर्णेऽचि दीर्घ एव भवति, व्याप्यत्वात्, यतो हि 'आद्गुण' इति शास्त्रं सामान्येऽचि प्रवर्तते। 'अकः सवर्णे दीर्घः'[1] इति तु विशेषरूपेण सवर्णेऽचि प्रवर्तते, तस्मात् विशेषशास्त्रेण सामाम्यशास्त्रस्य बाध इष्टः।

एवं कृष्णैकत्वम्, गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठ्यमित्यत्रापि अवर्णादचि सामान्यरूपेण विधीयमानगुणस्यास्य 'वृद्धिरेचि' इत्यपवादशास्त्रेण बाधो जायते।

एवमेव 'प्रष्ठ ऊहः प्रष्ठौहः' इत्यत्रास्य गुणस्य 'एत्येधत्यूठ्सु[2]' इत्यपवादशास्त्रमस्ति। किञ्च 'उपऋच्छति' इत्यत्रापि सामान्यगुणस्य 'उपसर्गादृति धातौ[3]' इति विशेषवृद्धिविधिनापवादो भवति। तेन प्रार्च्छतीत्येव प्रयुज्यते लोके न तु प्रर्च्छतीति। अवर्णादजादिनामधातुपरे तु 'प्रार्षभीयति–प्रर्षभीयति' इत्युभयं व्यह्रियते, तस्मात् 'वाऽसुप्यापिशलेरि[4]'-ति वैकल्पिकमपवादशास्त्रं तत्रोपतिष्ठते। भिन्द्युः, छिन्द्युरित्यादौ 'भन्द्या उस्, छिन्द्या उस्, इत्यवस्थायां गुणमपवाद्य 'उस्यपदान्तात्[5]' इति सूत्रेण पररूपं विधीयते। ततश्च गुणापवादत्वेन पररूपस्यापि सङ्ग्रहो बोध्यः।

तदित्थम् 'आद्गुण' इत्युत्सर्गस्यापवादशास्त्राणि क्रमशः व्याख्यातानि। एवं वार्तिकान्यपि गुणस्यापवादरूपेण कानिचित् सन्ति, तान्यपीहोपन्यस्यन्ते। तद्यथा अक्षौहिणीत्यत्र 'अक्षादूहिन्यामुपसंख्यानाम्[6]' इति वार्तिकेन गुणं प्रबाध्य वृद्धिर्भवति। तथा 'स्वैर' इत्यादौ 'स्वादीरेरिणोरि[7]'-त्यनेनाप्यपवादत्वात् गुणस्य बाधो दृश्यते। एवं प्रौह' इत्यदौ 'प्रादूहोढोढ्येषैष्येषु[8]' इति वार्तिकं, 'सुखार्त' इत्यत्र च 'ऋते च तृतीया

१. पा० सू० ६।१।१०१
२. पा० सू० ६।१।८९
३. पा० सू० ६।१।९१
४. पा० सू० ६।१।९२
५. पा० सू० ६।१।९३
६. पा० सू० वा० ६।१।८९
७. पा० सू० वा० ६।१।८९
८. पा० सू० वा० ६।१।८९

समासे[1]' इति वार्तिकं, तथा 'प्रार्णम्, वत्सतरार्णमित्यादौ 'प्रवत्सतरकम्बलवसनार्णदशानामृणे[2]' इति वार्तिकञ्चैतानि गुणापवादरूपेण यथालक्ष्यमनुप्रवर्तन्ते । तदेवमाद्गुण इत्युत्सर्गशास्त्रस्यापवादशास्त्राणीह विवेचितानि । एषां वर्गीकरणञ्चैवं ज्ञेयम् ।

'आद्गुण' इत्युत्सर्गशास्त्रम् ।

उत्सर्गशास्त्रम्	उदाहरणानि
आद्गुणः	कृष्णर्द्धि, उपेन्द्रः, गङ्गोदकम्

तदपवादशास्त्राणि

अपवादशास्त्रम्	उदाहरणानि
१. अकः सवर्णे दीर्घः	दैत्यारिः
२. वृद्धिरेचि	कृष्णैकत्वम्, गङ्गौघः, देवैश्वर्यम, कृष्णौत्कण्ठ्यम्
३. एत्येधत्यूठ्सु	प्रष्ठौहः
४. उपसर्गादृति धातौ	उपार्च्छति
५. वासुप्यापिशलेः (वैकल्पिकापवादशास्त्रम्)	प्रार्षभीयति, प्रर्षभीयति
६. उस्यपदान्तात्	भिन्द्युः, छिन्द्युः

अथ गुणापवादभूतानि वार्तिकानि

१. अक्षादूहिन्यामुपसंख्यानम्	अक्षौहिणी
२. स्वादीरेरिणोः	स्वैरः
३. प्रादूहोढोढ्येषैष्येषु	प्रौहः
४. ऋते च तृतीया समासे	सुखार्तः
५. प्रवत्सतरकम्बलवसनार्णदशानामृणे	प्रार्णम्, वत्सतरार्णम्

अत्र चत्वार्यपवादसूत्राणि पञ्चवार्तिकानि च परिगणितानि सन्ति । एषां लक्ष्याणि परित्यज्यैवाद्गुण इत्युत्सर्गशास्त्रं प्रवर्तत इति बोध्यम् ।

अथाङ्गाधिकारस्थगुणविधायकोत्सर्गापवादशास्त्रविवेचनम्

अङ्गाधिकारस्थगुणविधेरुत्सर्गापवादशास्त्राणि चैवं प्रतिभान्ति । तत्राङ्गस्य गुणविधायकेषु शास्त्रेषु 'इको गुणवृद्धी[3]' इति परिभाषाशास्त्रेण

१. पा० सू० वा० ६।१।८९
२. पा० सू० वा० ६।१।८९
३. पा० सू० १।१।३

इक इति षष्ठ्यन्तपदस्योपस्थितिर्भवति। तत'श्चेगन्ताङ्गस्य गुण' इति विशेष्यविशेषणभावसम्पादिततदन्तविधिना सूत्रार्थः सम्पद्यते। तद्यथा 'सार्वधातुकार्धधातुकयोः[1]' इति सामान्यसूत्रेण 'भू अ ति, इत्यत्रेगन्ताङ्गस्य गुणे कृते भवतीतिरूपं सिध्यति। अत्र यदि गुणो न स्यात्तदा 'इको यणची[2]' ति सामान्यसूत्रेण यणेव प्रवर्तेत। अतो यण्शास्त्रस्येहापवादभूतं 'सार्वधातुकार्धधातुकयोरिति' सूत्रं विद्यते। कुरुत इत्यादावपित्सार्वधातुकत्वेन तसो ङित्वात् 'क्ङिति चेति[3]' सूत्रेण गुणः प्रतिषिध्यते, अतो गुणापवादशास्त्रमेतदिति ज्ञेयम्। एवमभूत्, असूदित्यत्रास्य गुणस्य निषेधरूपापवादशास्त्रमस्ति भूसुवोस्तिङि[4]' इति। तथा दीध्याञ्चक्रे, वीव्याञ्चक्रे, आदीध्यनम्, आवेव्यनम्, इत्यादावस्य गुणस्यापवादभूतं 'दीधीवेवीटामि[5]'-ति शास्त्रं जागरूकमस्ति।

तदित्थं 'सार्वधातुकार्धधातुकयोरि'-ति सूत्रस्य सामान्यविशेषभावो विवेचितः।

अजुहवुः, अबिभयुरित्यादौ पिद्भिन्नं सार्वधातुकं ङिद्भवतीत्यर्थकेन 'सार्वधातुकमपित्[6]' इत्यनुशासनेन ङित्वात् पूर्वोक्तगुणविधेः 'क्ङिति चे[6]-ति सूत्रेण प्रतिषेधे सति 'जुसि च[7]'-ति गुणविधायकं विशेषशास्त्रमारभ्यते, ततश्च ङित्वेऽपीह गुणो भवति। 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीत्यपवादलक्षणमत्र सङ्घटते, यतो हि क्ङिति चेति प्रतिषेधरूपसामान्यशास्त्रस्य अजुहवुरित्यादाववश्यप्राप्तावेव जुसि चेति विशेषविधिरारभ्यते, तेनैषो गुणविधिरपवादत्वात्प्रबलः। 'चिनुयुः' 'सुनुयु'रित्यत्र विधिलिङि तु जुसि चेति विशेषशास्त्रस्य प्राबल्यं नास्ति, यतो ह्यवश्यप्राप्ते सार्वधातुकाश्रयङित्वनिमित्ते प्रतिषेधे जुसि चेति विशेषशास्त्रमारभ्यते। अतः सार्वधातुकाश्रयङित्व एवास्य विशेषगुणस्य प्रतिषेधशास्त्रं प्रबाध्य प्रवृत्ति र्भवत्यपवादत्वात्। चिनुयुरित्यत्र तु सार्वधातुकाश्रयङित्वं या सुडाश्रयङित्वञ्चेति द्विविधम्। ततश्च सार्वधातुकाश्रयङित्वनिमित्तो जुसि चेति शास्त्रस्य प्रवृत्तावपि यासुडाश्रयङित्वनिमित्तगुणनिषेधस्य क्ङिति चेति शास्त्रस्य जुसि चेति शास्त्रेण बाधो न भवति, अपवादत्वाभावात्। यतो हि चिनुयुः सुनुयुरित्यादौ सार्वधातुकाश्रयङित्वमादायैव गुणनिषेधो न

१. पा० सू० ७।३।८४
२. पा० सू० ७।३।८८
३. पा० सू० १।२।४
४. पा० सू० ७।३।८३
५. पा० सू० १।१।५
६. पा० सू० १।१।६
७. पा० सू० १।१।५

भवति, अपि तु यासुडाश्रयङित्वनिमित्तमाश्रित्यापि गुणनिषेधो भवति। ततश्च यासुडाश्रयङित्वनिमित्तगुणप्रतिषेधे जुसि चेति विशेषशास्त्रस्यारभ्यमाणत्वाभावाद् अपवादत्वं नास्तीति भावः। तथा चोक्तं काशिकावृत्तौ—'अत्र द्वे ङित्वे सार्वधातुकाश्रयं यासुडाश्रयञ्च, तत्र नाप्राप्ते सार्वधातुकाश्रयङित्वनिमित्तेप्रतिषेधे जुसि गुणारभ्यमाणस्तमेव बाधते। तत्र हि प्राप्ते चाप्राप्ते चारभ्यत इति[१]।' तदेवमङ्गाधिकारस्थपूर्वोक्तसूत्रद्वयेनेगन्तस्याङ्गस्य गुणो निष्पाद्यते। किन्तु ह्लेपयति, क्नोपयति, भेदनम्, छेदनम्, भेत्ता, छेत्तेत्यादौ च पुगन्तस्याङ्गस्येको लघूपधस्येको गुणो दृश्यते, तदर्थं 'पुगन्तलघूपधस्य चे[२]'-ति सामान्यशास्त्रं प्रवर्तते। अस्यापि क्ङिति चेति प्रतिषेधरूपापवादशास्त्रं विद्यते। तेन भिन्नः, छिन्नः, भिद्यात् इत्यादौ लघूपधस्य गुणस्य निषेधो भवति। तथा भवितेत्यत्राप्यस्य लघूपधगुणस्य प्रतिषेधकः पूर्वोक्तो 'दीधीवेवीटाम्' इति योगो बोध्यः, मिद्धातोः श्यनि मेद्यति, मेद्यते इत्यत्र तु शित्वस्य ङित्वेऽपि 'मिदेर्गुणः[३]' इति विशेषशास्त्रेण क्ङिति चेति प्रतिषेधस्याप्यपवादो भवति, निरवकाशविधेरपवादत्वात्। यतो हि यदि ङित्वादत्रापि गुणनिषेधः स्यात्तदा मिदेर्गुण इति शास्त्रं व्यर्थमेव भवेत्। तस्मात् मेद्यति, मेद्यते इत्यादि लक्ष्यमभिलक्ष्य मिदेर्गुण इति शास्त्रेण मिदेरङ्गस्येको गुणः प्रतिषेधस्थलेऽपि विशेषरूपेण विधीयते।

एवं नेनेक्ति, वेवेक्ति, वेवेष्टि इत्यत्र 'निजां त्रयाणां गुणः श्लौ[४]' इति विशेषानुशासनेन अभ्यासस्य गुणो भवति। अस्य किमप्यपवादशास्त्रं नास्ति। 'नाभ्यस्तस्याचि' पिति सार्वधातुके[५]' इत्यपवादशास्त्रन्तु अभ्यस्तसंज्ञकस्याङ्गस्य लघूपधस्यैवाजादौ पिति सार्वधातुके गुणं प्रतिषेधति, न तु प्रकृताभ्यासगुणस्य। तेन नेनिजानि अनेनिजमित्यादौ अभ्यासस्य गुणो भवत्येव।

जागरितः, जागरितवान् इत्यत्र कित्वविषये क्ङिति चेति गुणप्रतिषेधस्यापवादशास्त्रं 'जाग्रोऽविचिण्णल्ङित्सु[६]' इति जागर्ति।

---

१. काशिका सू० ७।३।८३
२. पा० सू० ७।३।८६
३. पा० सू० ७।३।८२
४. पा० सू० ७।४।७५
५. पा० सू० ७।३।८७
६. पा० सू० ७।३।८५

किञ्च सृधातोर्लुङि 'सर्तिशास्त्यर्तिभ्यश्च[१]' इति सूत्रेण च्लेरङ्गादेशे तस्य ङित्वेऽपि सति 'ऋदृशोऽङि गुणः[२]' इति विशेषशात्रेणाङि गुणो विधीयते। तेन 'असरत्' एवम'दर्शदित्यत्रापि क्ङिति चेति सामान्यगुण-प्रतिषेधशास्त्रस्यापवादभूतम् 'ऋदृशोऽङि गुणः' इति शास्त्रं स्वीक्रियते। असरत् इत्यत्र इगन्ताङ्गस्य गुणस्य प्रतिषेधरूपेण क्ङिति चेति सूत्रं प्राव-र्तत। अदर्शत इत्यत्र तु प्रेक्षणार्थकाद् दृशिर्धातोर्लुङि 'इरितो वा[३]' इति सूत्रेण च्लेरङादेशे सति लघूपधगुणस्य प्रतिषेधः प्राप्तः। तयोरुभयोर्गुणयोः प्रतिषेधस्यापवादशास्त्रमिदम् 'ऋदृशोऽङि गुण' इति गुणप्रतिप्रसवरूपेणपा त्रोपतिष्ठते।

एवं शेते शयात इत्यादावपि 'शीङः सार्वधातुके गुण[४]' इति शास्त्रमपि गुणप्रतिषेधापवादरूपेण समायाति।

'ऋतश्च संयोगादेर्गुण[५]' इति विशेषशास्त्रेण जह्वरतुः जह्वरुरित्यादौ गुणो भवति। अत्रापि 'असंयोगाल्लिट् कित्[६]' इति शास्त्रेण संयोगात्परो लिट् किद्भवति इति किद्विधानात् गुणप्रतिषेधः प्राप्नोति, तं प्रतिषेधं प्रबाध्यानेन गुणो विधीयते। ततश्च प्रतिषेधविषयेऽपि गुणो यथा भवेदित्यर्थं सूत्रस्यारम्भो जातः। आरम्भसामर्थ्याच्चापवादत्वं सुतरां सिद्धम्। जह्वार इत्यत्राकित्स्थलेऽपि विशेषशास्त्रेणानेन गुणे कृते सति उपधावृद्धि-र्भवति, यतो हि 'अत उपधायाः'[७]' इति वृद्धेरस्य गुणस्य परत्वमस्ति। ततश्च पूर्वात्परं शास्त्रं बलवदिति नियमात् पूर्वं गुणः ततश्चोपधावृद्धि-रिति सिद्धान्तकौमुदीकारस्य नवीना पद्धतिः। तथा चोक्तमस्ति—किदर्थ-मपीदं परत्वाण्णल्यपि भवति[८]' रपरत्वम्। उपधावृद्धिः, जह्वार जह्वरतुरित्यादि।

काशिकावृत्तौ तु—'प्रतिषेधविषयेऽपि गुणो यथा स्यादित्ययमारम्भः। वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते-सस्वार, सस्मार'[९] इत्युक्तम्।

---

१. पा० सू० ३।१।५६
२. पा० सू० ७।४।१६
३. पा० सू० ३।१।५७
४. पा० सू० ७।४।२१
५. पा० सू० ७।४।१०
६. पा० सू० १।२।५
७. पा० सू० ७।२।११५
८. सिद्धान्तकौमुदी भ्वादिप्रकरणम्।
९. काशिका सू० ७।४।१०

वस्तुतस्तु पूर्वविप्रतिषेधकल्पनापेक्षया परत्वाद्गुणे कृते सति उपधावृद्धिरेवात्रोपयुक्ता भाति। तस्मात् 'ऋतश्च संयोगादेर्गुण' इति शास्त्रमकिद्विषये परत्वात्, किद्विषये त्वपवादत्वाद् बलवदिति बोध्यम्।

एवम् ऋच्छधातोर्लिटि आनर्च्छ, आनर्च्छतुः, आरुः, निचकार, निचकरतुरित्यादौ लिटि गुणो दृश्यते। तत्र ऋच्छधातोर्लिटः कित्वन्तु न भवति संयोगात्परत्वात्। कित्वविधायकशास्त्रं हि 'असंयोगाल्लिट् कित्' इति प्रसिद्धम्। लघूपधत्वाभावादत्र गुणो न प्राप्नोति, गुणश्चात्रेष्टः, तदर्थम् 'ऋच्छत्यृताम्[1]' इति सूत्रेणानर्च्छ, आनर्च्छतुरित्यत्र गुणो विधीयते। ऋधातोर्लिटि आरतु, आरुरित्यादौ तु कित्वाद् गुणनिषेधः प्राप्तः तं प्रबाध्यानेन गुणो विधीयते। न्युपसर्गात्क्रुविक्षेपे इत्यस्माद्धातोर्निचकरतुः, निचकरुरित्यत्रापि प्रतिषेधविषये सूत्रमेतदपवादत्वात् प्रवर्तते।

एवमर्यते, अर्यात्, स्मर्यते, स्मर्यादित्यादौ यकि कित्वे, लङि ङित्वे च गुणो दृश्यते, तदर्थं 'गुणोऽर्तिसंयोगाद्योः[2]' इति विशेषशास्त्रं प्रवर्तते ग्क्ङिति चेति निषेधशास्त्रबाधनार्थम्। अपि च अरार्यते अर्रति इत्यादौ यङ्यिङ्लुकि च गुण विधानार्थं यङि चेति विशेषशास्त्रं स्वीक्रियते, ततश्च ङित्वमादायात्र गुण निषेधो न भवति। एवं रोरुच्यते मोमुदीति, प्रभृतिषु यङि यङ्लुकि चाभ्यासस्य गुणसिद्धये 'गुणोयङ्लुकोः' इति विशेषशास्त्रं प्रवर्त्तते।

मोक्षते मुमुक्षते वा वत्सः स्वयमेव अत्र मुच्धातोः सनि, द्वित्वे, हलादिशेषे सति इक्समीपाद्धलः परः झलादिः सन् किद्भवतीत्यर्थकेन 'हलन्ताच्च[3]' इति सूत्रेण कित्वे ग्क्ङिति चेति निषेधोऽत्रापि प्राप्नोति सामान्यतः। तं प्रबाध्य 'मुचोऽकर्मकस्य गुणो वा[4]' इति विशेषशास्त्रेण वैकल्पिको गुणो विधीयते। ततश्च यत्र गुणः, तत्रैव 'अत्र लोपोऽभ्यासस्य[5]' इति सूत्रेणाभ्यासलोपे सति मोक्षते इति पदं सिध्यति। यत्र च गुणाभावः तत्राभ्यासलोपोऽपि न भवति, तेन 'मुमुक्षते वत्सः स्वयमेवे'ति वाक्ये मुमुक्षते इति पदमपि साध्वेव।

ऊर्णुञ् आच्छादने इत्यस्माद्धातोर्लङि तिपि और्णोत् इति रूपं व्यवह्रियते, तत्र सामान्येन सार्वधातुकार्धधातुकयोरिति सूत्रेण गुणः

१. पा० सू० ७।४।११
२. पा० सू० ७।४।२९
३. पा० सू० १।२।१०
४. पा० सू० ७।४।५७
५. पा० सू० ७।४।५८

प्राप्नोति। तं प्रबाध्य 'ऊर्णोतेर्विभाषा[१]' इति विशेषसूत्रेणोर्णौति ऊर्णोति इत्यत्र यथा वैकल्पिकवृद्धिर्विधीयते, तथैव और्णोत् इत्यत्रापि वैकल्पिकवृद्ध्या और्णौत्, पक्षे गुणे और्णोत् इति रूपं भवितुमर्हति, किन्तु 'गुणोऽपृक्ते[२]' इति ततोऽपि विशेषसूत्रेण वृद्ध्यपवादोऽत्र जातः। यतो हि 'ऊर्णोतेर्विभाषा' इति शास्त्रेण हलादौ पिति सार्वधातुके वृद्धिर्विधीयते। 'गुणोऽपृक्ते' इति शास्त्रेण चापृक्ते हलादौ पिति सार्वधातुके गुणो विधीयते, ततश्च उद्देश्यतावच्छेदकधर्मयो र्व्याप्यव्यापकभावेन सामान्यविशेषभाव एतयोः सुस्पष्टो विभाति। अतो व्याप्यशास्त्रेण व्यापकशास्त्रस्य, विशेषशास्त्रेण सामान्यशास्त्रस्य वा बाधरूपापवादोऽत्रापि सिद्धः।

तदेवमङ्गाधिकारस्थधातुविहितप्रत्ययनिमित्तमाश्रित्य प्रवर्तमानगुणसम्बन्ध्युत्सर्गापवादशास्त्राणीह विवेचितानि।

एतदनु सुबन्तात्प्रातिपदिकाच्च विहितप्रत्ययनिमित्तमवलम्ब्य प्रवर्त्तमाना अङ्गाधिकारस्थगुणविषयो विविच्यन्ते। तत्र तावद्माधव्यः बाभ्रव्यः, इत्यादौ मधोर्गोत्रापत्ये बभ्रोर्गोत्रापत्ये च 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः[३]' इति सूत्रेण यञि प्रत्यये सत्यादिवृद्धौ 'माधु य बाभ्रु य इत्यवस्थायाम् 'ओर्गुण[४]' इति सूत्रेण तद्धितप्रत्यये परे भसंज्ञकस्याङ्गस्य गुणो भवतीत्यर्थकेनाऽत्रगुणो विधीयते। यद्यप्यस्य गुणस्यात्र यति प्रत्यये परतः केनापि शास्त्रेण सह बाध्यबाधकभावो न दृश्यते, तथापि बाहौ बाही च परस्परं गृहीत्वेदं युद्धं प्रवृत्तमिति विग्रहे, समासे जाते 'इच् कर्मव्यतिहारे[५]' इति शास्त्रेण समासान्त इचि प्रत्यये सति 'बाहु बाहु इ' इत्यवस्थायां सामान्यतो यण् प्राप्नोति, तं प्रबाध्य 'ओर्गुण' इति सूत्रेण गुणो विधीयते। तेन 'बाहूबाहवि' इति सिध्यति।

एवं सुप्प्रत्ययघटकङित्वादिकं निमित्तमादाय 'ऋतो ङिसर्वनामस्थानयोः[६]' 'जसि च[७]' 'घेर्ङिति[८]' 'ह्रस्वस्य गुण[९]' इति चत्वारि सूत्राणि प्रवर्तन्ते। तद्यथा धातरि इत्यत्र धातृ ङि इत्यवस्थायाम् 'इको यणचि[१०]' इति सामान्यशास्त्रविहितं यणमपवाद्य गुणविधायकम् ऋतो ङिसर्वनामस्थानयोरिति विशेषशास्त्रं प्रवर्तते। तथा धातारौ धातार इत्यादौ सर्वनामस्थान-

१. पा० सू० ७।३।९०
२. पा० सू० ७।३।९१
३. पा० सू० ४।१।१०६
४ पा० सू० ६।४।१४६
५. पा० सू० ५।४।१२७
६. पा० सू० ७।३।११०
७. पा० सू० ७।३।१०९
८. पा० सू० ७।३।१११
९. पा० सू० ७।३।१०८
१०. पा० सू० ६।१।७७

स्थलेऽपि यण्शास्त्रं प्रबाध्य प्रवर्तमानं 'प्रथमयोः पूर्वसवर्ण[1]' इति विशेष-शास्त्रमपि 'ऋतो ङिसर्वनामस्थानयोरि' ति शास्त्रेण बाध्यते ततोऽपि विशेषत्वात्। यतो हि अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः 'प्रथमयोः पूर्वसवर्ण' इति शास्त्रेण विधीयते। एतद्गुणशास्त्रन्तु ऋदन्ताङ्गस्य केवलस्य ङौ सर्वनामस्थाने च प्रवर्तते, तस्मात् गुणशास्त्रमिदं पूर्वसवर्णदीर्घाद् व्याप्यमित्यपवादबीजमिह सुनिश्चितम्।

हरयः, भानव इत्यादौ च 'जसि चेति' शास्त्रेण ह्रस्वान्तस्याङ्गस्य गुणः स्वीक्रियते। अत्रापि पूर्ववत् यदि गुणो न स्यात्तर्हि पूर्वसवर्णदीर्घ एव प्रवर्तेत, तस्मात् पूर्वसवर्णदीर्घमपवाद्य गुणोऽनेन विधीयते।

तथा हरये हरेरित्यादौ 'हरि ङे, हरि ङसि, हरि ङस् वेति स्थिते यण्शास्त्रमपवाद्य 'घेर्ङिति' इति विशेषशास्त्रेण गुणो विधीयते, तदप्राप्तियोग्ये गुणस्यास्य चारितार्थ्याभावात्।

ह्रस्वान्तस्याङ्गस्य सम्बुद्धौ हे हरे, हे विष्णो इत्यादौ गुणस्तु 'ह्रस्वस्य गुणः' इति शास्त्रेण सम्पाद्यते। अयं गुणविधिः कमपि प्राप्तविधिमपवाद्य नेहोपतिष्ठते, अपि तु स्वातन्त्र्येण लक्ष्यमभिलक्ष्य प्रवर्तते। अस्या प्रवृत्तिस्तु सम्बुद्धेर्लुकि सति न भवति। यथा 'स्वमोर्नपुंसकात्[2]' इति विशेषशास्त्रेण 'हे वारि' इत्यत्र तल्लुकि सति गुणो न दृश्यते। शास्त्रेषु हे वारि, हे वारे, इत्युभयविधव्यवहारमभिलक्ष्य शब्दानुशासने 'न लुमताङ्गस्य[3]' इति निषेधविधेरनित्यत्वमपि स्वीक्रियते शाब्दिकैः। अतो निषेधविधेरनित्यत्वपक्षे गुणस्यास्य प्रवृत्तिरिति मतम्।

तथा चेहाङ्गाधिकारस्थगुणविधायकोत्सर्गापवादशास्त्राणां परिचयश्चैवं ज्ञेयः।

सूत्राणि	उदाहरणानि
सार्वधातुकार्धधातुकयोः (उत्सर्गशास्त्रम्)	भवति
एतदपवादशास्त्राणि	
'क्ङिति च'	
'भूसुवोस्तिङि'	
दीधीवेवीटाम्'	
जुसि च (क्ङिति चेत्यस्यापवादः)	अजुहवुः, अबिभयुः
पुगन्तलघूपधस्य च (उत्सर्गशास्त्रम्)	भेत्ता, छेत्ता

१. पा० सू० ६।१।१०२
२. पा० सू० ७।१।२३
३. पा० सू० १।१।६२

एतदपवादसूत्राणि **उदाहरणानि**

'क्क्ङिति च' 'दीधीवेवीटाम्'

'नाभ्यस्तस्याचि पिति सार्वधातुके'

जाग्रोऽविचिण्णल्ङित्सु (क्क्ङिति चेत्यस्यापवादः) जागरितः, जागरितवान्

ऋदृशोऽङि गुणः (क्क्ङिति चेत्यस्यापवादः) असरत्, अदर्शत्

शीङः सार्वधातुके गुणः (क्क्ङिति चेत्यस्यापवादः) शेते, शयाते

ऋतश्च संयोगादेर्गुणः (क्क्ङिति चेत्यस्यापवादः) जह्वरतुः, जह्वरुः

ऋतश्च ऋच्छत्यृताम् (क्क्ङिति चेत्यस्यापवादः) आनर्च्छ, आनर्च्छतुः

आरतुः, आरुः

निचकार, निचकरतुः

गुणोर्ति संयोगाद्योः (क्क्ङिति चेत्यस्यापवादः) अर्यते, अर्यात्, स्मर्यते ।

'यङि च' अरार्यते

'गुणोयङ्लुकोः' रोरुच्यते

मुचोऽकर्मकस्य गुणो वा (क्क्ङिति चेत्यस्यापवादः) मोक्षते वत्सः

'जाग्रोऽविचिण्णल्ङित्सु' इति सूत्रादारभ्य 'मुचोऽकर्मकस्य गुणो वे'-ति सप्तसूत्राणि क्क्ङिति चेत्यस्यापवादभूतानि ।

निजां त्रयाणां गुणः श्लौ नेनेक्ति, वेवेक्ति

(उत्सर्गापवादरहितमिदं शास्त्रं नियतलक्ष्येष्वेव प्रवर्तते)

गुणोऽपृक्ते (वृद्धेरपवादोऽयं गुणः) और्णोत्

ओर्गुणः (अयमपि विशेषविधिः) माधव्यः, बाभ्रव्यः, बाहूबाहवि

ऋतोङिसर्वनामस्थानयोः पूर्वसवर्णदीर्घापवादः) धातरि, धातारौ, धातारः ।

जसि च (पूर्वसवर्णदीर्घापवादः) हरयः, भानवः

घेर्ङिति (यणपवादः) हरये, हरेः

ह्रस्वस्य गुणः (सम्बुद्धौ गुणविशेषविधिः) हे हरे, हे विष्णो

तदित्थम् 'एकः पूर्वपरयोः' 'अङ्गस्य' इति सूत्रद्वयाधिकारस्थगुण-विधायकोत्सर्गापवादविवेचनं सम्पन्नम् ।

वृद्धिशास्त्रोत्सर्गापवादविवेचनम्

गुणविधेरनन्तरम् 'एकः पूर्वपरयोरि' त्यधिकारे वृद्धिविधिः प्रवर्तते। तत्र 'वृद्धिरेचि' इति सामान्यसूत्रमस्ति। यद्यपि 'वृद्धिरेचि' इति सूत्रेण विधीयमाना वृद्धिः कृष्णैकत्वमित्यत्र गुणापवादकत्वेन प्रागुक्ता तथापि पररूपाद्यपेक्षयास्य विधेः सामान्यत्वमस्त्येव। तथाहि प्र एजते, उप ओषति इत्यवस्थायां सामान्यतो 'वृद्धिरेची' ति सूत्रेण वृद्धिः प्राप्नोति. तां प्रबाध्य 'एङि पररूपमि'[१] ति विशेषशास्त्रेणावर्णान्तादुपसर्गादेङादिधातौ पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। वृद्धिविधेरस्यापवादत्वे च तदप्राप्तियोग्येऽचारितार्थ्यमेव कारणमस्ति। यदि सर्वत्रावर्णादेचि वृद्धिरेव स्यात्तदा 'एङि पररूपमि' ति शास्त्रं कुत्र प्रवर्तेत। तस्मादवर्णान्तादुपसर्गादेङि पररूपत्वेनोत्सर्गवृद्धिविधेर्बाधो भवति। उपैति, उपैधते इत्यत्र पररूपशङ्का तु न कार्या; 'एत्येधत्यूठ्सु' इत्यपवादसूत्रेण पररूपस्य बाधात्। तत्र एङि पररूपमिति शास्त्रम् 'एत्येधत्यूठ्सु' इति शास्त्रापेक्षया व्यापकमस्ति। यतो एङादिधातावर्णान्तादुपसर्गात्तत् पररूपं प्रवर्तते। एषा वृद्धिस्तु एत्येधत्योरूठि चेति नियता। ततोऽस्या वृद्धेः पररूपापेक्षया व्याप्यत्वं स्पष्टं भाति। ततश्च व्याप्यशास्त्रेण व्यापकशास्त्रस्य बाधरूपापवादत्वञ्चात्रापि सङ्गतमेव। शिवाय ओं नमः इत्यत्रापि 'ओमाङोश्च[२]' इत्यपवादशास्त्रेण पूर्वोक्तमुत्सर्गे वृद्धिविधिमपवाद्य पररूपमेव भवति।

अत्रेदमवधेयं यत् 'उस्यपदान्तादि'ति पररूपशास्त्रं गुणापवादत्वेन प्राग्व्याख्यातम्। 'ओमाङोश्च' इति पररूपशास्त्रमपि इदानीं वृद्धेरपवादत्वेनोपस्थापितमेव। तदेतच्छास्त्रद्वयमपि 'आटश्चे[३]' ति वृद्धिविषये प्रतिषिध्यत एव। तद्यथा औस्त्रीयदित्यत्र उस्रमात्मनः ऐच्छदित्यर्थे 'सुप आत्मनः क्यच्[४]' इति शास्त्रेण क्यचि, ततो क्यजन्ताल्लङि उस्रीयशब्दादङ्गात् प्रागाटि कृतेऽर्थवद्ग्रहणपरिभाषाया अनित्यत्वमाश्रित्य 'उस्यपदान्तादि' ति शास्त्रेण पररूपमत्र प्राप्नोति। एवमोङ्कारीयदित्यत्रोङ्कारशब्दात् क्यजन्ताल्लङि अङ्गस्याटि कृते सति 'ओमाङोश्चे'ति शास्त्रेण पररूपं प्राप्नोति, तथा औढीयदित्यत्रापि आ ऊढः इत्यौढशब्दात् क्यजन्ताल्लङि अङ्गस्यौढशब्दस्याटि कृते सति 'ओमाङोश्चे'ति पररूपं प्राप्नोति। तदेतत्पररूपविधायकशास्त्रद्वयम् 'आटश्चे'ति विशेषशास्त्रेण बाध्यते।

---

१. पा० सू० ६।१।९४
२. पा० सू० ६।१।९५
३. पा० सू० ६।१।९०
४. पा० सू० ३।१।८

अत्र वार्तिककार आचार्यकात्यायनस्तु 'उस्योमाङ्क्ष्वाटः प्रतिषेधः' इति वार्तिकं पठित्वा पररूपं प्रतिषेधति। किन्तु महर्षिपतञ्जलिः 'आटश्चेति' सूत्रस्थचकारेणैव समाधाय वार्तिकमनावश्यकमिति निश्चिनोति। तथा चोक्तं तेन 'ओमाङोश्चे'ति सूत्रभाष्ये-'उस्योमाङ्क्ष्वाटः प्रतिषेधः' उसि पररूपे ओमाङोश्चाटः प्रतिषेधो वक्तव्यः-औस्रीयत् औढीयत् औङ्कारीयत्। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। उक्तमाटश्चेत्यत्र चकारस्य प्रयोजनम्। आटोऽचि वृद्धिरेव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति[1]। एतावता क्वचिद्गुणवृद्ध्योरपवादभूतस्य पररूपस्यापि वृद्धिशास्त्रेण बाधो भवतीति स्पष्टं प्रतिपाद्यते।

अपि च पच्धातोर्लटि, शपि, आत्मनेपदसम्बन्ध्युत्तमपुरुषैकवचने इदि एत्वे 'पच् ए' इत्यवस्थायां 'वृद्धिरेची' ति उत्सर्गशास्त्रस्य 'अतो गुणे[2]' इत्यपवादशास्त्रं प्रवर्त्तते। अत्राप्यपवादत्वे व्याप्यत्वेन निरवकाशत्वमेव कारणमस्ति। यतो वृद्धिविधेः क्षेत्रापेक्षयास्य पररूपस्य व्याप्यत्वं विद्यत एव।

एवं रामयोः रमयोरित्यत्र राम ओस्, रमा ओस् इत्यवस्थायां सामान्यत एषा वृद्धिः प्रवर्तते, किन्तु 'ओसि च[3]' 'आङि चाप[4]' इति विशेषशास्त्राभ्यां यथाक्रमं वृद्धिं प्रबाध्य एकार एव विधीयते।

एकः पूर्वपरयोरित्यधिकारे इतोऽन्यदपि 'उपसर्गादृति धातौ' 'वा सुप्यापिशलेः' इति वृद्धिविधायकशास्त्रद्वयमस्ति, तच्च गुणापवादत्वेन पूर्वमेव व्याख्यातम्। तदेवमेकाधिकारस्थवृद्धिरित्युत्सर्गशास्त्रस्यापवादरूपाणि पररूपादिविधायकानि शास्त्राणि विवेचितानि।

तत्सङ्ग्रहश्चात्रैवं विद्यते

उत्सर्गशास्त्रम्	उदाहरणानि
वृद्धिरेचि	कृष्णैकत्वं, गङ्गौघः इत्यादि।

१. महाभाष्यम् पा० सू० ६।१।७४
२. पा० सू० ६।१।९७
३. पा०सू० ७।३।१०४
४. पा० सू० ७।३।१०५

एतदपवादशास्त्राणि	उदाहरणानि
एङि पररूपम्[१]	प्रेजते, उपोषति
ओमाङोश्च[२]	शिवायों नमः
अतो गुणे	पचे, यजे
ओसि च	रामयोः
आङि चापः	रमयोरिति ।

अङ्गाधिकारस्थवृद्धिशास्त्रसम्बन्ध्युत्सर्गापवादभावविमर्शः

इतः पूर्वम् 'एकः पूर्वपरयोरि'ति सूत्राधिकारस्थवृद्धिविधेरुत्सर्गापवादत्वन्निरूपितम् । इदानीमङ्गाधिकारस्थवृद्धिविधेरुत्सर्गापवादत्वं विमृश्यते । अङ्गाधिकारे किल द्विधा वृद्धिः समुपलभ्यते-पूर्वपदस्योत्तरपदस्य चेति । तत्र पूर्वपदवृद्धौ प्रथमं 'सिचि वृद्धिः परस्मैपदेषु[३]' इति शास्त्रेण इगन्ताङ्गस्य परस्मैपदपरे सिचि परतो वृद्धिः, अचैषीत्, अलावीत्, अकार्षीत् इत्यादौ दृश्यते। यद्यपि 'अ चि स् ई त्, अ लू स् ई त्, अ कृ स् ई त्, इत्यवस्थायामल्पापेक्षत्वरूपमन्तरङ्गत्वमाश्रित्य 'सार्वधातुकार्धधातुकयोरि'ति शास्त्रेणान्तरङ्गत्वात्पूर्वं गुणस्य प्राप्तिर्भवति, तथापि अनया वृद्धया गुणोऽपवाद्यते । यतो हि यद्यत्रापि गुण एव स्यात्तदा अस्या वृद्धेः किमपि लक्ष्यमेव न स्यात् । तस्मान्निरवकाशो विधिरपवाद इति न्यायेन 'परपित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषया च अन्तरङ्गादपि गुणादपवादशास्त्रस्य बलवत्वे वृद्धिरेवेह भवति न तु गुणः । ततश्चेदं वृद्धिशास्त्रं यद्यपि गुणशास्त्रदृष्ट्याऽपवादशास्त्रमेवास्ति नोत्सर्गशास्त्रम्, तथाऽपि 'क्ङिति चेति' शास्त्रापेक्षया त्वस्योत्सर्गत्वमक्षतमेव । निषेधशास्त्रमप्यपवादशास्त्रस्वरूपान्तर्भूतमेवास्तीति वैयाकरणैः सिद्धान्तितम् । तथा चोक्तं नागेशभट्टेन—'न विभक्तौ इति विभक्तिपदबोध्यसुप्तिङ्बोधो 'हलन्त्यमि'ति वाक्यार्थबोधोत्तरं तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तदवस्थ एवेति चेत्[४]' इत्यत्र 'न विभक्तौ तुस्मा' इति निषेधशास्त्रस्यापवादत्वं स्पष्टमेव स्वीकृतम् । अत एवास्या-

१. एङि पररूपमिति शास्त्रं यद्यपि वृद्धिरेचीति शास्त्रविहितां वृद्धिम्प्रत्यपवादभूतं तथापि 'एत्येधत्यूठ्सु' इति शास्त्रविहितवृद्धिम्प्रति उत्सर्ग एव ।

२. 'ओमाङोश्च' इति शास्त्रमप्युत्सर्गापवादात्मकं भाति । तत्र 'वृद्धिरेची'ति शास्त्रदृष्टया त्वस्यापवादत्वम् 'आटश्चे'ति शास्त्रदृष्ट्या चोत्सर्गत्वं व्याख्यातम् ।

३. पा० सू० ७।२।१

४. लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणे

न्योन्याश्रयस्य परिहाराय 'अपवादवाक्यार्थबोधात् पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे प्रतिबन्धकाभावात्। न ह्यभावज्ञाने प्रतियोगिज्ञानस्वेव प्रतियोगिज्ञानेऽभावज्ञानस्य कारणता कस्यापि सम्मता। प्रतियोगि ज्ञानं विना निषेधवाक्यार्थासम्भवाच्चे[1]' ति तत्समाधानं सङ्गच्छते।

न्यधुवीत्, न्यनुवीत् इत्यत्राप्येषा वृद्धिः कुटादित्वाद् ङित्वे सति प्रतिषिध्यते। ततश्चोत्सर्गत्वमस्य शास्त्रस्य प्रसिद्धम्।

एतद्वृद्धिशास्त्रादनन्तरम् 'अतोल्रान्तस्य[2]' 'वदव्रजहलन्तस्याचः' इति वृद्धिविधायकशास्त्रद्वयमुपतिष्ठते। तत्र 'अतो ल्रान्तस्य' इति शास्त्रविहितावृद्धिः 'अतो हलादेर्लघोरि[3]' ति शास्त्रविहितविकल्पवृद्धेरपवादभूता प्रसिद्धा। अत एव अज्वालीत्, अक्षारीत् इत्यत्र वृद्धिघटितं रूपमेवोपलभ्यते। न तु अक्षरीत् अज्वलीदिति वृद्धिरहितं रूपं व्यवह्रियते। यद्येतदतोल्रान्तस्येत्यपवादशास्त्रन्न स्यात्तदा वैकल्पिकं वृद्धिरहितमपि रूपमिह व्यवह्रियेत। एवमेवेडादौ सिचि हलन्तस्याङ्गस्य वृद्धिर्न भवतीत्यर्थकस्य 'नेटी' ति शास्त्रस्यापि एतद्वृद्धिशास्त्रमपवादभूतमस्ति। तेन अक्षारीत्, अज्वालीत् इत्यादौ वृद्धिनिषेधशङ्का न कार्या। यद्यपि पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरानि[4]' ति परिभाषया 'अतोल्रान्तस्य' इत्यपवादशास्त्रम् 'नेटी' ति निषेधशास्त्रस्यैवानन्तरत्वाद् बाधकं स्यान्न तु 'अतो हलादेर्लघोरि' ति विकल्पशास्त्रस्य, तथापि मद्विषये यद्यत्प्राप्तं तत्सर्वं मया बाध्यते इति बाध्यसामान्यचिन्तापक्षमवलम्ब्य विकल्पवृद्धेरप्यनया नित्यवृद्धया बाधोऽत्र बोध्यः।

अवादीत्, अव्राजीत्,अपाक्षीत् इत्यादौ तु वृद्धिविधायकं 'वदव्रजहलन्तस्याचः' इति शास्त्रं प्रवर्तते। अस्मिन् शास्त्रे वदिव्रजिग्रहणम् 'अतो हलादेर्लघोरि' ति सूत्रेण प्राप्तवैकल्पिकवृद्धिबाधनार्थमेव स्वीकृतमस्ति। यतो हि वदिव्रजिग्रहणफलन्तु इदमेव व्याख्यातम्। अन्यथा हलन्तत्वादत्रापि वृद्धिः स्यादेव। किन्तु नाम्ना वदिव्रजिनिर्देशरूपविशेषशास्त्रेण सामान्यस्य विकल्पविधेरपवादत्वम् युक्तम्। अस्य शास्त्रस्यापि 'नेटी' ति प्रतिषेधरूपापवादशास्त्रेण बाधो भवति, किन्तु हलन्तलक्षणा यत्र वृद्धिर्भवति तस्या एव वृद्धेः, मा भवानतीत्, अकोषीत् इत्यादौ प्रतिषेधः प्रवर्तते। अवादीत्, अव्राजीत् इत्यत्र तु वृद्धेर्विशेषविहितत्वान्नेटीति निषेधस्याप्यपवादो बोध्यः।

---

१. तत्रैव ,, ,,
२. पा० सू० ७।२।२
३. पा० सू० ७।२।७
४. परिभाषेन्दुशेखरस्य बाधबीजप्रकरणम्।

तदेवं 'वदव्रजहलन्तस्याचः' इति शास्त्रविहितवृद्धेरपवादत्वमुत्सर्गंत्वञ्च यथालक्ष्यं सिध्यति।

'अतो हलादेर्लघोरि' ति शास्त्रेण 'नेटी' ति निषेधशास्त्रं प्रबाध्य विधीयमाना वृद्धिस्तु विकल्परूपेण प्रवर्तते, तेन अखादीत्, अखदीत् इति रूपद्वयमुपलभ्यते। अस्या वृद्धेः प्रतिषेधरूपापवादत्वेन प्रसिद्धमस्ति 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्[1]' इति शास्त्रम्। तत्र ह्म्यन्तक्षणश्वसामेदिताञ्च धातूनाम् 'अतो हलादेर्लघोरि' ति शास्त्रेण या वृद्धि र्भवति सा प्रतिषिध्यते। जागृणिश्वीनान्तु 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रेण विधीयमानेगन्तलक्षणा वृद्धिः प्रतिषिध्यते।

एवम् और्णावीत्, और्णवीत् इत्यत्रापि 'ऊर्णोतेर्विभाषा[2]' इति शास्त्रेणेडादौ सिचि वृद्धिविकल्पो दृश्यते। एष च वृद्धिविकल्पः 'विभाषोर्णोः[3]' इति शास्त्रस्याङित्वपक्ष एव प्रवर्तते। ङित्वपक्षे तु 'क्ङिति चे' ति सूत्रेण गुणवृद्धयोर्निषेधादुवङि कृते और्णवीत् इति रूपमपि भवति। इह शास्त्रद्वयस्य विकल्पप्रवृत्तौ रूपत्रयस्येष्टत्वात्। और्णावीदित्यत्र सामान्यतः 'सिचि वृद्धिः परस्मैपदेषु' इति शास्त्रेण इग्लक्षणा वृद्धिः प्रवर्तत एव। ताञ्च विशेषरूपेणापवाद्य विकल्पवृद्धिरिह स्वीक्रियते।

तदेवमत्र सिचि वृद्धिः परस्मैपदेष्विति शास्त्रादारभ्य 'ऊर्णोतेर्विभाषा' इति शास्त्रं यावत पञ्चवृद्धिविधायकशास्त्राणि परस्मैपदेषु सिच्येव प्रवर्तन्त इति साजात्यमपीह बोध्यम्।

तदनु अङ्गाधिकारस्थवृद्धिप्रसङ्गे 'मृजेर्वृद्धिरि[4]' ति शास्त्रं प्रवर्तते। एतदपि वृद्धिशास्त्रं पुगन्तलघूपधस्य चे[5]' ति गुणशास्त्रस्यापवादभूतमस्ति, तेन मार्ष्टा, मार्ष्टुम् मार्ष्टव्यमित्यत्र वृद्धिरेव भवति न गुणः।

एवं हलादौ पिति सार्वधातुके उकारान्तस्याङ्गस्य वृद्धिर्भवति शपो लुकि 'उतो वृद्धिर्लुकि हलि[6]' इति शास्त्रेण। तेन यौति, स्तौति, नौति, इत्यत्रादादिप्रकरणस्थानामुकारान्तधातूनां वृद्धि र्दृश्यते। एष वृद्धिविधिः 'सार्वधातुकार्धधातुकयोरि' ति उत्सर्गगुणविधेरपवादः। अमुम् गुणविधिं विकल्पेनावरोद्धुमपवादत्वेन 'ऊर्णोतेर्विभाषा' इति वृद्धिशास्त्रं प्रवर्तते। तेन

१. पा० सू० ७।२।५
२. पा० सू० ७।२।६
३. पा० सू० १।२।३
४. पा० सू० ७।२।११४
५. पा० सू० ७।३।८६
६. पा० सू० ७।३।८९

ऊर्णौति, ऊर्णोतीति रूपद्वयं सिध्यति । एतच्च गुणस्योत्सर्गापवादविवेचन-प्रसङ्गे प्राग्व्याख्यातम् ।

अतः परं ञित्णित्प्रत्ययनिमित्तमादाय त्रिधा वृद्धिर्विधीयते । तत्र 'अचो ञ्णिति' इति सामान्यशास्त्रेण हारः, कारः इत्यत्र घञि कुम्भकारः, स्वर्णकारः इत्यादौ च णिति वृद्धिर्विधीयते । एषापि वृद्धिः 'सार्वधातुकार्धधातुकयोरि' ति सामान्यरूपोत्सर्गस्यापवादभूतैवास्ति । अस्या वृद्धेरप्यपवादशास्त्रमस्ति 'औतोऽम्शसोरि[1]' ति । अत एव गोशब्दादमि शसि च गो अम्, गो शस् इत्यवस्थायां 'गोतो णित्[2]' इति सूत्रेण णिद्वद्भावे सति अवश्यप्राप्तायां वद्धौ अनेनापवादशास्त्रेण पूर्वपरयोः स्थाने आकार एकादेशस्तद्बाधको भवति ।

पाकः, त्यागः इत्यत्र घञि ञिति, पाचकः, पाठकः इत्यत्र ण्वुलि णिति च 'अत उपधायाः' इति शास्त्रेणाङ्गोपधाभूताकारस्य वृद्धिर्विधीयते । अस्या वृद्धेः प्रतिषेधरूपापवादभूतं 'जनिवध्योश्चे[3]' ति शास्त्रं प्रसिद्धम् । तेन वधधातो र्घञि वधः, जनधातोर्ण्वुलि च जनकः, इति प्रयुज्यते । अशमि, अदमि इत्यत्र मान्तधातोरपि अस्या वृद्धेः प्रतिषेधः 'नोदात्तोपदेशस्य मान्तस्यानाचमेः[4]' इति शात्रेण कृतः ।

अथ ञित्णित्प्रत्ययनिमित्तभूतैषा वृद्धिः तद्धितप्रत्यये च अचामादेरचः स्थाने भवति । तथा च सूत्रमस्ति 'तद्धितेष्वचामादेरि[5]' ति । तेन गार्ग्य, औपगवः, इत्यादौ वृद्धिरादेरचः स्थाने दृश्यते । अस्या वृद्धेरपि प्रतिषेधसूत्राणि 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्[6]' 'द्वारादीनाञ्च[7]' 'न्यग्रोधस्य च केवलस्ये[8]' त्यादीनि सन्ति । तेन क्रमशः वैयाकरणः, दौवारिकः, 'नैयग्रोधः' इत्यत्र वृद्धिः प्रतिषिध्यते ।

तदेवं ञिति णिति प्रत्ययपरत्वेऽजन्ताङ्गस्य, अङ्गोपधाया अकारस्य, अङ्गस्याचामादेरचश्चेति, वृद्धिविधायकशास्त्रत्रयस्य विवेचनमिह जातम् ।

अपरमेकमङ्गाधिकारस्थंपूर्वपदस्याचामादेरचः स्थाने वृद्धिविधायकं 'किति[9]' चेति शास्त्रमस्ति । अनेन शास्त्रेण तद्धितसम्बन्धिकित्प्रत्ययेऽङ्ग-

---

१. पा० सू० ६।१।९३
२. पा० सू० ७।१।९०
३. पा० सू० ७।३।३५
४. पा० सू० ७।३।३४
५. पा० सू० ७।२।११७
६. पा० सू० ७।३।३
७. पा० सू० ७।३।४
८. पा० सू० ७।३।५
९. पा० सू० ७।२।११८

स्यादेरचो वृद्धिर्विधीयते। तेन 'नडादिभ्यः फक्'[१] इति सूत्रेण फकि कृते नाडायनः, चारायणः, इत्यत्र वृद्धिः सिध्यति।

एषामङ्गाधिकारस्थवृद्धिविधायकशास्त्राणां वर्गीकरणञ्चैवमस्ति

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'सिचि वृद्धिः परस्मैपदेषु'	'क्ङिति च'	न्यधुवीत्
	'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्'	अजागरीत्
'अतो हलादेर्लघोः'	'अतो ल्रान्तस्य[२]'	अज्वालीत्
'वदव्रजहलन्तस्याचः'	'अतो हलादेर्लघोः'	अखादीत्-अखदीत्
'अतो हलादेर्लघोः'	'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्'	अग्रहीत्, अस्मयीत्
'सिचि वृद्धिः परस्मैपदेषु'	'ऊर्णोतेर्विभाषा'	और्णावीत्-और्णवीत्
'पुगन्तलघूपधस्य च'	'मृजेर्वृद्धिः'	मार्ष्टा, मार्ष्टुम्
'सार्वधातुकार्धधातुकयोः'	'उतो वृद्धिर्लुकि हलि'	यौति, नौति
'अचो ञ्णिति'	'औतोऽम्शसोः'	गाम्, गाः
'अत उपधायाः'	'जनिवध्योश्च'	जनकः, वधः
	'नोदात्तोपदेशस्य मान्तस्यानाचमेः'	अशमि, अदमि

एतानि वृद्धिविधायकशास्त्राणि सामान्यतः तत्तन्निमित्तमादायाङ्गेष्वेव प्रवर्तन्ते। एवमन्यत्रापि अङ्गाधिकारस्थोत्तरपदस्य वृद्धिविधायकशास्त्राणि सन्ति। तानि च सामान्यतः तद्धितप्रत्ययनिमित्तत्वेनादाय, 'तद्धितेष्वचामादेः' 'किति' चेति सामान्यशास्त्रद्वयमपवाद्य चोपतिष्ठन्ते। तत्परिचयश्चेह सोदाहरणमेवं प्रस्तूयते—

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'तद्धितेष्वचामादेः[३]'	'न य्वाभ्यां पदान्ताभ्यां	वैयाकरणः,
	'पूर्वौ तु ताभ्यामैच्[४]'	सौवश्वः
	'द्वारादीनाञ्च[५]'	दौवारिकः

---

१. पा० सू० ७।१।९६

२. नेटीति निषेधापवादशास्त्रस्याप्यपवादकमिदं शास्त्रमिति तत्त्वम्।

३. पा० सू० ७।२।११७ ४. पा० सू० ७।३।३ ५. पा० सू० ७।३।४

	'न्यग्रोधस्य च केवलस्य[1]'	नैयग्रोधः
	क–'दिशोऽमद्राणाम्[2]'	पूर्वपाञ्चालकः
	'प्राचां ग्रामनगराणाम्[3]'	पूर्वेषुकामशमः
	'संख्यायाः संवत्सरसंख्यस्य[4] च'	द्विषाष्टिकः
	'वर्षस्याभविष्यति[5]'	द्विवार्षिकः
	'परिमाणान्तस्यासंज्ञाशाणयोः[6]'	द्विकौडविकः
	'जेप्रोष्ठपदानाम[7]'	प्रोष्ठपादः
	'हृद्भगसिन्ध्वन्तेपूर्वपदस्य च[8]'	सौहार्द्यम्, सौहार्दम्
	'अनुशतिकादीनाञ्च[9]'	आनुशातिकम्
	'प्राचां नगरान्ते[10]'	सौह्मनागरः पौर्वनागरः
	'जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्[11]'	कौरुजङ्गलम्-कौरुजाङ्गलम्

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
	'प्रवाहणस्य ढे[12]'	प्रावाहषेयः-प्रवाहणेयः
	'तत्प्रत्ययस्य च[13]'	प्रावाहणेयिः-प्रवहणेयिः
	'नञः शुचीश्वरक्षेत्रज्ञ कुशलनिपुणानाम्[14]'	आशौचम्-अशौचम्
	'यथातथयथापुरयोः-	आयथातथ्यम्

१. पा० सू० ७।३।५ क-५–सुसर्वार्द्धाज्जनपदस्य च'-सुपाञ्चालकः सर्वपाञ्चालकः
२. पा० सू० ७।३।१३
३. पा० सू० ७।३।१४
४. पा० सू० ७।३।१५
५. पा० सू० ७।३।१६
६. पा० सू० ७।३।१७
७. पा० सू० ७।३।१८
८. पा० सू० ७।३।१९
९. पा० सू० ७।३।२०
१०. पा० सू० ७।३।२४
११. पा० सू० ७।३।२५
१२. पा० सू० ७।३।२८
१३. पा० सू० ७।३।२९
१४. पा० सू० ७।३।३०

	पर्यायेण[1]'	अयाथातथ्यम्
'किति च[2]'	'अवयवाद्: ऋतो।[3]'	पूर्ववार्षिकम्
उत्सर्गशास्त्रम्	**अपवादशास्त्रम्**	**उदाहरणानि**
'देवताद्वन्द्वे च[4]'	'नेन्द्रस्य परस्य'	सौमेन्द्र[5]:
	'दीर्घाच्च वरुणस्य'	मैत्रावरुणम्'
'अर्धात् परिमाणस्य पूर्वस्य तु वा'	'नातः परस्य'	अर्द्धप्रस्थिकः, आर्द्धप्रस्थिक[6] इति ।

तदित्थमिह गुणशास्त्रवत् सर्वेषां वृद्धिविधायकशास्त्राणामप्युत्सर्गापवादत्वं विवेचितम् ।

---

१. अत्र 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति सूत्रादारभ्य 'यथातथयथापुरयोः पर्यायेण' (७।३।३१) सूत्रं यावत् सप्तदश सूत्राणि तद्धितेष्वचामादेरिति शास्त्रस्यापवादभूतानि सन्ति। एतत्सूत्रविषयेषु च सामान्यतः तद्धितेष्वचामादेरिति शास्त्रेणाचामादेर्वृद्धिः प्राप्नोति । तां वृद्धिमपवाद्य क्वचिदैचागमः क्वचिदुत्तरपदस्य क्वचिच्चोभयपदस्य वृद्धिः तत्तद्विशेषशास्त्रै विर्धीयते । एषां वृद्धिविधायकविशेषशास्त्राणां प्रयोजनन्तूदाहरणैरेव स्पष्टं प्रतीयते । अत एव नेह व्याख्यातम् ।

२. पा० सू० ७।२।११८

३. पूर्ववर्षासु भवं पूर्ववार्षिकमित्यत्र तु 'वर्षाभ्यस्ठक्' इति सूत्रेण ठकि सति कित्वात् 'किति चे' ति सामान्यशास्त्रेणाचामादेर्वृद्धिः प्राप्नोति। तां प्रबाध्य अवयवाद् ऋतोः (७।३।११) इति विशेषशास्त्रेणोत्तरपदस्यैवाचामादेर्वृद्धिरिष्यते ।

४. पा० सू० ७।३।२१

५. आग्निमारुतमित्यत्र 'देवताद्वन्द्वे चे' ति शास्त्रेण पूर्वोत्तरपदस्य च वृद्धि र्भवति । तत्र यदि इन्द्रपदमुत्तरं स्यात् तदा तस्य वृद्धि निषिध्यते 'नेन्द्रस्य परस्ये' ति (७।२ २२) विशेषशास्त्रेण । तेन सौमेन्द्र इत्यत्र नोत्तरपदस्य वृद्धिर्दृश्यते । एवं मैत्रावरुणमित्यत्रापि 'दीर्घाच्चवरुणस्ये' ति (७ ३।२३) विशेषशास्त्रेणोत्तरपदस्य वरुणस्याचामादे वृद्धिः प्रतिषिध्यते ।

६. अर्द्धद्रौणिकम् आर्द्धद्रौणिकमित्यत्रोत्तरपदस्य नित्यवृद्धिः, पूर्वपदस्य तु पाक्षिकी वृद्धिः 'अर्धात् परिमाणस्य पूर्वस्य तु वा' (७।३।२६) इति शास्त्रेणानेन विधीयते । एतदपवादरूपं 'नातः परस्य' (७।३।२७) इति शास्त्रं प्रवर्तते केवलमुत्तरपदस्य वृद्धिनिषेधार्थम् । अत एव अर्द्धप्रस्थिकः आर्द्धप्रस्थिक इत्यत्र पूर्वपदस्य वैकल्पिकवृद्धिः सिध्यति ।

इति द्वितीयो विमर्शः ॥

तृतीयो विमर्शः

दीर्घशास्त्रपरिशीलनम्

दीर्घशास्त्रं हि गुणवृद्धिशास्त्रापेक्षयाधिकं व्यापकमस्ति। गुणशास्त्रं वृद्धिशास्त्रञ्च एकः पूर्वपरयोः 'अङ्गस्य' इति शास्त्रद्वयमवलम्ब्यैव यथा प्रवर्तेते तथा व्याख्यातम्। दीर्घशास्त्रन्तु पूर्वोक्तम् 'एक पूर्वपरयोः' अङ्गस्य चेत्यधिकारद्वयातिरिक्तस्थलेऽप्युपतिष्ठते। तत्र पूर्वं तावत् एकः पूर्वपरयोरित्यधिकारस्थदीर्घशास्त्रस्योत्सर्गापवादभावः परिशील्यते। अस्मिन्नधिकारे दीर्घः पूर्वसवर्णदीर्घश्चेति द्विविधो दीर्घविधिः दृष्टिपथमवतरति। तत्र 'अकः सवर्णे दीर्घ' इति शास्त्रं यद्यपि दैत्यारिः, श्रीशः इत्यादौ 'आद्गुणः', 'इकोयणचि' इति गुणयण्विध्योरपवादत्वेन प्रसिद्धं, तथापि 'अतो गुणे' इति शास्त्रापेक्षयास्य दीर्घविधेरुत्सर्गत्वमस्त्येव। अत एव पचन्ति यजन्ति इत्यत्र पच-अन्ति, यज-अन्ति इत्यत्र सवर्णेऽप्यचि पररूपमेव भवति, न तु दीर्घः। एवं शकन्धुः, कर्कन्धुरित्यादावपि 'शकन्ध्वादिषु पररूपं वाच्यमि' ति वार्तिकेन सवर्णदीर्घमपवाद्य पररूपं विधीयते।

किञ्च यत्र सवर्णेऽचि प्रगृह्यसंज्ञा भवति तत्रापि सवर्णदीर्घस्य बाधो दृश्यते। यथा हरी इमौ, अग्नी इति इत्यत्र 'ईदूदेदद्विवचनं प्रगृह्यम्[१]' इति शास्त्रेण सत्यां प्रगृह्यसंज्ञायां प्रकृतिभाव एव दृश्यते 'प्लुतप्रगृह्या अचि नित्यम्[२]' इति शास्त्रेण, न तु पूर्वपरयोः स्थाने दीर्घरूपविकृतिः। एवममी ईशा इत्यत्र 'अदसो मात्[३]' इति सूत्रेण विधीयमानप्रगृह्यसंज्ञायां पूर्वोक्तसूत्रेण प्रकृतिभाव एवेष्टः, न तु सवर्णदीर्घः।

अपि च यत्र सवर्णेऽचि निपातसंज्ञा क्रियते तत्रापि प्रकृतिभावस्य बलवत्त्वमपवादत्वाद् बोध्यम्। तेन इ इन्द्रः, उ उमेशः इत्यत्र 'निपात-एकाजनाङ्[४]' इति शास्त्रेण प्रगृह्यसंज्ञायां प्रकृतिभाव एवात्र भवति न तु सवर्णदीर्घः। किमु उक्तमित्यत्र तु 'मय उञो वोवा[५]' इति शास्त्रेण निपातस्यापि पाक्षिकोऽपवाद स्वीक्रियते। तेन दीर्घविधिं प्रबाध्य किम्वुक्त-

---

१. पा० सू० १।१।११
२. पा० सू० ६।१।१२५
३. पा० सू० १।१।१२
४. पा० सू० १।१।१४
५. पा० सू०

मित्यत्रोकारस्य स्थाने वत्वं श्रूयते। यत्र किमु उक्तमिति प्रयुज्यते तत्र तु दीर्घं प्रबाध्य निपातत्वात् प्रकृतिभाव एवेष्टः।

तदेवं प्रगृह्यपररूपापवादशास्त्राणि पुरस्कृत्य 'अकः सवर्णे दीर्घः' इति शास्त्रस्योत्सर्गत्वं व्याख्यातम्।

तदनु पूर्वसवर्णदीर्घप्रसङ्ग प्रवर्तते। पूर्वसवर्णदीर्घश्च 'प्रथमयोः पूर्वसवर्णः[१]' इति शास्त्रेण सम्पद्यते। अग्नि-औ, वायु-औ इत्यवस्थायां सामान्यतः प्रवर्तमानम् 'इको यणचि' इति यण्शास्त्रमपवाद्य पूर्वसवर्णदीर्घ एव सम्पद्यते। अतो यण्शास्त्रापेक्षयास्यापवादत्वं सिध्यति। किन्तु 'नादिचि[२]' 'दीर्घाज्जसि च[३]' इति शास्त्रद्वयापेक्षया तूत्सर्गत्वमस्त्येव। ततश्च क्रमशः रामौ विश्वपौ इत्यादौ शास्त्रद्वयस्यास्य निषेधरूपापवादत्वं सङ्घटते। निषेधे सति वृद्धिस्तु वृद्धिरेचीति शास्त्रेणेह निष्पद्यते। रामम् हरिम् इत्यत्र तु राम-अम्, हरि-अम् इत्यवस्थायां पूर्वसवर्णदीर्घमपवाद्य 'अमि पूर्वः[४]' इति विशेषशास्त्रेण पूर्वरूपमेव विधीयते। तदित्थमिह 'प्रथमयोः पूर्वसवर्णः' इत्युत्सर्गशास्त्रस्य 'नादिचि' दीर्घाज्जसि च' 'अमि पूर्वः' इति शास्त्रत्रयमपवादरूपेण निश्चीयते।

अङ्गाधिकारस्थदीर्घविधायकशास्त्राणि

अङ्गाधिकारस्थदीर्घविधायकशास्त्रप्रवृत्तौ हि कानिचिदेवापवादशास्त्राणि मिलन्ति, तान्यपि प्रायः निषेधरूपाणि सन्ति। अतस्तत्सर्वाणि प्रथममत्र सोदाहरणं सङ्गृह्य विविच्यन्ते।

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'नामि[५]'	'न तिसृचतसृ[६]'	तिसृणाम्, चतसृणाम्
'नृ च[७]'		त्वं नृणां पते, त्वं नृणां पते
'नोपधायाः[८]'		पञ्चानाम्, सप्तानाम्
'सर्वनामस्थाने चासम्बुद्धौ[९]'		राजा, राजानौ, राजानः, राजानम्, राजानौ

१. पा० सू० ६।१।१०२
२. पा० सू० ६।१।१०४
३. पा० सू० ६।१।१०५
४. पा० सू० ६।१।१०७
५. पा० सू० ६।४।३
६. पा० सू० ६।४।४
७. पा० सू० ६।४।६
८. पा० सू० ६।४।७
९. पा० सू० ६।४।८

'वा षपूर्वस्य निगमे[1]'		स तक्षाणंतिष्ठन्तमब्रवीत् स तक्षणं तिष्ठन्तमब्रवीत्

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'सान्तमहतः संयोगस्य[2]'		श्रेयान्, श्रेयांसौ, श्रेयांसः
'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्[3]'		आपः, कर्ता, कर्तारौ
'इन्हन्पूषार्यम्णां शौ[4]'		बहुदण्डीनि, बहुछत्त्रीणि
'सौ च[5]'		दण्डी, वृत्रहा
'अत्वसन्तस्य चाधातोः[6]'		गोमान्, यवमान्
'अनुनासिकस्य क्विझलोः क्ङिति[7]'	'न क्तिचि दीर्घश्च[8]'	यन्तिः, वन्तिः
'अज्झनगमां सनि[9]'		तुष्टूषति, चिकीर्षति
'तनोतेर्विभाषा[10]'		तितांसति, तितंसति
'क्रमश्च क्त्वि[11]'		क्रन्त्वा, क्रान्त्वा
'युप्लुवोर्दीर्घश्छन्दसि[12]'		दान्त्यनुपूर्वं वियूय
'क्षियः[13]'		प्रक्षीय
'निष्ठायामण्यदर्थे[14]'		आक्षीणः, अक्षीणः
'वाऽऽक्रोशदैन्ययो[15]'		क्षितायुरेधि, क्षीणायुरेधि

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्[16]'		अशमि, अशामि
'ग्रहोऽलिटि दीर्घः[17]'		ग्रहीता, ग्रहीतुम्

१. पा० सू० ६।४।९
२. पा० सू० ६।४।१०
३. पा० सू० ६।४।११
४. पा० सू० ६।४।१२
५. पा० सू० ६।४।१३
६. पा० सू० ६।४।१४
७. पा० सू० ६।४।१५
८. पा० सू० ६।४।३९
९. पा० सू० ६।४।१६
१०. पा० सू० ६।४।१७
११. पा० सू० ६।४।१८
१२. पा० सू० ६।४।५८
१३. पा० सू० ६।४।५९
१४. पा० सू० ६।४।६०
१५. पा० सू० ६।४।६१
१६. पा० सू० ६।४।९३
१७. पा० सू० ७।२।३७

'वृतो वा[1]'	'न लिङि' 'सिचि च परस्मैपदेषु'	विवरिषीष्ट, प्रावारिषीष्ट प्रावरिष्टाम्, प्रावारिषुः
'शमामष्टानां दीर्घः श्यनि[2]'		ताम्यति, शाम्यति
'ष्ठिवुक्लमुचमां शिति[3]'		ष्ठीवति, क्लामति
'क्रमः परस्मैपदेषु[4]'		क्रामति, क्रामतः
'अतो दीर्घो यञि[5]'		पचामि, पचावः
'अकृत्सार्वधातुकयोर्दीर्घः[6]'		सुखायते, दुःखायते
'च्वौ च[7]'		शुचीकरोति, शुचीभवति
'दीर्घ इणः किति[8]'		ईयतुः, इयुः
'अतोगुणे[9]'	'अतआदेः'	आट, आटतुः

उत्सर्गशास्त्रम्	**अपवादशास्त्रम्**	**उदाहरणानि**
'दीर्घोऽकितः[10]'		पापच्यते, पापचीति
'दीर्घो लघोः[11]'		अचीकरत्, अजीहरत्
'हलः[12]'		
'सुपि च[13]'		

एतान्यष्टात्रिंशत्खल्वङ्गाधिकारस्थदीर्घसम्बन्धिशास्त्राणि प्रवर्तन्ते। कथमेषामपूर्वविधित्वम्, केन वा कुत्रचित् तदपवाद्यत इति सर्वमिह चिन्त्यते। तत्र तावन्नामीति सामान्यशास्त्रविहितदीर्घः 'न तिसृचतसृ' इति विशेष-

१. विवरिषीष्ट, आस्तरिषीष्ट, एवम् आवारिष्टाम्, आस्तारिष्टामित्यत्र 'वृतो वा' (७।२।३८) इति शास्त्रविहितस्येटो दीर्घनिषेधो 'न लिङि' (७।२।३९) 'सिचि च परस्मैपदेष्वि' ति (७।२।४०) सूत्राभ्यां क्रियते।

२. पा० सू० ७।३।७४

३. पा० सू० ७।३।७५

४. पा० सू० ७।३।७६

५. पा० सू० ७।३।१०१

६. पा० सू० ७।४।२५

७. पा० सू० ७।४।२६

८. पा० सू० ६।४।६९

९. आट, आटतुः इत्यत्र अट्धातोर्लिटि द्वित्वेऽभ्यासादिकार्ये जाते 'अ अट' इत्यवस्थायाम् 'अतो गुणे' (६।१।९७) इति विशेषशास्त्रेण पररूपं प्रवर्तते। तदपवाद्य 'अत आदेः' (७।४।७०) इति विशेषशास्त्रेण दीर्घः सिध्यति।

१०. पा० सू० ७।४।८३

११. पा० सू० ७।४।९४

१२. पा० सू० ६।४।२

१३. पा० सू० ७।३।१०२

शास्त्रेणापवाद्यते, तेन तिसृणाम्, चतसृणामित्यजन्ताङ्गस्य दीर्घो नोपलभ्यते। एष च निषेधरूपापवादः छन्दसि वैकल्पिको भवति, यतो हि तिसृणां मध्यं दिने, तिसॄणां मध्यं दिने इत्युभयं प्रयुज्यते, तथा चानुशास्ति महर्षिपाणिनिः 'छन्दस्युभयथे'ति सूत्रेण। एवं वेदे लोके च नृणां नॄणामित्यत्र ह्रस्वदीर्घोभयविधप्रयोगदर्शनात् 'नृचे'ति शास्त्रेण वैकल्पिकदीर्घविधिः सिध्यति। पञ्चानाम्, सप्तानामित्यादावपि 'नामि' अजन्ताङ्गस्य दीर्घो दृश्यते, ततश्च नान्तोपधाया दीर्घविधानार्थं 'नोपधायाः' इति शास्त्रं प्रवर्तते। अस्य शास्त्रस्य न कश्चनापवादयोगो लक्ष्यते। अतः स्वतन्त्रोऽयं विधिरिति बोध्यम्।

एष च नान्तस्याङ्गस्योपधाया दीर्घविधिर्न केवलं नामि परत एव दृश्यते, अपि तु सम्बुद्धिभिन्नसर्वनामस्थाने परतोऽप्युपलभ्यते। यथा राजा, राजानौ, राजान इत्यादौ। अत एव 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनुशासनमत्र भाति। एवं 'वा षपूर्वस्य निगमे' सान्तमहतः संयोगस्य' 'अप्तृन्तृजित्यादि त्रीणि सूत्राण्यपि सर्वनामस्थाने चासम्बुद्धावेव तत्तद्विशेषोद्देश्येषु दीर्घं विदधति। तत्र क्रमशः तक्षाणं तक्षणमिति वैदिकप्रयोगे षपूर्वस्याचो नोपधाया दीर्घो भवति वैकल्पिकः। श्रेयान्, महानित्यादौ च सान्तसंयोगस्य महतो नकारोपधायाश्च दीर्घो विधीयते। एवमापः, कर्ता, कर्तारावित्यादौ अप्तृन्तृजित्यादिशास्त्रेण नामतो निर्दिष्टानामबादिप्रातिपदिकानामुपधायाः तृन्तृच्प्रत्ययान्तयोरुपधायाश्च दीर्घो विधीयते।

एकस्य शास्त्रस्य प्राप्तिस्थले अन्यस्य निमित्ताभावादप्रवृत्त्या यद्यप्यत्रैकस्य शास्त्रस्य परेण शास्त्रेण सह सङ्घर्षाभावेन परस्परमुत्सर्गापवादभावो नास्ति। तथापि अधिकेषु लक्ष्येषु प्रवर्त्तनात् सामान्यतः नामीति व्यापकशास्त्रापेक्षया 'नोपधायाः' इति शास्त्रस्य स्वल्पलक्ष्यसाधकत्वेन व्याप्यत्वं स्पष्टमेव भाति। एवमेव 'सर्वनामस्थाने चासम्बुद्धौ' इति शास्त्रापेक्षया 'वा षपूर्वस्य निगमे' 'सान्तमहतः संयोगस्य' 'आप्तृन्ष्तृजि' त्यादिसूत्राणां व्याप्यत्वं शक्यते वक्तुम्। व्याप्यशास्त्रेण व्यापकशास्त्रस्यापवादस्तु तत्र भवति यत्र व्यापकशास्त्राप्रवृत्तिस्थलेऽपि व्याप्यशास्त्रस्य चारितार्थ्यं नैव दृश्यते। यथा कर्मण्यण् इति व्यापकशास्त्रविषयं परित्यज्य 'अतोऽनुपसर्गे कः' इति व्याप्यशास्त्रं नोपतिष्ठते। अत्र तु तथा नास्ति। सर्वे दीर्घविधयो न्यूनाधिकोद्देश्येषु तत्तल्लक्ष्येषु स्वतन्त्ररूपेण प्रवर्तन्त एवेति बोध्यम्।

एवमेतदग्रोपात्तदीर्घविधायकशास्त्रेषु 'इन्हन्पूषार्यम्णा शौ' इति नियमशास्त्रं प्रवर्तते। अनेन च 'सर्वनामस्थाने चासम्बुद्धौ' इत्यस्य सामान्यशास्त्रस्य प्रवृत्तौ सङ्कोचः क्रियते। तेन 'बहुदण्डीनि, बहुवृत्रहाणीत्यादिषु,

शौ नपुंसकलिङ्ग एव दीर्घो भवति न तु दण्डिनौ, वृत्रहणौ, पूषणौ, अर्यमणौ इत्यत्र शिपरत्वाभावे पुल्लिङ्गेऽपि। दण्डी, वृत्रहा, पूषा, अर्यमा इत्यत्र पूर्वोक्तनियमस्वीकारेऽपि दीर्घो भवेदतः 'सौ च' इत्यपूर्वं दीर्घविधायकं शास्त्रमारभ्यते। एवं भवान्, कृतवान् गोमानित्यत्रात्वन्तस्य, सुपयाः, सुयशाः इत्यत्रासन्तस्य च दीर्घविधानार्थम् 'अत्वसन्तस्य चाधातोरि'-ति शास्त्रं प्रवर्तते, यतो हि न केनापि पूर्वोक्तदीर्घविधायकशास्त्रेणात्र दीर्घः सम्भाव्यते। एषो दीर्घोप्यसम्बुद्धौ सौ परे भवति, अतः पूर्वोक्त सौ चेति शास्त्रेण सहास्यानुवृत्तिरूपसम्बन्धः सिद्धः।

तथा शान्तः, शान्तवानित्यत्र दीर्घविधानार्थमनुनासिकस्य क्विझलोः क्ङिति इति शास्त्रमुपतिष्ठते। अस्य दीर्घस्य चापवादस्तु 'न क्तिचि दीर्घश्चे' ति शास्त्रं भवति। तेन वन्, यम् धातोः क्तिचि यन्तिः वन्ति-रित्यादिपदानि सिध्यन्ति।

तदेवं 'नोपधायाः' इति सूत्रादारभ्यानुनासिकस्य क्विझलोः क्ङिति' इति सूत्रं यावन्नवसूत्राण्युपधाया दीर्घं विदधति। अत एवाष्टाध्याय्या-मेषामेकत्र क्रमशः सन्निवेशो विहितः।

'एवमग्र्यज्झनगमां सनि' इति सूत्रादारभ्य 'दीर्घो लघोरि'ति सूत्रं यावद् विंशतिः सूत्राणां प्रवृत्तिर्धातुसम्बन्धमादाय जायते, अत एषां साजात्यं मत्वा मयाप्यत्र सर्वं सङ्गृहीतम्।

'हल' इति दीर्घविधायकशास्त्रन्तु सम्प्रसारणमुद्दिश्य हूतः, जीनः इत्यत्र प्रवर्तते। यद्यपि ह्वेञ्, ज्याधातोरेवात्रापि सन्बन्धो दृश्यते, तथापि सम्प्रसारणमुद्दिश्यैव दीर्घविधानादत्र ततः पृथग् बोध्यम्। एवं 'सुपि च' इति शास्त्रमपि अजन्ताङ्गस्य सुपि दीर्घं विदधाति। अतो धातुसम्बन्धाद-न्यत्रास्य सन्निवेशो जातः। तदेवमङ्गाधिकारस्थदीर्घविधायकशास्त्राणि विवेचितानि।

अङ्गाधिकारात्प्रागुत्तरपदाधिकारः प्रावर्तत। स च तृतीयाध्यायादा-रभ्याङ्गाधिकारात्प्राग्व्याप्तः। अतोऽस्मिन्नधिकारे यानि खलु दीर्घविधायक-शास्त्राणि सन्ति तान्यसति विशेषवचने उत्तरपदे परत एव प्रवर्तन्ते। तेषां परिचयोऽपि प्रसङ्गतोऽत्रावश्यक इति मत्वा सोदाहरणानि तानि प्रस्तूयन्ते। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'[1] ६।३।१।१११, पुना रमते, लीढः, अजर्घाः।

१. अत्रोत्तरपदाधिकारादेव पूर्णपदत्वस्य लाभेऽपि पुनः पूर्वग्रहणमनुत्तरपदेऽपि लीढः अजर्घाः इत्यत्र दीर्घविधानार्थं स्वीकृतम्। ततश्चोत्तरानुत्तरपदेऽपि शास्त्रेणानेन दीर्घविधानं सिध्यति।

कर्णे लक्षणस्याविष्टाष्ट-पञ्चमणिभिन्नछिन्नच्छिद्र-'स्रुवस्वस्तिकस्य'	६।३।११५,	दात्राकर्णः, द्विगुणाकर्णः
'नहिवृतिवृषिव्यधि-'रुचिसहितनिषु क्वौ'	६।३।११६,	उपानत्, परीणत्
'वनगिर्योः संज्ञायां 'कोटरकिंशुलुकादीनाम्'	६।३।११७,	कोटरावणम्, मिश्रकावणम
'वले'—	६।३।११८,	आसुतीवलः कृषीवलः
'मतौ बह्वचोऽनजिरादीनाम्'	६।३।११९,	उदुम्बरावती, मशकावती
'शरादीनां च'	६।२।१२०,	शरावती, वंशावती
'इको वहेऽपीलोः'	६।३।१२१,	ऋषीवहम्, कृषीवहम्
'उपसर्गस्य घञ्यमनुष्ये-'बहुलम्	६।३।१२२,	नीक्लेदः, वीमार्गः
'इकः काशे'	६।३।१२३,	नीकाशः वीकाशः
'दस्ति'	६।३।१२४,	वीत्तम्, परीत्तम्
'अष्टनः संज्ञायाम्'	६।३।१२५,	अष्टावक्रः, अष्टाबन्धुरः
'छन्दसि च'	६।३।१२६,	आग्नेयमष्टाकपालं-निर्वपेत्
'चितेः कपि'	६।३।१२७,	एकचितीकः, द्विचितीकः
'विश्वस्य वसुराटोः'	६।३।१२८,	विश्वासुः, विश्वाराट्
'नरे संज्ञायाम्'	६।३।१२९,	वैश्वानरिः
'मित्रे चर्षौ'	६।३।१३०,	विश्वामित्रः
'मन्त्रे सोमाश्वेन्द्रिय-'विश्वदेव्यस्य मतौ'	६।३।१३१,	सोमावती, अश्वावती
'ओषधेश्च विभक्ता-'वप्रथमायाम्	६।३।१३२,	ओषधीभिरपीपतत्
'ऋचि तुनुघमक्षु-तङ्कुत्रोरुष्याणाम्'	६।६।१३३,	आतू न इन्द्र, नू मर्तः
'इकः सुञि'	६।३।१३४,	अभीषुणः, सखीनाम्
'द्वयचोऽतस्तिङः'	६।३।१३५,	विद्मा हि त्वा सत्पतिं-शूरगोनाम्
'निपातस्य च	६।३।१३६,	एवा ते, अच्छा ते

'अन्येषामपि दृश्यते'[१]	६।३।१३७,	केशाकेशि, कचाकचि
'चौ'	६।३।१३८,	दधीचः, मधूचः
'सम्प्रसारणस्य'	६।१।१३९,	कारीषगन्धीपुत्रः, कारीषगन्धीपतिः

एतानि किल दीर्घविधायकशास्त्राणि सामान्यत उत्तरपदे परे प्रवर्तन्ते। किन्त्वस्याधिकारस्याभ्यन्तरे यत्र विशेषरूपेण मतुबादिपरत्वमादाय दीर्घो विधीयते, तत्रोत्तरपदाधिकारस्य सम्बन्धो न विवक्षितः उत्तरपदत्वाभावादिति बोध्यम्। तद्यथा 'मतौ बह्वचोऽनजिरादीनाम्' 'शरादीनां च' 'चितेः कपि' 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' 'ओषधेश्च विभक्तावप्रथमायाम्' 'ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणाम्' 'इकः सुञि' 'द्व्यचोऽतस्तिङः' 'निपातस्य च' 'अन्येषामपि दृश्यते' 'चौ' इत्येतच्छास्त्रप्रवृत्तावुत्तरपदपरत्वमनपेक्षितमेवेति पूर्वोक्ततत्तदुदाहरणैः स्पष्टं प्रतिभाति।

इतोऽप्यन्यद् 'र्वोरुपधाया दीर्घ इकः'[२] 'हलि च'[३] 'उपधायाञ्चेति'[४] दीर्घविधायकशास्त्रत्रयं 'सिपि धातोरुर्वा'[५] इति सूत्राद्धातोरिति पदमधिकृत्य धातोरुपधाया इकः दीर्घमनुशास्ति। ततश्च गीः, विस्तीर्ण, दीव्यति, मूर्च्छिता, ऊर्वितेत्यादिपदेषु दीर्घः सङ्गच्छते।

तदेवं दीर्घविधायकशास्त्राणामुत्सर्गापवादपरिशीलनप्रसङ्गे पूर्वपरयोरेकादेशदीर्घः, अङ्गस्य दीर्घः उत्तरपदे परे दीर्घः, धातोरुपधाया इको दीर्घश्चेति चतुर्धा दीर्घविधेर्वर्गीकरणमपि निष्पन्नम्।

---

१. यत्र शिष्टदीर्घप्रयोगे केनापि सूत्रेण दीर्घो न सङ्घटते, तत्रापि दीर्घो भवेदिति बुद्ध्या 'अन्येषामपि दृश्यते' इति शास्त्रं प्रवर्तते। तेन केशाकेशि, पूरुष इत्यादिदीर्घविशिष्टशिष्टपदानामपि सङ्ग्रहो भवति। किन्तु शास्त्रेणानेन दीर्घविधानमपि बहुव्रीहिसमास एव दृश्यत इति मत्वा आचार्यः कात्यायनः शुनोदन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु' इति वार्तिकं प्रोक्तवान्। तेन शुनः परेषु दन्तदंष्ट्रादिषु सत्सु पूर्वपदस्य दीर्घः सामान्यतः तत्पुरुषे बहुव्रीहावपि भवति।

२. पा० सू० ८।२।७६

३. हलि चेति (८।२।७७) शास्त्रस्य निषेधरूपापवादत्वेन तु 'न भकुर्छुराम्' (८।२।७९) इति शास्त्रमुपतिष्ठते। तेन धुरं वहति धुर्यः, दिवि भवं दिव्यम्, तथा च कुर्यात्, छुर्यादित्यत्र दीर्घप्रतिषेधो दृश्यते।

४. पा० सू० ८।२।७८

५. पा० सू० ८।२।७४

ह्रस्वविधिविवेचनम्

दीर्घविधायकशास्त्राणामुत्सर्गापवादपरिशीलनान्तरं ह्रस्वविधायकशास्त्राणामपि तत्परिशीलनमावश्यकम्, यतो हि यत्र कुत्रापि ह्रस्वो भवति स च दीर्घस्यैव। दीर्घोऽपि कृत्रिमाकृत्रिमभेदेन द्विविधो दृश्यते। तत्र क्वचिदकृत्रिमस्य दीर्घस्य ह्रस्वः, क्वचिच्च कृत्रिमस्येति व्यवस्था परिलक्ष्यते। अतो दीर्घादनन्तरं ह्रस्वविधेर्विवेचनमिह प्रस्तुतमस्ति। ह्रस्वो हि 'संहितायाम्[1]' 'उत्तरपदे[2]' 'अङ्गस्ये[3]'–त्यधिकारत्रयमङ्गीकृत्य प्रवर्तते। तत्र तावत् 'संहितायाम्' अधिकारे 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च[4]' 'ऋत्यकः[5]' इति शास्त्रद्वयं ह्रस्वविधायकमुपतिष्ठते। तेन क्रमशश्चक्री अत्र, ब्रह्मा ऋषिरित्यत्र ह्रस्वविधिना सह प्रकृतिभावोऽपि सिध्यति। सिद्धे च प्रकृतिभावे चक्रि अत्रेत्यत्र यण्, ब्रह्म ऋषिरित्यत्र च गुणोऽपवाद्यते। उभयत्र ह्रस्वे कृते यदि प्रकृतिभावो न स्यात्तदा यण्गुणौ केन वार्येताम्। तस्मात्प्रकृतिभावविधेः सामर्थ्यादेवात्र यण्गुणौ न भवतः। सूत्रारम्भसामर्थ्याद् बलवत्वञ्चापवादकोटावन्तर्भवतीति प्रागुक्तम्।

तदेवमिह संहिताधिकारे यण्गुणयोः प्रकृतिभावोऽपवाद्यत्वेन सिद्धः।

अथ 'अलुगुत्तरपदे' इति सूत्रत उत्तरपदमधिकृत्य प्रवर्तमानो ह्रस्वविधिः प्रायोऽपवादशास्त्रविरहित एव प्रतिभाति। यतो हि 'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' इति शास्त्रेण ब्राह्मणितरा, ब्राह्मणितमा, ब्राह्मणिमता इत्यादौ घादिप्रत्ययपरे मताद्युत्तरपदे परे च औत्सर्गिको ह्रस्वो भवति। 'नद्याः शेषस्यान्यतरस्याम्' इति शास्त्रेण च वैकल्पिको ह्रस्वो ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा इत्यादौ ङीष्प्रत्ययान्तभिन्नस्य विधीयते। अस्यैव ह्रस्वस्य 'कृन्नद्याः प्रतिषेधो वक्तव्यः[6]' इति वार्तिकेन लक्ष्मीतरा तन्त्रीतरा, इत्यादौ ह्रस्वनिषेधो दृश्यते। अन्यदुत्तरपदे विधीयमानह्रस्वस्यापवादशास्त्रं नास्ति। उत्तरपदाधिकारे विधीयमानह्रस्वत्वे यत्र

१. 'संहितायाम्' ६।१।७२ इत्यत्र संहितापदेन वर्णानामत्यन्तः सन्निकर्षो गृह्यते। तथा च सूत्रमस्ति 'परः सन्निकर्षः संहिते' ति। यथा वाक्यार्थबोधे पदानामविलम्बेनोच्चारणरूपः सन्निधिरपेक्ष्यते, तथैव वर्णानां सन्धिविषयेऽप्यर्धमात्रिककाल एव गृह्यते। ततोऽधिककालव्यवधाने तु सन्धिर्न भवतीति सिद्धान्तः।

२. पा० सू० ६।३।१

३. पा० सू० ६।४।१

४. पा० सू० ६।१।१२७

५. पा० सू० ६।१।१२८

६. वा० पा सू० ६।३।४४

ब्राह्मणितरेत्यादिलक्ष्येस्वुत्तरपदन्न लभ्यते तत्रापि ह्रस्वो भवत्येव । यतो हि नामतो निर्दिष्टेषु प्रत्ययाप्रत्ययपरेषु ह्रस्वविधौ यत्रोत्तरपदसम्बन्धः सङ्घटते तत्रैव उत्तरपदाधिकारस्य सम्बन्धो बोध्यो न तु सर्वत्र। एतच्चोत्तरपदाधिकारस्थह्रस्वविधायकशास्त्रैः तदुदाहरणैश्च स्पष्टं प्रतिभाति ।

तदत्र सोदाहरणानि तच्छास्त्राणि सङ्गृह्यन्ते—

ह्रस्वविधायकशास्त्राणि		उदाहरणानि
'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः'	६।३।४२	ब्राह्मणितरा, ब्राह्मणितमा
'नद्याः शेषस्यान्यतरस्याम्'	६।३।४०	ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा
'उगितश्च'	६।३।४५	श्रेयसितरा, श्रेयसीतरा
'इको ह्रस्वोऽङ्यो गालवस्य'	६।३।६१	ग्रामणिपुत्रः, ग्रामणीपुत्रः
'एकतद्धिते च'	६।३।६२	एकरूप्यम्, एकमयम्, एकक्षीरम्
'ङ्यापोः संज्ञाछन्दसोर्बहुलम्'	६।३।६३	रेवतिपुत्रः, रोहिणिपुत्रः
'त्वे च'	६।३।६४	अजत्वम्, अजात्वम्
'इष्टकेषीकामालानां चित्ततूलभारिषु'	६।३।६५	इष्टकचितम्, इषीकतूलम्
'खित्यनव्ययस्य'	६।३।६६	कालिमन्या, हरिणिम्मन्येति ।

एवमङ्गाधिकारस्थह्रस्वविधिविषयेऽपि निषेधरूपापवादत्वेन वार्तिकत्रयं सूत्रद्वयञ्चोपतिष्ठते । अर्थादम्बार्थवाचिनां हे अम्ब, हे अक्क, हे अल्ल इत्यत्र ह्रस्वो दृश्यते—किन्तु हे अम्बाडे, हे अम्बाले, हे अम्बिके इत्यत्रैकार एव श्रूयते । अतः 'डलकवतीनां प्रतिषेधो वक्तव्य[1]' इति वार्तिकेन ह्रस्वोऽपवाद्यते । ततश्च 'सम्बुद्धौ च[2]' इति सामान्यशास्त्रेणाकारस्यैकारो विधीयते। 'सम्बुद्धौ चे' ति शास्त्रं खलु 'अम्बार्थनद्योर्ह्रस्वः[3]' इति शास्त्रस्य अम्बार्थविषये उत्सर्गभूतमस्ति अत एवात्र तदपेक्षयापवादभूतस्यास्य ह्रस्वस्यापि प्रतिषेधोऽनेन वार्तिकेन क्रियते । ततश्चापवादस्याप्यपवादकत्वेन 'डलकवतीनां प्रतिषेधो वक्तव्यः' इति वार्तिकस्य-हे अम्बाडे इत्यादौ प्रतिप्रसवरूपत्वं सिध्यति । एतच्च प्रतिप्रसवरूपत्वं भाषायां विभाषारूपं भजते । तेन हे अम्बाड, हे अम्बाडे इत्युभयमपि तत्र प्रयुज्यते । तदर्थञ्च द्वितीय' वार्तिक-

१. वा० पा० सू० ७।३।१०७
२. „ पा० सू० ७।३।१०६
३. पा० सू० ७।३।१०७

मनुशास्ति--'छन्दसि वेति वक्तव्यमिति[१]। एवं तलप्रत्ययान्तघटितस्याबन्ताङ्गस्यापि 'ङिसम्बुद्ध्योर्विभाषा ह्रस्वत्वं' देवते भक्तिः, देवतायां भक्तिः, हे देवत, हे देवते इत्यत्र समुपलभ्यते। तथा वार्तिकरूपानुशासनमस्ति 'तलो ह्रस्वो वा ङिसम्बुद्ध्योरिति वक्तव्यमिति[२]। एतच्च ह्रस्वत्वं वैदिकभाषायामेव दृश्यते। अत एव 'छन्दस्येव ह्रस्वत्वमिष्यते[३]' इति महाभाष्यकारस्य पतञ्जलेर्दिष्टिरिह जागर्ति।

ह्रस्वविधेरपवादभूतं तृतीयं वार्तिकं विद्यते अभ्यासस्यानचीति[४]। तथा हि 'ह्रस्वः[५] इति शास्त्रेण ढौकृधातोर्लिटि 'डुढौके' इत्यत्र अभ्यासस्य ह्रस्वो भवति। स च ह्रस्वोऽज्भिन्ने परे भवतु, एतदर्थम्-'अभ्यासस्यानचीति' वार्तिकं प्रवर्तते। तेन चराचरः, चलाचल इत्यादावपि ह्रस्वो न जायते। वस्तुतस्तु आगमविधानसामर्थ्यादेवात्र ह्रस्वत्वमभ्यासलोपश्च न भवतः। तथा च व्याख्यातं भट्टोजिदीक्षितेन आगमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो हलादिशेषश्च नेति[६]। तदेवं ह्रस्वविधः प्रतिषेधरूपवार्तिकत्रयमपि व्याख्यातम्।

ह्रस्वनिषेधसूत्रद्वये च 'णौ चङ्युपधाया ह्रस्वः[७]' इत्युत्सर्गशास्त्रस्य निषेधरूपापवादभूतं प्रथमं सूत्रमस्ति—'नाग्लोपि शास्वृदिताम्[८]' इति। तेन अममालत्, अशशासत्, अममातत् इत्यादौ ह्रस्वो निषिध्यते अपि च किशोरिका, कुमारिका इत्यत्र 'केऽणः[९]' इति सूत्रेण यथा ह्रस्वो भवति तथा बहुकुमारिकः इत्यत्र ह्रस्वो न दृश्यते। तत्र हि 'न कपि[१०]' इति द्वितीयसूत्रं 'केऽणः' इति शास्त्रस्यापवादभूतमस्ति। अस्यापवादस्यापि वैकल्पिको निषेध आब्विषये दृश्यते। तेन बहुखट्वकः बहुखट्वाकः इत्युभयं व्यवह्रियते। तथा चानुशासनमस्ति- 'आपोऽन्यतरस्यामि'ति[११]।

तदेवमङ्गाधिकारस्थह्रस्वविधेर्वार्तिकत्रयं सूत्रद्वयं चापवादरूपेण विवेचितम्। अस्याधिकारेऽपि ह्रस्वविधायकशास्त्राणि अपवादविरहितानि सन्ति। तान्यपि चेह सोदाहरणं प्रस्तूयन्ते।

---

१. वा पा० सू० ७।३।१०७
२. वा० पा० सू० ७।३।१०७
३. पा० सू० ७।३।१०७
४. वा० पा० सू० ७।४।५९
५. पा० सू० ७।४।५६
६. सिद्धान्तकौमुद्याः कृदन्तप्रकरणम्।
७. पा० सू० ७।४।१
८. पा० सू० ७।४।२
९. पा० सू० ७।४।१३
१० पा० सू० ७।४।१४
११. पा० सू० ७।४।१५

ह्रस्वविधायकशास्त्राणि		उदाहरणानि
मितां ह्रस्वः	६।४।९२	घटयति, व्यथयति
खचि ह्रस्वः	६।४।९४	द्विषन्तपः, परन्तपः
ह्लादो निष्ठायाम्	६।४।९५	प्रह्लन्नः, प्रह्लन्नवान्
छादेर्घेऽद्व्युपसर्गस्य	६।४।९६	उरश्छदः, प्रच्छदः
इस्मन्त्रक्विषु च	६।४।९७	छदिः, छद्म
प्वादीनां ह्रस्वः	७।३।८०	पुनाति, लुनाति
मीनातेर्निगमे	७।३।८१	प्रमिणन्ति
सर्वनाम्नः स्याड्ढ्रस्वश्च	७।३।११४	सर्वस्यै विश्वस्यै
विभाषा द्वितीयातृतीयाभ्याम्	७।३।११५	द्वितीयस्यै, द्वितीयायै
भ्राजभासभाषदीपजीवमील-पीडामन्यतरस्याम्	७।४।३	अविभ्रजत्, अवभ्राजत्
शॄदॄप्रां ह्रस्वो वा	७।४।१२	विशश्रतुः, विशश्रुः
उपसर्गाद्ध्रस्व ऊहतेः	७।४।२३	समुह्यते, समुह्यगतः
एतेर्लिङि	७।४।२४	उदियात्, समियात् इति ।

एतान्यङ्गाधिकारस्थह्रस्वविधायकशास्त्राणि चापवादशून्यान्येव विराजन्ते । नह्यत्र केनापि विशेषशास्त्रेण प्रतिरोधो दृष्टः । ततश्चापवाद-विरहितान्यपि ह्रस्वविधायकशास्त्राणि प्रवर्तन्त इति निष्कर्षः ।

तदित्थमधिकारत्रयमाधारीकृत्य ह्रस्वविधिविषये सापवादशास्त्राणि निरपवादशास्त्राणि चेह विवेचितानि ।

लोपशास्त्रविमर्शः

शब्दानुशासने ह्रस्वदीर्घविध्योरिव लोपागमशास्त्रयोरपि व्यापकत्वेन प्रवृत्ति र्दृश्यते । अतः तदनु लोपागमशास्त्राणामुत्सर्गापवादत्वं विविच्यते । तत्र प्रथमं लोपशास्त्राणमुत्सर्गापवादत्वं विमृश्यागमशास्त्राणामपि तद् विचारयिष्यते । लोपस्तावत् शब्दसाधुत्वपद्धतौ क्वचित्प्रकृतिसम्बन्धी क्वचिच्च प्रत्ययसम्बन्धीति द्विविधो दृश्यते । अतोऽत्र पूर्वं प्रकृति सम्बन्धि लोप विधायकशास्त्राणि प्रस्तूयन्ते । कत्रापि पूर्ववदङ्गाधिकारस्थप्रकृतेर्लोप-सम्बन्ध्युत्सर्गापवादत्वं विमृश्यते । तत्रहि 'अनिदितां हल उपधायाः क्ङिति[1]' इत्युत्सर्गशास्त्रेण स्रंसु, ध्वंसु इत्याभ्यां धातुभ्यां क्तप्रत्यये सति स्रस्तः, ध्वस्त्रः इत्यादौ नलोपो भपति, किन्तु एष नलोपः अञ्चितः, इत्यत्र 'नाञ्चेः पूजायाम्[2]' शास्त्रेण प्रतिषिध्यते । ततश्च नलोपापवादभूतमेतच्छास्त्रमिति

१. पा० सू० ६।४।२४　　२. पा० सू० ६।४।३०

स्पष्टं प्रतिभाति। एवमेव स्कन्त्वा, स्यन्त्वा, इत्यत्रापि 'क्त्वि स्कन्दि स्यन्दोः[१]' इत्यपवादशास्त्रेण प्रकृतिसम्बन्धिनकारलोपो वार्यते। एवमत्र 'अनिदितां हल उपधाया क्ङिति' इत्युत्सर्गशास्त्रस्य निषेधरूपापवादभूतं शास्त्रद्वय प्रसिद्धम्[२]।

अङ्गाधिकारस्थप्रकृतिसम्बन्ध्यनुनासिकलोपश्च 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति[३]' इति शास्त्रेण यत्वा, यतः, रत्वा, रतः, इत्यादौ विधीयते। स च लोपः 'वा ल्यपि[४]' इति विशेषशास्त्रेण विकल्प्यते। तेन प्रयत्य, प्रयम्य, प्ररत्य, प्ररम्य, आगत्य, आगम्य, इत्युभयविधा अपि प्रयोगाः सिध्यन्ति। अस्यानुनासिकलोपस्य निषेधरूपापवादभूतं सूत्रमस्ति 'न क्तिचि दीर्घश्च[५]' तेन यम, रम, धातोः क्तिच् क्तौ च संज्ञायाम्[६]' इति शास्त्रेण क्तिच् प्रत्यये सति यन्ति, रन्ति, इत्यत्र नलोपो निषिध्यते।

एवं लिटि क्ङिति परतः पेचथुः, पेचुरित्यत्र 'अत एकहल्मध्येऽनादेशादेर्लिटि[७]' इत्युत्सर्गशास्त्रेणाकारस्यैकारादेशोऽभ्यासलोपश्च भवतः। एतदपवादभूतञ्च 'नशसददवादिगुणानाम्[८]' इति शास्त्रं प्रवर्तते। तेन विशसतुः, ददे, ववभतुः' विशशरतुरित्यादावेत्वाभ्यासलोपश्च निषिध्येते।

अपि च अभ्यासलोपविषये 'हलादिशेषः[९]' इत्युत्सर्गशास्त्रं प्रवर्तते। अनेन शास्त्रेण अभ्यासस्यादेर्हल् शिष्यतेऽन्ये हलो लुप्यन्ते। तेन बभूवेत्यत्र भूव्, भूव्, इति प्रक्रियादशायामभ्यासस्यादिर्हल् भकारः शिष्यते वकारश्च लुप्यते। एवं सर्वत्राभ्यासे सामान्यतः शास्त्रमिदमुपतिष्ठते, किन्त्वभ्यासस्य शर्पूर्वक खय्विषये 'शर्पूर्वाःखयः[१०]' इति विशेषशास्त्रेण तदपवाद्यते। ततश्च 'पस्पर्धे' इत्यत्र स्पर्ध-स्पर्ध इति दशायामादिहलोऽपि लोपो दृश्यते।

किञ्च अल्लोपोऽनः[११]' इति सामान्यशास्त्रेण अनन्ताङ्गस्य भस्याकारलोपो विधीयते। तेन राज्ञः, राज्ञेत्यादि प्रयोगा निष्पद्यन्ते, किन्तु

१. पा० सू० ६।४।३१

२. रङ्क्त्वा, रक्त्वा, मङ्क्त्वा, मक्त्वा, नंष्ट्वा, नष्ट्वा इति द्विविधं रूपं प्रयुज्यते।

३. तस्मादत्र 'जान्तनशां विभाषा' ६।४।३२ इति शास्त्रमपि नकारलोपस्य वैकल्पिकापवादरूपेणोपतिष्ठत इति ध्येयम्।

४. पा० सू० ६।४।३८

५. पा० सू० ६।४।३९

६. पा० सू० ३।३।१७४

७. पा० सू० ६।४।१२०

८. पा० सू० ६।४।१२६

९. पा० सू० ७।४।६०

१०. पा० सू० ७।४।६१

११. पा० सू० ६।४।१३४

वकारमकारान्तात् संयोगादुत्तरस्यानोऽकारस्य लोपो 'न संयोगाद्वमन्तात्[१]' इति विशेषशास्त्रेणापवाद्यते । ततश्च यज्वनः, ब्रह्मणः, इत्यादावनोऽकारस्य लोपो न दृश्यते ।

तदेवं नकारानुनासिकाभ्यासलोपानां निषेधरूपापवादशास्त्राणि क्रमशः विवेचितानि ।

इतः परं 'नस्तद्धिते[२]' इत्युत्सर्गशास्त्रेण विधीयमानस्य नकारान्तस्य भस्य टेर्लोपस्यापवादभूतानि शास्त्राणि विमृश्यन्ते । तानि च प्रकृतिभावरूपेण टेर्लोपस्यापवादभूतानि सन्ति । यथा सांकूटिनम्, सांराविणम्, इत्यत्र 'इनण्यनपत्ये[३]' इति विशेषशास्त्रेणानपत्यार्थेऽणि परतः इनन्तं यदङ्गं प्रकृतिवद्भवति । तेन टेर्लोपोऽत्रापवाद्यते । एवं 'गाथिविदथिकेशिगणिपणिनश्च[४]' 'संयोगादिश्च[५]' 'अन्[६]' 'ये चाभावकर्मणोः[७]' 'आत्माध्वानौ खे[८]' इति पञ्च सूत्रैरपि प्रकृतिभावमनुशास्ति महर्षिपाणिनिः । ततश्चास्य टेर्लोपस्यापवादरूपाण्येतावन्तीति निश्चीयते । एषामुदाहरणानि च क्रमशः गाथिनः, शाङ्खिनः, सामनः, सामान्यः, आत्मनीनः, इति प्रसिद्धानि सन्ति । 'अन् इति विशेषशास्त्रस्य विहितप्रकृतिभावविषये चायमत्र विशेषो दृश्यते यत् 'नस्तद्धिते' इति सामान्यशास्त्रविहितनकारान्तस्य भस्य टेर्लोपस्य 'अन्' इति विशेषशास्त्रेणापत्येऽनपत्ये चार्थेऽणि प्रकृतिभावः स्वीक्रियते । तेन राज्ञोऽपत्यंपुमान् राजन इत्यत्र प्रकृतिभाव एव भवति न तु टेर्लोपः । किन्तु 'नमपूर्वोऽपत्येऽवर्मणः' इति ततोऽपि विशेषशास्त्रेणाप्रकृतिभावरूपापवादोऽप्यपवाद्यते । ततश्च चन्द्रसाम्नोऽपत्यं चन्द्रसाम इत्यत्र टेर्लोपः प्रतिप्रसूयते ।

तदित्थमङ्गाधिकारस्थप्रकृतिसम्बन्धिलोपापवादशास्त्राणि निषेधरूपेण प्रकृतिभावरूपेण च प्रवर्तन्त इत्यवगतम् ।

अङ्गाधिकाराद्बहिर्भूतान्यपवादरूपाणि शास्त्राणि दृश्यन्ते । तत्रतावत् 'प्रत्ययः' इति शास्त्राधिकारे अनुकम्पितो वायुदत्तः इत्यर्थे 'बह्वचोमनुष्यनाम्नस्ठज्वा[९]' इति सूत्रेण ठच्प्रत्ययेसति 'ठाजादावूर्ध्वं द्वितीयादच[१०]' इत्युत्सर्गशास्त्रेण द्वितीयादच उर्ध्वं यच्छब्दरूपं तस्य लोपो भवति, तेन वायुकः

१. पा० सू० ६।४।१३७
२. पा० सू० ६।४।१४४
३. पा० सू० ६।४।१६४
४. पा० सू० ६।४।१६५
५. पा० सू० ६।४।१६६
६. पा० सू० ६।४।१६७
७. पा० सू० ६।४।१६८
८. पा० सू० ६।४।१६९
९. पा० सू० ५।३।७८
१०. पा० सू० ५।३।८३

इति सिध्यति। अनुकम्पितः शेवलदत्तः इत्यत्र तु ठचि शेवलिकः इति रूपं भवति, यतोहि 'शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्[१]' इति विशेषशास्त्रेण तृतीयादचस्तल्लोपविधानात् पूर्वोक्तशास्त्रस्यानेनापवादः स्पष्टः।

एवमुत्तरपदाधिकारस्थ 'नलोपो नञः[२]' इत्युत्सर्गशास्त्रस्यापवादशास्त्रमस्ति 'नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या[३]' इति। तेन नभ्राट्, नपात्, इत्यादौ प्रकृतिभावेन नलोपो वार्यते। अस्य नलोपस्य प्रकृतिभावस्तु 'नगोऽप्राणिष्वन्यतरस्याम्[४]' इति विशेषशास्त्रेण वैकल्पिको बोध्यः। तेन न गच्छतीति विग्रहे नगः, अगः, इति पदद्वयमपि व्यवह्रियते।

अपि च 'पूर्वत्रासिद्धम्[५]' इत्यधिकारान्तर्गतस्य 'नलोपः प्रातिपदिकान्तस्य[६]' इत्युत्सर्गशास्त्रस्य निषेधापवादरूपं शास्त्रं विद्यते। 'न ङिसम्बुद्ध्योः[७]' इति। तेन हे राजन्, हे तक्षन् इत्यत्र नकारः श्रूयत एव।

इत्थमिहाङ्गाधिकाराद्बहिर्भूतानि त्रीण्येवापवादशास्त्राणि सन्तीति निश्चीयते।

अपवादविरहितान्यपिप्रकृतिसम्बन्धिलोपविधायकानि शास्त्राणि बहूनि प्रवर्तन्ते। तेषां निर्वचनं यद्यपि प्रकृतनिबन्धविषयं नाङ्गीकरोति, यतोहि येषामुत्सर्गशास्त्राणामपवादशास्त्राणि लभन्ते तेषामेव विमर्शः प्रकृतप्रबन्धस्य विषयः, तथापि तत्परिचयोऽपीह प्रसङ्गतो भवेदिति भावनया समासतः सोदाहरणं संगृह्यन्ते।

शास्त्राणि	**तदुदाहरणानि**
कर्तुः क्यङ् सलोपश्च[८]	ओजायते ओजस् क्यङ् सकारलोपः
भृशादिभ्योभुव्यच्वेर्लोपश्च हलः[९]	सुमनायते सुमनस् ,, ,,
सर्वत्राण च तलोपश्च[१०]	हैमनम् हेमन्त, अण् तकारलोपः
तद्वानामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः[११]	वर्चस्वानुपधानोमन्त्रः आसामिष्टकानां वर्चस्याः वर्चस्वान् यत् मतुपो लुक्

१. पा० सू० ५।३।८४
२. पा० सू० ६।३।७३
३. पा० सू० ६।३।७५
४. पा० सू० ६।३।७७
५. पा० सू० ८।२।१
६. पा० सू० ८।२।७
७. पा० सू० ८।२।८
८. पा० सू० ३।१।११
९. पा० सू० ३।१।१२
१०. पा० सू० ४।३।२२
११. पा० सू० ४।४।१२५

स्तेनाद्यन्नलोपश्च[1]	स्तेयम् स्तेन, यत् नकारलोपः
पादशतस्य संख्यादेर्वीप्सायां वुन् नलोपश्च[2]	द्विपदिकां ददाति द्विपाद्वुन् प्रकृतेरन्त्यस्य लोपः
दण्डव्यवसर्गयोश्च[3]	द्विशतिकां व्यवसृजति द्विशत् वुन्
अरुर्मनश्चक्षुश्चेतो रहो रजसां लोपश्च[4]	अरूकरोति अरूस् चित्र
पादस्य लोपोऽहस्त्यादिभ्यः[5]	व्याघ्रपात् व्याघ्रपाद अन्त्यलोपः
संख्या सुपूर्वस्य[6]	द्विपात् द्विपाद अन्त्यलोपः
ककुदस्यावस्थायां लोपः[7]	अजातककुत् अजातककुद ,,
उद्विभ्यां काकुदस्य[8]	उत्काकुत् उत्काकुद ,,
पूर्णाद्विभाषा[9]	पूर्णकाकुत् पूर्णकाकुद ,,
लोपोव्योर्वलि[10]	युवजानिः युवजाया यकारलोपः
राल्लोपः[11]	मूः मुर्छाधा० क्विप् छकारलोपः
श्नान्नलोपः[12]	अनक्ति अञ्जूधा० लट्तिप् श्नम् प्र० नकारलोपः
दंशसञ्जस्वञ्जां शपि[13]	दशति दंशधातोः लट्तिप् शप् प्र० ,,
रञ्जेश्च[14]	रजति रञ्जधा० लट् तिप् शप् प्र० ,,
घञि च भावकरणयोः[15]	आश्चर्यो रागः रञ्जधा० घञ् प्र० ,,
भञ्जेश्च चिणि[16]	अभाजि भञ्जो धा० लुङ् चिण् नकारलोपः
गमः क्वौ[17]	अङ्गगत् गम्लृधा० क्विप् प्र० मकारलोपः
सनः क्तिचि लोपश्चास्यान्यतरस्याम्[18]	सति षण् धा० क्तिच् प्र० नकारलोपः
अतो लोपः[19]	चिकीर्षिता डुकृञ् धा० सन् लुट् तास् अकारलोपः
आतोलोप इटि च[20]	पपिथ पाधा० लिट् थल् प्र० आकारलोपः

---

१. पा० सू० ५।१।१२५
२. पा० सू० ५।४।१
३. पा० सू० ५।४।२
४. पा० सू० ५।४।५१
५. पा० सू० ५।४।१३८
६. पा० सू० ५।४।१४०
७. पा० सू० ५।४।१४६
८. पा० सू० ५।४।१४८
९. पा० सू० ५।४।१४९
१०. पा० सू० ६।१।६६
११. पा० सू० ६।४ २१
१२. पा० सू० ६।४।२३
१३. पा० सू० ६।४।२५
१४. पा० सू० ६।४।२६
१५. पा० सू० ६।४।२७
१६ पा० सू० ६।४।३३
१७. पा० सू० ६।४।४०
१८. पा० सू० ६।४।४५
१९. पा० सू० ६।४।४८
२०. पा० सू० ६।४।६४

गमहनजनखनघसां लोपः क्ङित्यनङि[1]	जग्मतुः गम्लृधा० लिट् अतुस् प्र० „
तन्निपत्योश्छन्दसि[2]	वितत्निरे कवयः तनुधा० लिट् झ प्र० उपधालोपः
घसिभसोर्हलि च[3]	सग्धिश्च मे अदधा० क्तिन् प्र० „
लोपो यि[4]	जह्यात् ओहाक् लिङ् तिप्यासुट् आलोपः
घ्वसोरेद्धावभ्यासलोपश्च[5]	देहि डुदाञ् धा० लोट् सिप् हि अभ्यासलोपः
थलि च सेटि[6]	पेचिथ डुपचष् धा० लिट् थल् अभ्यासलोपः
तॄफलभजत्रपश्च[7]	त्रेपे त्रपूष् धा० लिट् त एश् अभ्यासलोपः
राधो हिंसायाम्[8]	अपरेधतुः राधधा० लिट् तस् अतुस् „
वा जॄभ्रमुत्रसाम्[9]	भ्रेमतुः भ्रमु लिट् तस् अतुस् „
फणां च सप्तानाम्[10]	फेणतुः फणधा० लिट् तस् अतुस „
षपूर्वहन्धृतराज्ञामणि[11]	औक्ष्णः उक्षन् अण् अकारलोपः
विभाषा ङिश्योः[12]	राज्ञि राजन् ङि अकारलोपः
अचः[13]	प्राचः प्राञ्च् शस् „
आतो धातोः[14]	विश्वपः विश्वपा शस् अकारलोपः
मन्त्रेष्वाङ्यादेरात्मनः[15]	त्मनादेवेषु आत्मन् टा „
ति विंशतेर्डिति[16]	आसन्नविंशाः आसन्नविंशति डच् तिलोपः
टेः[17]	कतरत् कतर अदड् टिलोपः
अह्नष्टखोरेव[18]	उत्तमाहः उत्तमा हन् टच् „
ढे लोपोऽकद्र्वाः[19]	कामण्डलेयः कमण्डलु ढक् उकारलोपः
यस्येति च[20]	दाक्षिः दक्ष इञ् अकारलोपः
सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः[21]	मत्सी मत्स्य ङीष् यकारलोपः

---

१. पा० सू० ६।४।९८
२. पा० सू० ६।४।९९
३. पा० सू० ६।४।१००
४. पा० सू० ६।४।११८
५. पा० सू० ६।४।११९
६. पा० सू० ६।४।१२१
७. पा० सू० ६।४।१२२
८. पा० सू० ६।४।१२३
९. पा० सू० ६।४।१२४
१०. पा० सू० ६।४।१२५
११. पा० सू० ६।४।१३५
१२. पा० सू० ६।४।१३६
१३. पा० सू० ६।४।१३८
१४. पा० सू० ६।४।१४०
१५. पा० सू० ६।४।१४१
१६. पा० सू० ६।४।१४२
१७. पा० सू० ६।४।१४३
१८. पा० सू० ६।४।१४५
१९. पा० सू० ६।४।१४७
२०. पा० सू० ६।४१४८
२१. पा० सू० ६।४।१४९

तुरिष्ठेमेयस्सु[१]	करिष्ठः कर्तृ इष्ठन् तृलोपः
टेः[२]	प्रथिमा पृथु इमनिच् टेर्लोपः
स्थूलदूरयवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं-पूर्वस्य च गुणः[३]	स्थविष्ठः स्थूल इष्ठन् लकारलोपः
भस्य टेर्लोपः[४]	पथः पथिन् शस् टेर्लोपः
हलि लोपः[५]	आभ्याम् इदम् भ्याम् इद् लोपः
घेर्लोपोलेटि वा[६]	दधद्रत्नानि दाशुषे दधातेर्लेट्तिप् अकारलोपः
ओतः श्यनि[७]	श्यति, शोधा० लट् तिप् श्यन् उपधालोपः
लोपः पिबतेरीच्चाभ्यासस्य[८]	अपीप्यत् पाणिच् लुङ् तिप् चङ् उपधालोपः
कव्यध्वरपृतनस्यर्चि लोपः[९]	सपूर्वया निविदा कव्यतायोः कविक्यच् अन्त्यलोपः
तासस्त्योर्लोपः[१०]	कर्त्तासि डुकृञ्धा० लुट्तास् सकारलोपः
रिच[११]	भवितारौ भूधा० लुट् तस् तास् सकारलोपः
यीवर्णयोर्दीधीवेव्योः[१२]	आदीध्यगतः आदीधी ल्यप् ईकारस्य लोपः
अत्र लोपोऽभ्यासस्य[१३]	ईप्सति आप्लृ सन् लट् तिप् अभ्यासलोपः
संयोगान्तस्य लोपः[१४]	अनड्वान् अनडुह् सु हकारलोपः
स्कोः संयोगाद्योरन्ते च[१५]	भृट् भृस्ज् सु सकारलोपः
ढोढे लोपः[१६]	उवोट वह्धातोर्लिटि सिपि थलि—ढकारलोपः
रोरि[१७]	पुनारमते पुनर्रमते रेफलोपः
लोपः शाकल्यस्य[१८]	हर इह हरे इह यकारलोपः
ओतो गार्ग्यस्य[१९]	भो अच्युत भोस् अच्युत ,,
हलि सर्वेषाम्[२०]	भो देवाः भोस् देवाः ,,

१. पा० सू० ६।४।१५४
२. पा० सू० ६।४।१५५
३. पा० सू० ६।४।१५६
४. पा० सू० ६।१।८८
५. पा० सू० ७।२।११३
६. पा० सू० ७।३।७०
७. पा० सू० ७।३।७१
८. पा० सू० ७।४।४
९. पा० सू० ७।४।३९
१०. पा० सू० ७।४।५०
११. पा० सू० ७।४।५१
१२. पा० सू० ७।४।५३
१३. पा० सू० ७।४।५८
१४. पा० सू० ८।२।२३
१५. पा० सू० ८।२।२९
१६. पा० सू० ८।३।१३
१७. पा० सू० ८।३।१४
१८. पा० सू० ८।३।१९
१९. पा० सू० ८।३।२०
२०. पा० सू० ८।३।२२

हलो यमां यमिलोपः[1]	आदित्यः	आदित्यण्यप्र० ,,
झरो झरि सवर्णे[2]	उत्थानम्	उद्स्थानम् थकारलोपः

तदेवं निरपवादभूतान्येप्येतानि प्रकृतिसम्बन्धिलोपशास्त्राणि तत्तत्प्रकृतिप्रत्ययानाधारीकृत्य यथा प्रवर्तन्ते तथेह विविच्य संगृहीतानि।

प्रत्ययसम्बन्धिलोपशास्त्राणि

अथाङ्गाधिकारस्थप्रत्ययसम्बन्ध्युत्सर्गशास्त्राणि विमृश्यन्ते। यद्यपि तत्र प्रत्ययसम्बधिलोपविधायकोत्सर्गशास्त्राणि सन्ति बहूनि। किन्तु तदपवाद भूतानि सप्तैव परिलक्ष्यन्ते। तेषां विवेचनं तावदेवमस्ति यत् "वहोर्लोपो भूच बहोः[3] इति शास्त्रेण बहोरुत्तरेषामिष्ठनिमनिजीयसुन् प्रत्ययानामादेर्लोपः बहोः स्थाने भू, इत्ययमादेशश्च विधीयते। तेन भूयानित्यत्रेयसुन्प्रत्ययस्यादेर्लोपः, भूमेत्यत्र च इमनिच् प्रत्ययस्यादेर्लोपो दृश्यते। किन्तु भूयिष्ठ इत्यत्र "इष्ठस्य यिट् च[4]" इति विशेषशास्त्रेण इष्ठस्य यिडागमविधायकेन प्रत्ययादि लोपोऽपवाद्यते।

एवमग्रे पञ्चेन्द्राण्योदेवता अस्येति विग्रहे 'साऽस्यदेवता"[5] इति विहिताण् प्रत्ययस्य "द्विगोर्लुगनपत्ये[6]" इति शास्त्रेण लुकि सति "गोस्त्रियोरुपसर्जनस्य"[7] इति शास्त्रेण ह्रस्वत्वे प्राप्ते "लुकतद्धितलुकि"[8] इति विशेषशास्त्रेण उपसर्जनस्त्रीप्रत्ययस्यचलुकि पञ्चेन्द्रः इति रूपं निष्पद्यते। किन्तु पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः, इत्यत्र "आर्हाद् गोपुच्छसंख्यापरिमाणाट्ठक्[9]" इति शास्त्रविहितठक् प्रत्ययस्य "द्विगोर्लुगनपत्ये[10]" इति शास्त्रेण लुक्यपि 'लुकतद्धितलुकि" इत्युत्सर्गशास्त्रमपवाद्य "इद्गोण्याः" इति विशेषशास्त्रेण इकारादेशो विधीयते। तस्माल्लुक्तद्धितलुकि इति सामान्यशास्त्रस्यापवादभूतम् "इद्गोण्याः" इति शास्त्रमस्ति।

तदेवमङ्गाधिकारस्थ प्रत्यसम्बन्धिलोपापवादरूपेण 'इष्ठस्य इट् च' 'इद्गोण्याः' इति शास्त्रद्वयमेव व्याख्यातम्। एतदवशिष्टेषु पञ्चसु प्रथमं

१. पा० सू० ८।४।६४
२. पा० सू० ८।४।६५
३. पा० सू० ६।४।१५८
४. पा० सू० ६।४।१५९
५. पा० सू० ४।२।२४
६. पा० सू० ४।१।८८
७. पा० सू० १।२।४८
८. पा० सू० १।२।४९
९. पा० सू० ५।१।१९
१०. पा० सू० २।४।६१

तावत् 'नतौल्वलिभ्यः[१]' इत्यपवादशास्त्रम् 'इञः प्राचाम्[२]' इत्युत्सर्गशास्त्र-विहितयुवप्रत्ययलुको बाधकमस्ति । तेन तौल्वलेरपत्यं युवा इत्यर्थे 'यञि-ञोश्च' इति शास्त्रविहितफक् प्रत्ययस्य लुकि पन्नागारिः पिता, पन्नागारिः पुत्रः इतिवल्लुग् न भवति । तेन तौल्वलिः पिता तौल्वलायनः पुत्र इति सिध्यति ।

एवं 'यस्कादिभ्योगोत्रे[३]' इति शास्त्रविहितगोत्रप्रत्ययस्य लुगपवाद-भूतं 'गोत्रेऽलुगचि[४]' इति शास्त्रं प्रवर्तते । तेन 'गर्गाणां छात्राः गार्गीयाः' इत्यत्र गोत्रप्रत्ययस्य लुग् न भवति ।

एव 'यञञोश्च[५]' इति शास्त्रविहितस्य बहुषुवर्तमानस्य यञोऽञश्च गोत्रप्रत्ययस्य लुक 'न गोपवनादिभ्यः[६]' इति शास्त्रेणापवाद्यते । तेन गोप-वनस्य गोत्रप्रत्यावनीति विग्रहे 'अनृष्यानन्तर्येविदादिभ्योऽञ्[७]' इति शास्त्र-विहिताञ्प्रत्ययस्य लुग् न भवति । ततश्च ,गौपवनाः' इति सिध्यति ।

एवमग्रे कृत्वा, हित्वा, इत्यत्र अव्ययादुत्तरस्य सुपो लुग्भवति 'अव्ययादाप् सुपः[८]' इति शास्त्रेण । अस्यापवादभूत शास्त्रं 'नाव्ययीभावाद-तोऽम्त्वपञ्चम्याः[९]' इति शास्त्रं वर्तते । तेन 'उपकुम्भं तिष्ठति' इत्यत्रा-दन्तादव्ययीभावादुत्तरस्य सुपो लुग् न भवति । अपितु तत्स्थानेऽमादेशो विधीयते ।

एवमेव सूरसेनस्यापत्यं स्त्री इति विग्रहे 'जनपदशब्दात् क्षत्रियादञ्[१०]' इति सूत्रविहिताञ्प्रत्ययस्य 'अतश्च[११]' इति शास्त्रेण लुकि सति प्रत्यय-लक्षणमाश्रित्य जातित्वाद् ङीष् 'जातेरस्त्रीविषयादयोपधात्[१२]' इति सूत्रेण भवति । अत्र लुकि 'न लुमताङ्गस्य[१३]' इति शास्त्रेण प्रत्यलक्षणस्य निषेधस्तु न शङ्कयः अङ्गकार्यत्वाभावात् । अस्तु, एतस्यापि लुकोऽपवादशास्त्रमस्ति 'न प्राच्यभर्गादियौधेयादिभ्यः[१४]' । अत एव पञ्चालस्यापत्यं स्त्री पाञ्चाली, भार्गी, यौधेयी, इत्यत्र तद्धितप्रत्ययस्य लुग् न भवति ।

---

१. पा० सू० २।४।६०
२. पा० सू० ४।१।१०१
३. पा० सू० २।४।६३
४. पा० सू० ४।१।८९
५. पा० सू० २।४।६४
६. पा० सू० २।४।६७
७. पा० सू० ४।१।१०४
८. पा० सू० २।४।८२
९. पा० सू० २।४।८३
१०. पा० सू० ४।१।१६८
११. पा० सू० ४।१।१७७
१२. पा० सू० ४।१।६३
१३. पा सू० १।१।६३
१४. पा० सू० ४।१।१७८

तदित्थं न तौल्वलिभ्यः' 'गोत्रेऽलुगचि' 'न गोपवनादिभ्यः' 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' 'न प्राच्यभर्गादियौधेयादिभ्यः' इति पञ्चापि शास्त्राणि लुको निषेधरूपेणापवादभूतानि भवन्तीति सिद्धम् ।

प्रकृतिलोपवत् प्रत्ययसम्बन्धिलोपशास्त्राण्यपवादविवर्जितानीतस्ततो विकीर्णानि विद्यन्ते । अतस्तानि सर्वाण्यपीह प्रसङ्गतः सोदाहरणं संगृह्यन्ते ।

शास्त्राणि	तदुदाहरणानि
तस्य लोपः[१]	भवति भू० धा० लट्तिप्शप् अनुबन्धानां लोपः
ण्यक्षत्रियार्षञितो यूनि लुगणिञोः[२]	कौरव्यः कौरव्य-इञ् इञो लुक्
पैलादिभ्यश्च[३]	पैलः पैल-फिञ् फिञोलुक
तद्राजस्य बहुषु तेनैवास्त्रियाम्[४],	इक्ष्वाकवः इक्ष्वाकु-अञ् अञोलुक्
अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च[५]	अत्रयः अत्रि-ढक् ढकोलुक्
बह्वच इञः प्राच्यभरतेषु[६]	पन्नागाराः पन्नागार, इञ् इञोलुक्
तिककितवादिभ्यो द्वन्द्वे[७]	तिककितवाः तिक्, फिञ्, कितव, फिञोर्लुक्
उपकादिभ्योऽन्यतरस्यामद्वन्द्वे[८]	उपकलमकाः उपकफक्, लमकफक् फकोर्लुक्
आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्[९]	अगस्तयः अगस्त्य-अण् अणोलुक्
सुपोधातुप्रातिपदिकयोः[१०]	भूतपूर्वः पूर्वअम्, भूतसु स्वमोर्लुक्
अदिप्रभृतिभ्यः शपः[११]	अत्ति अद्लट्, तिप्, शप्, शपोलुक्
बहुलं छन्दसि[१२]	त्राध्वम् त्रैङ् धा० लोट्, ध्वम्, शप्, शपोलुक्
यङोऽचि च[१३]	बोभवीति भू, यङ्, लट्, तिप्, इट् यङोलुक्
जुहोत्यादिभ्यः श्लुः[१४]	जुहोति हु० लट्, तिप् शप् शपः श्लुः
बहुलं छन्दसि[१५]	दाति प्रियाणि चिद्वसु डुदाञ् लट्, तिप्, शप्, शपोलुक्
गतिस्थाघुपाभूभ्य सिचःपरस्मैपदेषु[१६]	अपात् पा लुङ् तिप् सिच् सिचोलुक्

१. पा० सू० १।३।९
२. पा० सू० २।४।५८
३. पा० सू० २।४।५९
४. पा० सू० २।४।६२
५. पा० सू० २।४।६५
६ पा० सू० २।४।६६
७. पा० सू० २।४।६८
८. पा० सू० २।४।६९
९. पा० सू० २।४।७०
१०. पा० सू० २।४।७१
११. पा० सू० २।४।७२
१२. पा० सू० २।४।७३
१३ पा० सू० २।४।७४
१४. पा० सू० २।४।७५
१५. पा० सू० २।४।७६
१६. पा० सू० २।४।७७

विभाषा घ्राधेट् शाच्छासः[1]	अधात् धेट् लुङ् तिप् सिच् सिचोलुक्
तनादिभ्यस्तथासोः[2]	अतत तनु लुङ् त सिच् ,,
मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमि-जनिभ्यो लेः[3]	अक्षन्नमीमदन्तहि अत्तोर्लुङि, झि, च्लि, च्लेर्लुक्
आमः[4]	एधाञ्चक्रे एध्लिट् आम् लिटोलुक्
अव्ययादाप्सुपः[5]	तत्र शालायाम् तत्र सु सोर्लुक्
इतश्च लोपः परस्मैपदेषु[6]	प्रणआयूंषितारिषत् तृ लिट् तिप्सिप्इट्-तिप इकारलोपः
स उत्तमस्य[7]	करवाब डुकृञ्लेट्वस् उ सकारलोपः
नित्यं ङितः[8]	भवाव भूलोट्वस् सकारलोपः
इतश्च[9]	अभवत् भूलङ् तिप् शप् अट् तिप इकारलोपः
द्विगोर्लुगनपत्ये[10]	पञ्चकपालः पञ्चकपाल अण् अणोलुक्
यूनि लुक्[11]	गलौचुकायनः गलौचुकायन अण् अणोलुक्
फक्फिञोरन्यतरस्याम्[12]	कातीयाः कात्य, फक् फकोलुक्
लुक् स्त्रियाम्[13]	वतण्डी वतण्ड अण् अणोलुक्
ढकि लोपः[14]	पैतृष्वसेयः पितृष्वस् ढक् ऋकारलोपः
मातृष्वसुश्च[15]	मातृष्वसीयः मातृष्वस् छण् ऋकारलोपः
कम्बोजाल्लुक्[16]	कम्बोजः कम्बोज अञ् अञोलुक्
स्त्रियामवन्तिकुन्तिकुरुभ्यश्च[17]	अवन्ती अवन्ति ञ्यङ् ञ्यङोलुक्
लुबविशेषे[18]	अद्यपुष्यः पुष्य अण् अणोलुक्
संज्ञायां श्रवणाश्वत्थाभ्याम्[19]	श्रवणारात्रिः श्रवणा अण अणोलुप्
प्रोक्ताल्लुक्[20]	पाणिनीयाः, पाणिनीय अण् अणोलुक्

---

१. पा० सू० २।४।७८
२. पा० सू० २।४।७९
३. पा० सू० २।४।८०
४. पा० सू० २।४।८१
५. पा० सू० २।४।८२
६. पा० सू० ३।४।९७
७. पा० सू० ३।४।९८
८. पा० सू० ३।४।९९
९. पा० सू० ४।१।१००
१०. पा० सू० ४।१।८८
११. पा० सू० ४।१।९०
१२. पा० सू० ४।१।९१
१३. पा० सू० ४।१।१०९
१४. पा० सू० ४।१।१३३
१५. पा० सू० ४।१।१३४
१६. पा० सू० ४।१।१७५
१७. पा० सू० ४।१।१७६
१८. पा० सू० ४।२।४
१९. पा० सू० ४।२।५
२०. पा० सू० ४।२।६४

सूत्राच्चकोपधात्[1]	अष्टकाः अष्टक् अण् अणोलुक्
जनपदे लुप्[2]	पञ्चालाः पञ्चाल अण् अणोलुप्
वरणादिभ्यश्च[3]	वरणाः वरणा अण् अणोलुप्
शर्कराया वा[4]	शर्करा शर्करा अण् अणोलुप्
श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्[5]	श्रविष्ठः श्रविष्ठा अण् अणोलुक्
स्थानान्तगोशालखरशालाच्च[6]	गोस्थानः गोस्थान अण् अणोलुक्
वत्सशालाभिजिदश्वयुक्छतभिषजो वा[7]	वत्सशालः वत्सशाल अण् अणोलुक्
नक्षत्रेभ्यो बहुलम्[8]	रोहिणः रोहिणी अण् अणोलुक्
कठचरकाल्लुक्[9]	कठाः कठणिन् णिनोलुक्
फले लुक्[10]	आमलकम् आमलकी णिनोलुक्
लुप् च[11]	जम्बूः जम्बूमयट् मयटोलुप्
हरितक्यादिभ्यश्च[12]	हरीतक्यः हरीतकी अञ् अञोलुप्
कंसीयपरशव्ययोर्यञञौलुक् च[13]	कंसीयम् कंसीययञ् यञ् प्रत्ययलोपः
लवणाल्लुक्[14]	लवणः लवण ठक् ठञ्लोपः
मधोर्ञ च[15]	मधुः मधु ञ ञप्रत्ययस्य लुक्
एकधुराल्लुक् च[16]	एकधुरः एकधुरा ख खप्रत्ययस्य लुक्
अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्[17]	अध्यर्धकंसम् अध्यर्धकंस कन् कनोलुक्
विभाषाकार्षापणसहस्राभ्याम्[18]	अध्यर्धकार्षापणम् अध्यर्धकार्षापण टिठन् टिठनोलुक्
द्वित्रिपूर्वान्निष्कात्[19]	द्विनिष्कम् द्विनिष्क-ठञ् ठञोलुक्

१. पा० सू० ४।२।६५
२. पा० सू० ४।२।८१
३. पा० सू० ४।२।८२
४. पा० सू० ४।२।८३
५. पा० सू० ४।३।३४
६. पा० सू० ४।३।३५
७. पा० सू० ४।३।३६
८. पा० सू० ४।३।३७
९. पा० सू० ४।३।१०७
१०. पा० सू० ४।३।१६३
११. पा० सू० ४।३।१६६
१२. पा० सू० ४।३।१६७
१३. पा० सू० ४।३।१६८
१४. पा० सू० ४।४।२४
१५. पा० सू० ४।४।१२९
१६. पा० सू० ४।४।७९
१७. पा० सू० ५।१।२८
१८. पा० सू० ५।१।२९
१९. पा० सू० ५।१।३०

विस्ताच्च[१]	द्विविस्तम् द्विविस्त-ठञ् ठञोलुक्
कुलिजाल्लुक् खौ च[२]	द्विकुलिजि द्विकुलिज ठञ् ठञोलुक्
वर्षाल्लुक् च[३]	द्विवर्षः द्विवर्ष-ख-ख प्रत्ययस्य लुक्
चितवतिनित्यम्[४]	,, ,, ,,
अध्यायानुवाकयो र्लुक्[५]	गर्दभाण्डः गर्दभाण्ड छ छप्रत्ययस्य लुक्
तावतिथंग्रहणमितिलुग्वा[६]	द्विकम् द्वितीय-कन् तीयस्य लुक्
अञ्चेर्लुक्[७]	प्राची प्राची अस्तातिं अस्ताते र्लुक्
मानपश्वङ्गयोः कन्लुकौ च[८]	अष्टमः अष्टम-ञ ञप्रत्ययस्य लुक्
एकादाकिनिच्चा सहाये[९]	एकः एक-कन् कनोलुक्
विन्मतोर्लुक्[१०]	स्रजिष्ठ स्रग्विन्-इष्ठन् इष्ठनोल्लुक्
लुम्मनुष्ये[११]	चञ्चा चञ्चा-कन् कनोलुप्
जीविकार्थे चापण्ये[१२]	वासुदेवः वासुदेव-कन् ,,
देवपथादिभ्यश्च[१३]	देवपथः देवपथ-कन् ,,
वेरपृक्तस्य[१४]	ब्रह्महा ब्रह्महन्-क्विप् वकारलोपः
हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्[१५]	राजा राजन् सु सकारलोपः
एङ् ह्रस्वात्सम्बुद्धेः[१६]	हे देवदत्त देवदत्त-सु सम्बुद्धेर्लोपः
शेश्छन्दसि बहुलम्[१७]	यातेगात्राणाम् यद्-शि शेर्लोपः
एतत्तदोः सुलोपोऽकोरनञ्समासे हलि[१८]	एषददाति एतद्-सु सोर्लोपः
स्यश्छन्दसि बहुलम्[१९]	एषस्य भानुः त्यद्-सु सोर्लोपः
सोऽचिलोपे चेत्पादपूरणम्[२०]	सोमामविड्ढिप्रभृतिम् तद्-सु ,,
यस्य हलः[२१]	सोसूचिता सूचयङ् लुट् यकारलोपः

१. पा० सू० ५।१।३१
२. पा० सू० ५।१।५५
३. पा० सू० ५।१।८८
४. पा० सू० ५।१।८९
५. पा० सू० ५।२।६०
६. पा० सू० ५।२।७७
७. पा० सू० ५।३।३०
८. पा० सू० ५।३।५१
९. पा० सू० ५।३।५२
१०. पा० सू० ५।३।६५
११. पा० सू० ५।३।९८
१२. पा० सू० ५।३।९९
१३. पा० सू० ५।३।१००
१४. पा० सू० ६।१।६७
१५. पा० सू० ६।१।६८
१६. पा० सू० ६।१।६९
१७. पा० सू० ६।१।७०
१८. पा० सू० ६।१।१३२
१९. पा० सू० ६।१।१३३
२०. पा० सू० ६।१।१३४
२१. पा० सू० ६।४।४९

क्यस्य विभाषा[1]	समिधिता समिध क्यच् यकारलोपः
णेरनिटि[2]	अचीकमत कमु णिङ् त णेर्लोपः
निष्ठायां सेटि[3]	कारितम् डुकृञ् णिच् क्त णेर्लोपः
चिणोलुक्[4]	अदीपि दीपी धा० लुङ् तच्लेश्चिण् तकारलोपः
अतो हेः[5]	भव भूलोट् सेर्हि हेर्लुक्
उतश्च प्रत्ययादसंयोगपूर्वात्[6]	चिनु चिञ् धा० लोट्सेर्हिश्नु लुक्
लोपश्चास्यान्यतरस्यां म्वो[7]	श्रृण्वः श्रुधा० लट्वस्श्नु प्रत्ययोकारलोपः
नित्यं करोतेः[8]	कुर्वः डुकृञ्धा० लट्वस्श्नु ,,
ये च[9]	कुर्यात् डुकृञ्धा० लिङ् तिप्श्नुयासुट् ,,
श्नसोरल्लोप[10]	रून्धः रूधिर् धा० लट्तस्श्नम् अकारलोपः
श्नाभ्यस्तयोरातः[11]	जहति ओहाक् धा लट्झिश्लु अकारलोपः
हलस्तद्धितस्य[12]	गार्गी गार्ग्यङीप् यकारलोपः
आपत्यस्य च तद्धितेऽनाति[13]	गार्गीयाः गार्ग्यछप्र० ,,
क्यच्व्योश्च[14]	गार्गीभवति–गार्ग्यच्वि ,,
बिल्वकादिभ्यश्छस्य लुक्[15]	बैल्वकाः बिल्वकीय-अण् छस्य लुक्
षड्भ्योलुक्[16]	षट् षष्-जस् जसोर्लुक्
स्वमोर्नपुंसकात्[17]	दधि दधि-सु सोर्लुक्
सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः[18]	परमेव्योमन् व्योमन्-ङि ङेर्लुक्
लोपस्त आत्मनेपदेषु[19]	देवाअदुह्र दुह् लङ् झअत् तकारलोपः
लिङः सलोपोऽनन्त्यस्य[20]	कुर्यात् डुकृञ्धा० लिङ् तिप् यासुट्सकारलोपः
शेषेलोपः[21]	त्वम् युष्मद्-सु टेर्लोपः

---

१. पा० सू० ६।४।५०
२. पा० सू० ६।४।५१
३. पा० सू० ६।४।५२
४. पा० सू० ६।४।१०४
५. पा० सू० ६।४।१०५
६. पा० सू० ६।४।१०६
७. पा० सू० ६।४।१०७
८. पा० सू० ६।४।१०८
९. पा० सू० ६।४।१०९
१०. पा० सू० ६।४।१११
११. पा० सू० ६।४।११२
१२. पा० सू० ६।४।१५०
१३. पा० सू० ६।४।१५१
१४. पा० सू० ६।४।१५२
१५. पा० सू० ६।४।१५३
१६. पा० सू० ७।१।२२
१७. पा० सू० ७।१।२३
१८. पा० सू० ७।१।३९
१९. पा० सू० ७।१।४१
२०. पा० सू० ७।२।७९
२१. पा० सू० ७।२।९०

अदस औ सुलोपश्च[१] असौ अदस् सु सोर्लोपः
क्सस्याचि[२] अधृक्षाताम् गृहूलुङ्, आताम् अट् अकारलोपः
लुग्वादुहदिहलिहगुहामात्मनेपदे दन्त्ये[३] अदुग्ध दुह् लुङ्, त, च्लेःक्सः क्सस्य लोपः
धि च[४] एधिताध्वे एध. लुट्,ध्वम्, तास्, सकारलोपः
झलो झलि[५] असैद्धाम् षिध्लुङ् तस् सिच् „
ह्रस्वादङ्गात्[६] अभृत भृञ् लुङ् तस् सिच् „
इट ईटि[७] आतीत अत लुङ्, तिप्, सिच्, इट्, ईट्, सकारलोपः

तदेवमपवादविनिर्मुक्तप्रत्ययसम्बन्धि लोपशास्त्राणां परिचयोऽपि सम्पन्नः।

आगमविधिविमर्शः

लोपसम्बन्ध्युत्सर्गापवादविवेचनानन्तरं प्रतिज्ञातागमसम्बन्ध्युत्सर्गापवादशास्त्राणि विमृश्यन्ते। तत्रापि पूर्ववदङ्गाधिकारस्थागमशास्त्राण्येव प्रस्तूयन्ते। तत्र तावद्यथाक्रममुत्सर्गशास्त्राणां चत्वारि निषेधरूपाण्यपवादशास्त्राणि प्रवर्तन्ते। तद्यथा 'लुङ्लङ्लृङ्क्ष्वडुदात्तः[८]' इति सामान्यसूत्रेण धातोः प्राग्विहितोऽडागमो 'नमाङ्योगे[९]' इति विशेषशास्त्रेण प्रतिषिध्यते। तेन 'मा भवान् भूत, मा शुचः' इत्यादि सिध्यति। एष निषेधरूपापवादशास्त्रं यथा 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सामान्यशास्त्रं बाधते, तथैव 'आडजादीनाम्[१०]' इति तद्विशेषशास्त्रमपि प्रबाधते। अत एव 'मा भवान् अतीत्' इत्यत्र आट् नोपलभ्यते। वैदिकप्रयोगे 'जनिष्ठा उग्रः काममूनयीत्' इत्यादौ अमाङ्योगेऽपि क्वचिदडादौ न दृश्येते तत्तु छान्दसत्वात् समाधेयम्। छन्दसि दृष्टानुविधेर्जागरूकत्वात्। अतएव महर्षिपाणिनिः 'बहुलं छन्दस्यमाङ्योगेऽपि[११]' इत्यनुशास्ति।

एवं रन्धयति, रन्धकः इत्यत्र अजादौ प्रत्यये नुमागमो 'रधिजभोरचि[१२]' इति शास्त्रेण विधीयते। किन्तु, रधिता, रधितुम् इत्यत्र 'नेट्यलिटि-

१. पा० सू० ७।२।१०७
२. पा० सू० ७।३।७२
३. पा० सू० ७।३।७३
४. पा० सू० ८।२।२५
५. पा० सू० ८।२।२६
६. पा० सू० ८।२।२७
७. पा० सू० ८।२।२८
८. पा० सू० ६।४।७१
९. पा० सू० ६।४।७४
१०. पा० सू० ६।४।७२
११. पा० सू० ६।४।७५
१२. पा० सू० ६।४।६१

रधेः[1]' इति शास्त्रेण इडादावलिटि तत्प्रतिषिध्यते।

एवमेवाग्रे 'न सुदुर्भ्यां केवलाभ्याम्[2]' इत्यपवादशास्त्रेण 'उपसर्गात् खलघञोः[3]' इति शास्त्रविहितनुमागमस्य निषेधो भवति। तेन सुलभम्, दुर्लभम् सुलाभो दुर्लाभः इत्यत्र खल् घञ् प्रत्यययोः परतः नुम् नोपयुज्यते।

नुमागमनिषेधस्य च द्वितीयंशास्त्रमस्ति। 'नाभ्यस्ताच्छतु[4]' इति अनेन निषेधापवादशास्त्रेण 'उगिदचां सर्वनामस्थानेऽधातो[5]' इत्युत्सर्गशास्त्र-विहितनुमागमो वार्यते। तेन ददत्, ददतौ, ददतः इत्यत्र नुमभावः सिध्यति।

अथ "चतुरनडुहोरामुदात्त.[6] इति शास्त्रेण चत्वारः अनड्वान्, इत्यत्र आमागमो दृष्टः। हे प्रियचत्वः, हे अनड्वन् इत्यत्र तु 'अम् सम्बुद्धौ' इति विशेषशास्त्रेण अमागमो विधीयते तम्प्रबाध्य।

आगमेष्विडागमस्य क्षेत्रं व्यापकमस्ति। अतस्तदुत्सर्गापवादशास्त्राणि प्रस्तूयन्ते। तत्र तावद 'आर्धधातुकस्येड्बलादेः' इत्युत्सर्गशास्त्रं सर्वतो व्यापकं वर्तते। एतन्निषेधाय पूर्वतः प्रवृत्तमस्ति 'नेड्वशिकृति[7]' इति शास्त्रम्। तेन ईश् धातोः वरच् प्रत्यये ईश्वर इत्यत्रेट् प्रतिषेधः सिध्यति।

एवमन्यान्यपीटः प्रतिषेधरूपाणि शास्त्राणि प्रवर्तन्ते, तेषामिह सोदाहरणं परिचयमुपस्थाप्य, तत्रापि यानि प्रतिप्रसवरूपेणापवादशात्राणि मिलन्ति, तेषांविवेचनं करिष्यते। तत्रेड्विधायकोत्सर्गशास्त्रतः प्राक् पठितानां निषेधरूपापवादशास्त्राणां क्रमश्चैवं दृश्यते।

शास्त्राणि	तदुदाहरणानि	
तितुत्रतथसिसुरकसेषु च[8]	योत्रम् यु-ष्ट्रन्	इडभावः
एकाच उपदेशेऽनुदात्तात्[9]	दाता–डुदाञ् तिप् तास्	"
श्र्युकः किति[10]	श्रित्वा–श्रिञ् क्त्वा	"
सनिग्रहगुहोश्च[11]	जिघृक्षति ग्रह सन् सम्प्रसारणं	"
श्वीदितो निष्ठायाम्[12]	शूनः दु ओश्वि क्त सम्प्रसारणम् नत्वम्	"

१. पा० सू० ७।१।६२
२. पा० सू० ७।१।६२
३. पा० सू० ७।१।६७
४. पा० सू० ७।१।६८
५. पा० सू० ७।१।६९
६. पा० सू० ७।२३५
७. पा० सू० ७।२।८
८. पा० सू० ७।२।९
९. पा० सू० ७।२।१०
१०. पा० सू० ७।२।११
११. पा० सू० ७।२।१२
१२. पा० सू० ७।२।१४

ओदितश्च[1]	भिन्नः ञि मिदा क्त	,,
विभाषाभावादिकर्मणोः[2]	प्रभिन्नः ञि मिदा क्त	,,
कृच्छ्रगहनयोः कष[3]	कष्टः कष् धा० क्त	इडभावः
घुषिरविशब्दने[4]	घुष्टा घुषिर् क्त टाप्	,,
अर्दः सन्निविभ्यः[5]	समर्णः समअर्द धा० क्त नत्वणत्वम्	,,
अभेश्चाविदूर्ये[6]	अभ्यर्णः-अभि अर्द धा० क्त नत्वणत्वम्	,,

एतानि शास्त्राणीटोनिषेधापवादरूपेण प्रवर्तन्ते । एषु सर्वेषु 'नेड्वशिकृति' इति सूत्रतोनकारपदमनुवर्तते । 'नेड्वशिकृति' इति सूत्रभाष्ये च भाष्यकारेण महर्षिपतञ्जलिना एष प्रश्नः उद्भावितो यत् 'किमर्थं पुरस्तात् प्रतिषेध उच्यते न विध्युत्तरकालः प्रतिषेधः क्रियते । तद्यथा—अन्यत्रापि विध्युत्तरकालः प्रतिषेधो भवति ॥ क्वान्यत्र ॥ कर्तरिकर्मव्यतिहारे' न गतिहिंसार्थेभ्य' इति । 'देवताद्वन्द्वे च' 'नेन्द्रस्य' (इति)। तत्रायमप्यर्थोद्विरिड्ग्रहणं न कर्तव्यं भवति, प्रकृतमनुवर्तते इति[7] । अस्यायंभावो यद्विधिशास्त्रोत्तरमेव निषेधशास्त्रस्य पाठः समुचितः, यतोहि ,अभावज्ञाने प्रतियोगिज्ञानमावश्यकमि'ति नियमः। स चेह न संघटते । यतः आर्धधातुकस्येड्वलादेः' इत्यादीनिसर्वाणीड्विधायकशास्त्राणि सर्वेभ्यो निषेधशास्त्रेभ्यः परस्तात् निर्दिष्टानि सन्ति । अपि च पुरस्तात् इड्विधायकशास्त्रनिर्देशे इह 'नेड्वशिकृति' इति निषेधसूत्रे पुनरिड्ग्रहणमपि न कर्तव्यं भवेदिति लाघवं स्यात् । एतत्समाधाने च तत्र पुरस्तात्पुनःप्रतिषेधे सत्यनारभ्यापवादोऽयं भवति । तेन यावानिण्नाम तस्य सर्वस्यैव प्रतिषेधः सिद्धो भवति' इत्युक्तम् । अर्थात् इड्विधायकशास्त्रात् पश्चाद् यदि पाठः स्यात् तदा अनन्तरस्य विधिर्वा भवति प्रतिषेधोवा इति न्यायेनानन्तरस्यैवेड्विधायकशास्त्रस्य निषेधः सम्भवेत् न तु सर्वस्य । एवमेव यदि मध्येपाठः स्यात्तदा 'मध्येऽपवादाः पूर्वान् बिधीन् बाधन्ते नोत्तरानिति न्यायेन पूर्वविधेरेव बाधः स्यात् न तूत्तरविधेः । इष्यते च 'नेड्वशिकृति' इति सूत्रतो नकारानुवर्तनं येषु पूर्वपरिगणितचतुर्दशसूत्रेषु भवति, तैः सूत्रैः स्वस्वनिमित्तैः सामान्यतः सर्वेषामिटां प्रतिषेधः सिद्धो भवेदिति । अत्र 'अनारभ्यापवादोऽयं भवति' इति वाक्येन निषेधशास्त्रस्याप्यपवादत्वं सुनिश्चितं भाति । 'न वृद्भ्य-

१. पा० सू० ७।२।१६
२. पा० सू० ७।२।१७
३. पा० सू० ७।२।२२
४. पा० सू० ७।२।२३
५. पा० सू० ७।२।२४
६. पा० सू० ७।२।२५
७. म० भा० ७।२।८

श्चतुर्भ्यः[१]' इति शास्त्रन्तु इड्विधायकशास्त्रतः परमस्ति। तेन वर्त्स्यति, अवर्त्स्यत, विवृत्सतीत्यत्र सकारादेरार्धधातुकपरस्मैपदेषु इण्निषेधः सिध्यति। अस्तु।

एषु निषेधरूपापवादादेषु केचनैवं भूता अप्यपवादाः सन्ति, येषां पुनरपवादशास्त्राणि प्रतिप्रसवरूपेण प्रवर्तन्ते। तद्यथा—नेड्वशिकृति' इति निषेधशास्त्रस्यापि निषेधकशास्त्रमस्ति—"वस्वेकाजाद्धसाम्[२]' तेन आदिमान् ददिवान् इत्यत्रेड् सिध्यति।

एवमसावीत् इत्यत्र 'स्तुसुधूञ्भ्यः परस्मैपदेषु[३]' इति विशेषशास्त्रेण 'एकाच उपदेशेऽनुदात्तात्' इति निषेधशास्त्रस्य बाधो भवति। अपि च हनिष्यति इत्यत्रापि 'ऋद्धनोस्ये[४]' इति शास्त्रस्य प्रवृत्तिर्भवति तन्निषेधशास्त्रमपवाद्यैव। एवम् उषितः इत्यत्र 'वसतिक्षुधोरिट्[५]' इति विशेषशास्त्रस्य प्रवृत्तिदर्शनात् 'एकाच उपदेशेऽनुदात्तात्' इति निषेधशास्त्रस्यावरोधो जातः।

'श्र्युकः किति' इति इटः प्रतिषेधशास्त्रस्यापवादशास्त्रन्तु 'जॄव्रश्च्योः क्त्वि[६]' इति वर्तते। तेन जरित्वा व्रश्चित्वा इत्यत्रेट् सिध्यति।

एवं 'तीषसहलुभरुषरिषः[७]' इति शास्त्रेण विहित विकल्पेटो 'यस्यविभाषा' इति शास्त्रेण निष्ठासंज्ञकप्रत्यये परतः निषेधरूपापवादः सामान्यतोदृष्टः, किन्तु रुष्टः रुषितः इत्यत्र 'रुष्यमत्वरसंघुषास्वनाम्[८]' इति विशेषशास्त्रेणापवादस्याप्यपवादो वैकल्पिको जातः, तेन रुषितः रुष्टः इत्युभयं रूपं निष्पद्यते। एवमेव हृषितानि, हृष्टानीत्यत्रापि 'हृषेर्लोमसु[९]' इति विशेषशास्त्रेण 'यस्य विभाषा' इति शास्त्रस्य बाधो भवति। तथा क्लिषितः, क्लिष्टः इत्युभयविधप्रयोगदर्शनात् 'क्लिशः क्त्वा निष्ठयोः[१०]' इति विशेषानुशासनेन पूर्वोक्तेट्निषेधापवादः स्वीक्रियते।

अपिच निष्कुषितः, अञ्चितः, लुभितः, इत्यत्र क्रमशः 'इण्निष्ठायाम्[११]' अञ्चेः पूजायाम्[१२]' 'लुभो विमोहने[१३]' इति विशेषानुशासनैः 'यस्य

१. पा० सूव ७।२।४६
२. पा० सू० ७।२।६७
३. पा सू० ७।२।७२
४. पा० सू० ७।२।७०
५. पा० सू० ७।२।५२
६. पा० सू० ७।२।५५
७. पा० सू० ७।२।४८
८. पा० सू० ७।२।२८
९. पा० सू० ७।२।२९
१०. पा० सू० ७।२।५०
११. पा० सू० ७।२।४७
१२. पा० सू० ७।२।५३
१३. पा० सू० ७।-।५४

विभाषा' इति शास्त्रस्य विहितेट्निषेधस्यापि निषेधो नित्यं क्रियते।

तदेवमिट्प्रतिषेधस्यापवादभूतानि शास्त्राण्यपि विवेचितानि। अतः परं यानि किल अपवादविनिर्मुक्तानीड्विधायकशास्त्राणि विराजन्ते तेषां विवेचनं सोदाहरणं प्रस्तूयन्ते।

शास्त्राणि	**तदुदाहरणानि**
स्नुक्रमोरनात्मनेपदनिमित्ते[1]	अक्रमीत् क्रमु धा० लुङ् तिप् सिच् इडागमः
इट्सनि वा[2]	विवरिषति वृञ् धा० सन् तिप् ,,
लिङ्सिचोरात्मनेपदेषु[3]	वरिषीष्ट वृञ् धा० लिङ् त सीयुट् ,,
ऋतश्च संयोगादेः[4]	स्तरिषीष्ट स्तृञ् धा० लिङ् त सीयुट ,,
रधादिभ्यश्च[5]	ररन्धिथ रध् धा० लिट् थल् ,,
निरः कुषः[6]	निष्कोषिता निः पू० कुष् धा० लुट् तिप् इडागमः
सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभर—ज्ञपिसनाम्[7]	दिदेविषति दिवु धा० सन् इडागमः
पूङश्च[8]	पवित्वा पू धा० क्त्वा ,,
उदितो वा[9]	शमित्वा शमु धा० क्त्वा ,,
सेऽसिचि कृतचृतच्छृदतृदनृतः[10]	नर्तिष्यति नृती धा० लृट् तिप् स्य ,,
गमेरिट् परस्मैपदेषु[11]	गमिष्यति गम्लृ धा० लृट् तिप् स्य ,,
विभाषा सृजि दृशोः[12]	ससर्जिथ सृज् धा० लिट् सिप् थल् ,,
इडत्त्यर्तिव्ययतीनाम्[13]	आदिथ अद् लिट् सिप् थल् ,,
विभाषा गमहनविदविशाम्[14]	जग्मिवान् गम्लृ धा० लृट् क्वसु ,,
अञ्जेः सिचि[15]	आञ्जीत् अञ्जू धा० लुङ् तिप् सिच् ,,
यमरमनमातां सक्च[16]	आधासीत् धेट् धा० लुङ् तिप् सिच् ,,
स्मिपूङ्रञ्ज्वशां सनि[17]	सिस्मयिषते स्मिङ् धा० सन् प्र० इडागमः

१. पा० सू० ७।२।३६
२. पा० सू० ७।२।४१
३ पा० सू० ७।२।४२
४. पा० सू० ७।२।४३
५. पा० सू० ७।२ ४५
६. पा० सू० ७।२।४६
७. पा० सू० ७।२।४९
८. पा० सू० ७।२।५१
९. पा० सू० ७।२।५६
१०. पा० सू० ७।२।५७
११. पा० सू० ७।२।५८
१२. पा० सू० ७।२।६५
१३. पा० सू० ७ २।६६
१४. पा० सू० ७।२।६८
१५. पा० सू० ७।२।७१
१६. पा० सू० ७।२।७३
१७. पा० सू० ७।२।७४

किरश्च पञ्चभ्यः[1]	चिकरिषति कृ धा० सन् लट् तिप् शप्	,,
रुदादिभ्यः सार्वधातुके[2]	रोदिति–रुदिर धा० लट् तिप् शप् लुक्	,,
ईशः से[3]	ईशिषे-ईश् धा० लट् थास् से शपो लुक् इडागमः	
ईडजनोर्ध्वे च[4]	ईडिषे-ईड् धा० लट् थास् से शपोलुक्	,,
ब्रुवईट्[5]	ब्रवीति ब्रूञ् धा० लट् तिप् शपोलुक्	,,
यङोवा[6]	बोभवीति भू यङ् लुक्लट् तिप् शपोलुक्	,,
तुरुस्तुशम्यमः सार्वधातुके[7]	रवीति-रुलट् तिप् शपो लुक्	,,
अस्तिसिचोऽपृक्ते[8]	अकार्षीत् डुकृञ् लुङ् तिप् सिच्	,,
रुदश्च पञ्चभ्यः[9]	अरोदीत्-रुदिर धा० लङ् तिप् शपोलुक्	,,

एतानीड्विधायकशास्त्राणि तत्तल्लक्ष्येषुनिर्वाधरूपेण प्रवर्तन्त इति निश्चयः ।

इड्विधायकोत्सर्गापवादविवेचनान्तरमागमान्तरविधायकशास्त्राणि विमृश्यन्ते ।

तत्र तावद् ऐजागमः तद्धितीयवृद्धिम्प्रबाध्य प्रवर्तते । तथाचैजागमविधायकसूत्राणि सन्ति 'नय्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' 'द्वारादीनाञ्च' 'न्यग्रोधस्य च केवलस्य' इति । एतानि च प्राक् 'तद्धितेष्वचामादेः' इति वृद्धिविधायकोत्सर्गशास्त्रस्यापवादरूपेण व्याख्यातानि । एषामप्यपवादभूतानि 'न कर्मव्यतिहारे[10]' 'स्वागतादीनाञ्च[11]' 'श्वादेरिञि[12]' इति त्रीणि सूत्राणि वर्तन्ते । अतएव व्यावक्रोशी, स्वागतिकः, श्वाभास्त्रिः, इत्यत्रैजागमो न दृश्यते एवम् "अर्तिह्रीब्लीरी क्नुयीक्ष्माय्यातांपुङ्णौ[13] इति शास्त्रविहितपुगागमस्य युग् जुग्भ्यामपवादो दृश्यते । तद्यथा शाययति अवच्छाययति इत्यादौ "शाच्छाशाह्वाव्यावेपां युक्"[14] इति विशेषशास्त्रेण पुकमपवाद्य युग्विधीयते । एवं वाजयति, इत्यत्र "ओ वैशोषणे" इत्यस्माद्-

---

१. पा० सू० ७।२।७६
२. पा० सू० ७।२।७७
३. पा० सू० ७।२।७७
४. पा० सू० ७।२।७८
५. पा० सू० ७।३।९३
६. पा० सू० ७।३।९४
७. पा० सू० ७।३।९५
८. पा० सू० ७।३।९६
९. पा० सू० ७।३।९८
१०. पा० सू० ७।३।६
११. पा० सू० ७।३।७
१२. पा० सू० ७।३।८
१३. पा० सू० ७।३।३६
१४. पा० सू० ७।३।३७

धातोः विधूननेऽर्थे "वो विधूनने जुक्"[१] इति विशेषशास्त्रेण जुगेव भवति न तु पुगिति ।

तदेवमङ्गाधिकारस्थागमविषयो विवेचितः । एतदधिकारबहिर्भूतमागमसम्बन्ध्यपवादशास्त्रमस्ति "यासुट् परस्मैपदेषूदात्तो ङिच्च"[२] इति । एतद्धि "लिङः सीयुट्"[३] इति सामान्यशास्त्रेण विहितसीयुटमपवाद्य प्रवर्तते सामान्यत आत्मनेपदे परस्मैपदे चेत्युभयत्र सीयुटः प्रवृत्ति र्भवति । तत्र "यासुट् परस्मैपदेषूदात्तो ङिच्च" इत्यत्र परस्मैपदनिर्देशात् परस्मैपदे यासुडेव भवति न तु सीयुडित्यपवादफलं सिध्यति ।

तदेवमागमसम्बन्ध्युत्सर्गापवादशास्त्राणि विवेचितानि । ये किलापवादविरहितान्यप्यागमविधायकशास्त्राणि यत्र तत्र पाणिनीयशब्दानुशासने समागतानि तानि सर्वाणीह सोदाहरणं संगृह्यन्ते ।

शास्त्राणि	तदुदाहरणानि
दीङो युडचि क्ङिति[४]	उपदिदीये दीङ् धा० लिट् त एश् युडागमः
छन्दस्यपि दृश्यते[५]	आनट् णश् धा० लुङ् तिप् लेर्लुक् आडागमः
इष्ठस्य यिट् च[६]	भूयिष्ठः बहु इष्ठन् यिडागमः
शीङोरुट्[७]	शेरते शीङ धाः लट् झ अत् रुडागमः
वेतेर्विभाषा[८]	संविद्रते सम् विद्धा० लट् झ अत् रुडागमः
बहुलं छन्दसि[९]	दुह धा० लट् झस्यादादेशे रूडागमः
इदन्तोमसि[१०]	नभोभरन्त एनसि इण् धा० लट् मस् इडागमः
क्त्वो यक्[११]	दिवं सुपर्णो गत्वाय गम्लृ क्त्वा अनुनासिकलोपः यगागमः
आज्जसेरसुक्[१२]	ब्राह्मणासः ब्राह्मणजस् असुगागमः
अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि[१३]	अश्वस्यति अश्व-क्यच् लट् तिप् असुगागमः

१. पा० सू० ७।३।३८
२. पा० सू० ३।४।१०३
३. पा० सू० ३।४।१०२
४. पा० सू० ६।४।६३
५. पा० सू० ६।४।७३
६. पा० सू० ६।४।१५९
७. पा० सू० ७।१।६
८. पा० सू० ७।१।७
९. पा० सू० ७।१।८
१०. पा० सू० ७।१।४६
११. पा० सू० ७।१।४७
१२. पा० सू० ६।१।५०
१३. पा० सू० ७।१।५१

आमि सर्वनाम्नः सुट्[1]	सर्वेषाम् सर्व-आम् सुडागमः
ह्रस्वनद्यापो नुट्[2]	वृक्षाणाम् वृक्ष-आम् नुडागमः
षट् चतुर्भ्यश्च[3]	षण्णाम् षष्-आम् ,,
श्री ग्रामण्योश्छन्दसि[4]	श्रीणामुदारोधरुण रयिणाम् श्री आम नद्यभावे नुडागमः
गोः पदान्ते[5]	विद्मा हि त्वा गोपतिं शूर गोनाम्-ओआम् ,,
इदितो नुम्धातोः[6]	नन्दति दुनदि लट् तिप् शप् नुमागमः
शे मुचादीनाम्[7]	मुञ्चति मुच्लृ धा० लट् तिप् श ,,
मस्जिनशोर्झलि[8]	ननंष्ठ णश् लिट् सिप् थल ,,
रभेरशब्लिटोः[9]	अररम्भत् रमिधा० णिच् लुङ तिप् नुमागमः
लभेश्च[10]	अललम्भत् लभष् धा० णिच् लुङ ,,
आङोयि[11]	आलम्भ्यः आलभष् ण्यत् ,,
उपात् प्रशंसायाम्[12]	उपलम्भ्यः उपलभष् ण्यत् ,,
विभाषा चिण्णमुलोः[13]	अलम्भि लभष् लुङ् तिप् चिण् ,,
युजेरसमासे[14]	युङ् युज् सु ,,
नपुंसकस्य झलचः[15]	ज्ञानानि ज्ञान-जश् शि ,,
इकोऽचि विभक्तौ[16]	दधिनी दधि औ शी ,,
वा नपुंसकस्य[17]	ददन्ति ददत्-जश् शि नुमागमः
आच्छीनद्योर्नुम्[18]	तुदन्ती तुदत् औ-शी ,,
शप्श्यनोर्नित्यम्[19]	पचन्ती पचत् औ-शी ,,
सावनडुहः[20]	अनड्वान् अनडुह्-सु ,,
दृकस्ववस्स्वतवसां छन्दसि[21]	कीदृङ्ङिन्द्रः कीदृश-क्विन् ,,

१. पा० सू० ६।१।५२
२. पा० सू० ७।१।५४
३. पा० सू० ७।१।५५
४. पा० सू० ७।१।५६
५. पा० सू० ७।१।५७
६. पा० सू० ७।१।५८
७. पा० सू० ७।१।५९
८. पा० सू० ७।१।६०
९. पा० सू० ७।१।६३
१०. पा० सू० ७।१।६४
११. पा० सू० ७।१।६५
१२. पा० सू० ७।१।६६
१३. पा० सू० ७।१।६९
१४. पा० सू० ७।१।७१
१५. पा० सू० ७।१।७२
१६. पा० सू० ७।१।७३
१७. पा० सू० ७।१।७९
१८. पा० सू० ७।१।८०
१९. पा० सू० ७।१।८१
२०. पा० सू० ७।१।८२
२१. पा० सू० ७।१।८३

अम्सम्बुद्धौ[1]	हे प्रियचत्वः हे प्रिय-चतुर-सु अमागमः
आने मुक्[2]	पचमानं चैत्रं पश्य पच् लट् शानच् मुमागमः
आतोयुक् चिण्कृतोः[3]	दायिता-डुदाञ् लुट् तिप् चिण्वदिट् पक्षे युगागमः
लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने[4]	विलीनयति-ली० धा० णिच् लट् तिप् नुमागमः
	विलालयति-ला० धा० णिच् लट् तिप् लुगागमः
भियोहेतुभयेषुक्[5]	भीषयते ञिभी णिच् लट् तिप् षुगागमः
तृणह इम्[6]	तृणेढि तृह लट् तिप्श्नम् इमागमः
बहुलं छन्दसि[7]	सर्वमा इदम्-अस्तेर्लङ् तिप् शपोलुक् तलोपः आडागमः
अड्गार्ग्यगालवयोः[8]	अरोदत् रुदिर् लङ् तिप् शपोलुक् अडागमः
अदः सर्वेषाम्[9]	आदत् अद् लङ् तिप् शपोलुक् ,,
आण्नद्याः[10]	बहुश्रेयस्यै बहुश्रेयसी ङे आडागमः
याडापः[11]	रमायै रमा ङे याडागमः
अस्यतेस्थुक्[12]	आस्थत् असुधा० लुङ् तिप् चङ् थुगागमः
पतः पुम्[13]	अपप्तत् पत्लृ-धा० लुङ् तिप् चङ् पुमागमः
वचः उम्[14]	अवोचत् ब्रुञ् तिप् अङ् उमागमः
तस्मान्नुड्द्विहलः[15]	आनर्द अर्द लिट् तिप् णल् नुडागमः
अश्नोतेश्च[16]	आनशे अशू लिट् त एश् ,,
नीग्वञ्चूस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्[17]	वनीवच्यते वञ्चु धा० यङ् लट् त नीगागमः
नुगतोऽनुनासिकान्तस्य[18]	यंयम्यते यम यङ् लट् त नुगागमः

१ पा० सू० ७।१।९९
२. पा० सू० ७।२।८२
३. पा० सू० ७।३।३३
४. पा० सू० ७।३।३६
५. पा० सू० ७।३।४०
६. पा० सू० ७।३।९२
७. पा० सू० ७।३।९७
८. पा० सू० ७।३।९९
९. पा० सू० ७।३।१००
१०. पा० सू० ७।३।११२
११. पा० सू० ७।३।११३
१२. पा० सू० ७।४।१७
१३. पा० सू० ७।४।१९
१४. पा० सू० ७।४।२०
१५. पा० सू० ७।४।७१
१६. पा० सू० ७।४।७२
१७. पा० सू० ७।४।८४
१८. पा० सू० ७।४।८५

जपजभदहदशभञ्जपशाञ्च[1]	जंजप्यते जप यङ् लट् त ,,
चरफलोश्च[2]	चंचूर्यते चर् यङ् लट् त ,,
रीगृदुपधस्य च[3]	वरीवृत्यते वृतु यङ् लट् त रीगागमः
रुग्रिकौच लुकि[4]	वर्वृतीति वृतु यङ् लुक् लट् तिप् रुगागमः
	वरीवृतीति रीगागमः
	वरिवृतीति रिगागमः
ऋतश्च[5]	चर्कर्ति डुकृञ् धा० यङ् लुक् लट् तिप् ,,
	चरीकर्ति ,,
	चरिकर्ति ,,
आडुत्तमस्य पिच्च[6]	भवानि भूलोट् मिप् शप् आडागमः
लोटोऽडाटौ[7]	तारिषत् तृलेट् तिप् इकारलोप सिच इट् अडागमः
	पताति पत् लेट् तिप् आडागमः
सुट्तिथोः[8]	एधिषीष्ट एध सीयुट् सुट् त सुडागमः
अन्तर्वत्पतिवतोर्नुक्[9]	अन्तर्वत्नी अन्तर्वत्-ङीप् नुगागमः
इन्द्रवरुणभवशर्वरूद्रमृडहिमारण्ययव— यवनमातुलाचार्याणामानुक्[10]	इद्राणी इन्द्र-ङीष् आनुगागमः
भ्रुवोवुक् च[11]	भ्रौवेयः भ्रू-ढक् वुगागमः
वाकिनादीनां कुक्च[12]	वाकिनकायनिः वाकिन-फिञ् कुगागमः
पुत्रादन्यतरस्याम्[13]	गार्गी पुत्रिकायणिः गार्गी पुत्र-फिञ् कुगागमः
मनोर्जातावञ्यतौषुक्च[14]	मानुषः मनु-अञ् षुगागमः
नडादीनां कुक्च्[15]	नडकीयम् नड, छप्र० कुगागमः
श्वसस्तुट् च[16]	शौवस्तिकम् श्वस्-ठञ् तुडागमः

१. पा० सू० ७।४।८६
२. पा० सू० ७।४।८७
३. पा० सू० ७।४।९०
४. पा० सू० ७।४।९१
५. पा० सू० ७।४।९२
६. पा० सू० ३।४।९२
७. पा० सू० ३।४।९४
८. पा० सू० ३।४।१०७
९. पा० सू० ४।१।३२
१०. पा० सू० ४।१।४९
११. पा० सू० ४।१।१२५
१२. पा० सू० ४।१।१५८
१३. पा० सू० ४।१।१५९
१४. पा० सू० ४।१।१६१
१५. पा० सू० ४।२।९१
१६. पा० सू० ४।३।१५

सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यस्टयुटयुलौतुट्च[1]	सायन्तनम् सायम-टयु ,,
विभाषा पूर्वाह्णापराह्णाभ्याम्[2]	पूर्वाह्णतनम् पूर्वाह्णटयु ,,
त्रपुजतुनोःषुक्[3]	त्रापुषम् त्रपुन्-अण् षुगागमः
नान्तादसंख्यादेर्मट्[4]	पञ्चमः पञ्चन्-डट् मडागमः
थट्चच्छन्दसि[5]	पञ्चथम् पञ्चन्-डट् थडागमः
षट्कतिपयचतुरां थुक्[6]	षष्ठः षष्-डट् थुगागमः
बहुपूगगणसंघस्य तिथुक्[7]	बहुतिथः बहु-डट् तिथुगागमः
वतोरिथुक्[8]	यावतिथः यावत्-डट् इथुगागमः
विंशत्यादिभ्यस्तमडन्यतरस्याम्[9]	विंशतितमः विंशति-डट् तमडागमः
नित्य शतादिमासार्धमाससंवत्सराच्च[10]	शततमः शत-डट् तमडागमः
षष्ठयादेश्चादेसंख्यादेः[11]	षष्ठितमः षष्ठि-डट् ,,
वातातिसाराभ्यांकुक्च[12]	वाताकी वात, मतुप्, कुगागमः
सृजिदृशोर्झल्यमकिति[13]	द्रष्टा दृशिर् लुट् तिप् तास् अमागमः
ह्रस्वस्य पितिकृति तुक्[14]	इत्यः इण् धा० क्यप् तुगागमः
छे च[15]	शिवच्छाया शिव छाया ,,
आङ्माङोश्च[16]	आच्छादयति आङ् छादयति ,,
दीर्घात्[17]	चेच्छिद्यते चे छिद्यते ,,
पदान्ताद्वा[18]	लक्ष्मीच्छाया लक्ष्मी छाया ,,
सम्परिभ्यां करोतौ भूषणे[19]	संस्करोति सम् करोति सुडागमः
समवाये च[20]	संस्कुर्वन्ति सम् कुर्वन्ति ,,
उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु[21]	उपस्कृता उप, कृता ,,
किरतौ लवने[22]	उपचस्कार उपकृधा० लिट् तिप् णल् ,,

१. पा० सू० ४।३।२३
२. पा० सू० ४।३।२४
३. पा० सू० ४।३।१३८
४. पा० सू० ५।२।४९
५. पा० सू० ५।२।५०
६. पा० सू० ५।२।५१
७. पा० सू० ५।२।५२
८. पा० सू० ५।२।५३
९. पा० सू० ५।२।५६
१०. पा० सू० ५।२।५७
११. पा० सू० ५।२।५८
१२ पा० सू० ५।२।१२९
१३. पा० सू० ६।१।५८
१४. पा० सू० ६।१।७१
१५. पा० सू० ६।१।७३
१६. पा० सू० ६।१।७४
१७. पा० सू० ६।१।७५
१८. पा० सू० ६।१।७६
१९. पा० सू० ६।१।१३७
२०. पा० सू० ६।१।१३८
२१. पा० सू० ६।१।१३९
२२. पा० सू० ६।१।१४०

हिसायां प्रतेश्च[१]	उपस्किरति उपकृ लिट् तिप् श सुडागमः
अपाच्चतुष्पाच्छकुनिष्वालेखने[२]	अपस्किरते वृषोहृष्टः अप कृधा० लट् त श ,,
ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रे[३]	हरिश्चन्द्रो मरूद्गणः हरिचन्द्र सुडागमः
अरूर्द्विषदजन्तस्य मुम्[४]	जनमेजयः जनपू० एजिखश् मुमागमः
इच एकाचोऽम्प्रत्ययवच्च[५]	गाम्यन्यः गोपू० मन् धा० खश्श्यन् अमागमः
कारे सत्यागदस्य[६]	सत्यङ्कारः सत्य, कार, सु मुमागमः
श्येन तिलस्य पाते ञे[७]	श्यैम्पाता श्येन, पात, ञ ,,
रात्रेः कृति विभाषा[८]	रात्रिञ्चरः रात्रि, अभ्, चर सु ,,
एकादिश्चैकस्य चादुक्[९]	एकान्नविंशतिःएक न विंशति आदुगागमः
अषष्ठ्यतृतीयास्थस्यान्यस्य-दुगाशीराशास्थास्थितो-त्सुकोतिकारकरागच्छेषु[१०]	अन्यदाशीः अन्यसु, आशिषसु दुगागमः
अर्थे विभाषा[११]	अन्यदर्थः अन्यसु, अर्थसु ,,
अनोनुट्[१२]	अक्षण्वन्तः अक्षि-मतुप् नुडागमः
नाद्घस्य[१३]	सुपथिन्तरः सुपथिन्-तरप् ,,
ङ्णोः कुक्टुक्शरि[१४]	प्राङ्ख्षष्ठः प्राङ् षष्ठः कुगागमः
डःसिधुट्[१५]	षट्त्सन्तः षट् सन्तः धुडागमः
नश्च[१६]	सन्त्सः सन् सः ,,
शितुक्[१७]	सञ्च्छम्भुः सन्ःशम्भुः तुगागमः
ङमोह्रस्वादचिङमुण्नित्यम्[१८]	प्रत्यङ्ङात्मा प्रत्यङ् आत्मा ङमुडागमः

एतानि वा आगमविधायकशास्त्राणि अपवादविनिर्मुक्तान्यपि संगृहीतानि।

तदित्थमिह तृतीयविमर्शे दीर्घह्रस्वलोपशास्त्राणामिवागमसम्बन्धिशास्त्रविवेचनमपि सम्पन्नम्।

---

१. पा० सू० ६।१।१४१
२. पा० सू० ६।१।१४२
३. पा० सू० ६।१।१५१
४. पा० सू० ६।३।६७
५. पा० सू० ६।३।६८
६. पा० सू० ६।३।७०
७. पा० सू० ६।३।७१
८. पा० सू० ६।३।७२
९. पा० सू० ६।३।७६
१०. पा० सू० ६।३।९९
११. पा० सू० ६।३।१००
१२. पा० सू० ८।२।१६
१३. पा० सू० ८।२।१७
१४. पा० सू० ८।३।२८
१५. पा० सू० ८।३।२९
१६. पा० सू० ८।३।३०
१७. पा० सू० ८।३।३१
१८. पा० सू० ८।३।३२

चतुर्थो विमर्शः

षत्वसम्बन्ध्युत्सर्गापवादशास्त्राणि

पूर्वोक्तलोपागमशास्त्रवदुत्सर्गापवादत्वं षत्वणत्वविधिविषयेऽपि दृश्यते । अतः पूर्वं षत्वसम्बन्धिशास्त्राणीहविविच्यन्ते । तदनु णत्वशास्त्राणि विवेचयिष्यन्ते । तत्र तावत् षत्वविधायकशास्त्राण्यष्टाध्याय्या अष्टमाध्यायस्य तृतीयपादे संनिहितानि सन्ति । तत्र षत्वविधिविषये 'अपदान्तस्य-मूर्धन्यः[१]' 'इण्कोः[२]' इति सूत्रद्वयमधिक्रियते । अतएव सर्वत्र इण्कुभ्यां परस्यापदान्तस्य मूर्धन्यादेशो भवति इति फलति । तथा च 'अग्निस्तत्र' वायुस्तत्र, इत्यत्र पदान्तत्वात् षत्वाभावः सिध्यति । अत्र सामान्यतो मूर्धन्यादेश विधानफलन्तु 'अकृढ्वमि'त्यत्र धकारस्य मूर्धन्यरूप ढकारादेशः । यदि इण्कुभ्यां परस्यापदान्तस्य षत्वमिति विशेषरूपेणोपाख्यानं स्यात्तदा 'इणःषीध्वंलुङ्लिटांधोङ्गात्[३]' 'विभाषेटः[४]' इति सूत्राभ्यां धकारस्थाने ढत्वं न भवेत् । तस्मादत्र सामान्यतो मूर्धन्यादेशो विहितः, न तु षत्वादेश इति रहस्यम् ।

एवमिण्कोरि'त्यधिकारेणेदं सामान्यतः सूच्यते यद् इण्कुभ्यां परस्य मूर्धन्यादेशो भवति । तेन 'सुष्वाप, भविष्यति, करिष्यतिप्रभृतिष्वेव षत्वं दृश्यते, नो चेत् ससौ, दास्यतीत्यादिष्वपि षत्वमापद्ये त । इण्कोरित्यधिकारे सति पुनः 'इणः षीध्वंलुङ्लिटांधोऽङ्गात्" इति सूत्रे इण्ग्रहणन्तु कवर्गव्यावृत्त्यर्थमेव बोध्यम् । नो चेद् 'इण्कोः' इति सन्नियोगनिर्दिष्टत्वात् साहचर्य नियमात्तत्र कवर्गस्यापि सम्बन्धः स्यात् । तेन 'पक्षीध्वम्, यक्षीध्वमि'त्यत्रापि मूर्धन्यादेश आपतेत् । तस्मात्पुनरिण्ग्रहणं तत्र सफलमिति बोध्यम् । 'इण्कोः' इति षञ्चम्यन्ताधिकारात् 'तस्मादित्युत्तरस्ये' ति परिभाषया इण्कवर्गाव्यवहितोत्तरस्यादेशप्रत्ययघटितसकारस्य षत्वं भवतीति सामान्यतो निश्चीयते । तथा च षत्वविधायकमुत्सर्गशास्त्रमस्ति—'आदेशप्रत्यययोरि'ति,[५] इण्कोरित्यधिकारसूत्राव्यवहितोत्तरञ्च सूत्रमस्ति—'नुम्विसर्जनीयशर्व्यवायेऽपि[६]' इति । तेन 'इण्कोरुत्तरस्य सकारस्य मूर्धन्यादेशे नुम्विसर्जनीय-

---

१. पा० सू० ८।३।५५
२. पा० सू० ८।३।५७
३. पा० सू० ८।३।७८
४. पा० सू० ८।३।७९
५. पा० सू० ८।३।५९
६. पा० सू० ८।३।५८

शर्व्यवायेऽपि गृह्यते। अतएव सर्पींषि, सर्पिःषु, सर्पिष्षु इत्यादौ षत्वं सिध्यति।

तदेवमेष षत्वविधिः इण्कोरव्यवहिते पूर्वोक्तनुम्विसर्जनीयशर्व्यवहितेऽपि सकारे प्रवर्तत इति मतम्।

आदेशसम्बन्धिषत्वविधिः

तत्र 'आदेशप्रत्यययोरादेश'सम्बन्धिषत्वविधिस्तु प्रकृतिमेवावगाहते न तु प्रत्ययमिति बोध्यम्। यथा सर्पिष्पाशम, यजुष्कल्पम्, यजुष्कम्, यजुष्काम्यति, इत्यत्रापदादौ जिह्वामूलीयोपध्मानीयावपवाद्य 'इणः षः[1]' इति शास्त्रेण षत्वं विधीयते। एवं निष्कृतम्, दुष्कृतम्, निष्पीतम् दुष्पीतम् इत्यत्र पदादावपि कुप्वोः परयोः जिह्वामूलीयोपध्मानीयावपवाद्य 'इदुदुपधस्य चाप्रत्ययस्य[2]' इति शास्त्रेण षत्वमेव भवति। अपि च सर्पिष्करोति, यजुष्करोति, इत्यत्र 'इसुसोः सामर्थ्ये[3]' इति विशेषशास्त्रेण 'कुप्वोः≍क≍पौ च[4]' इति सामान्यशास्त्रं प्रबाध्य विसर्जनीयरूपादेशस्य षत्वं विधीयते। एष च षत्वविधिर्वैकल्पिकः, तेन पक्षे 'सर्पिः करोती'त्यत्र विसर्जनीयादिकमपि श्रूयते। समासविषयेऽनुत्तरपदस्थस्य इसुसोर्विसर्जनीयस्य तु नित्यमेव कुप्वोः परतः षत्वं भवति। तथा च सूत्रमस्ति 'नित्यं समासेऽनुत्तरपदस्थस्य[5]' इति। तेन सर्पिष्कुण्डिका, धनुष्कपालम, सर्पिष्पानम्, धनुष्फलमित्यत्र षत्वमेव जायते। इदमप्यत्र बोध्यं यद् विसर्जनीयरूपादेशस्य कुप्वोः परतो यत्र जिह्वामूलीयोपध्मानीयावपवाद्य षत्वं विधीयते। तत्र यदि इण् प्रत्याहारोत्तरविसर्जनीयो लभ्यते, तत्र षत्वविधिः प्रवर्तते। यत्र इण् प्रत्याहारोत्तरविसर्गसम्बन्धाभावस्तत्र कुप्वोः परतः जिह्वामूलीयोपध्मानीयावपवाद्य सत्वं प्रवर्त्तते। प्रसङ्गतस्तेषामत्र परिचयोऽपि प्रस्तूयते। तत्र तावत् सामान्यशास्त्रमस्ति—

कुप्वोः≍क≍पौ च

एतदपवादशास्त्राणि सोदाहरणानि चैतानि सन्ति—

सोऽपदादौ[6]	पयस्पाशम्, पयस्कल्पम
नमस्पुरुषोर्गत्योः[7]	नमस्करोति, पुरस्करोति
तिरसोऽन्यतरस्याम्[8]	तिरस्कर्ता, तिरःकर्ता

१. पा० सू० ८।३।३९
२. पा० सू० ८।३।४१
३. पा० सू० ८।३।४४
४. पा० सु० ८।३।३७
५. पा० सू० ८।३।४५
६. पा० सू० ८।३।३७
७. पा० सू० ८।३।३८
८. पा० सू० ८।३।४०

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य[1]	अयस्कारः
अधः शिरसीपदे[2]	अधस्पदम्
कस्कादिषु च[3]	कौतस्कुतः
छन्दसि वाऽप्राम्रे डितयोः[4]	अयस्पात्रम्
कः करत्करति कृधिकृतेष्वनदितेः[5]	विश्वतस्कः
पञ्चम्याः परावध्यर्थे[6]	अग्निर्हि भवतस्परि
पातौ च बहुलम्[7]	दिवस्पातु
षष्ठयाः पति पुत्र पृष्ठपार-पदपथस्पोषेषु[8]	दिवस्पुत्राय
इडाया वा[9]	इडायास्पुत्रः

एषु सर्वेषु जिह्वामूलीयोपध्मानीयौ स्वस्वनिमित्तमाश्रित्योपतिष्ठेते, किन्तु तदपवादभूतैः पूर्वोक्तसूत्रैः तावपवाद्येते। अपिच "कुप्वोः ≍क ≍पौ च" इति सामान्यशास्त्रं "विसर्जनीयस्य सः"[10] "शर्परे विसर्जनीयः"[11] इति सूत्रद्वयं विशेषशास्त्रत्वेन प्रसिद्धम्। यतोहि "खरवसानयोर्विसर्जनीयः[12] इति सामान्यशास्त्रेण रेफान्तस्य पदस्य खरिपरेऽवसाने च विसर्जनीयादेशो विधीयते। तत्र खरि परतो "विसर्जनीयस्य सः" इतिशास्त्रेण विसर्गस्य सकारादेशो भवति। ततश्च "विष्णुस्त्राता" इत्यत्र सत्वं दृश्यते, किन्तु "विसर्जनीयस्य सः" इति शास्त्रस्यापि अपवादभूतं "शर्प्परे विसर्जनीयः" इति शास्त्रं प्रवर्तते। तेन शर्प्परे खरि-वासः क्षौमम्, घनाघनः क्षोभणः, इत्यत्र विसर्ग एव भवति न तु सत्वम्। "शर्प्परे विसर्जनीयः" इति शास्त्रन्तु यद्यपि "कुप्वो ≍क ≍पौ च" इति शास्त्रापेक्षया सामान्यभूतमस्ति, तथापि शर्प्परे खरि तन्न प्रवर्त्तते, विसर्जनीयस्य पुनर्विसर्जनीयादेशविधानात्। अन्यथा शर्प्परे नेति न्यासेनैव विसर्जनीयस्य सत्वं निषिद्धं भवेत्, पुन र्विसर्जनीयपदमत्र व्यर्थं स्यात्। तथा चोक्तं काशिकावृत्तौ[13]—"नेति वक्तव्ये विसर्जनीयस्य

१. पा० सू० ८।३।४२
२. पा० सू० ८।३।४६
३. पा० सू० ८।३।४७
४. पा० सू० ८।३।४९
५. पा० सू० ८।३।५०
६. पा० सू० ८।३।५१
७. पा० सू० ८।३।५२
८. पा० सू० ८।३।५३
९. पा० सू० ८।३।५४
१०. पा० सू० ८।३।३४
११. पा० सू० ८।३।३५
१२. पा० सू० ८।३।१५
१३. पा० सू० ८।३।२७

विसर्जनीयादेशविधानं विकारनिवृत्यर्थम्। तेन जिह्वामूलीयोपध्मानीयौ न भवतः इति।

तदेवं जिह्वामूलीयोपध्मानीयापवादशास्त्राणां परिचयो जातः।

उपसर्गस्थनिमित्तादेशसम्बन्धिषत्वविधिः

उपसर्गस्थेण्निमित्तादुत्तरस्यादेशरूपसकारस्य षत्वविधायकसूत्रेषु यद्यप्युत्सर्गापवादभावौ पूर्वत्रोपलभ्येते, तथापि तत्र षत्वविधिसूत्रेषु विशेषाणामुपसर्गाणामर्थानाञ्च ग्रहणं विशेषोपसर्गप्रतिबन्धश्च दृश्यते। तत्र सामान्यशास्त्रमस्ति "उपसर्गात्सुनोति सुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्"[1]। अत्र धातवो नियताः, किन्तु सामान्यत उपसर्गावयवेणः निमित्तत्वेनाश्रिताः। तेन अभिषुणोति, परिषुणोति, अभ्यषुणोत् इत्यादौ उपसर्गावयवेणः परस्य सकारस्य षत्वं भवति। किञ्च "स्तन्भेः"[2] इति शास्त्रेणापि स्तन्भेः सकारस्य पूर्वोक्तसूत्रवत् षत्वं विधीयते। ततश्च अभिष्टभ्नाति, प्रतिष्टभ्नाति अभ्यष्टभ्नात् प्रभृतिषु षत्वं सिध्यति। इतोऽन्यत्र तु क्वचिद्विशेषोपसर्गनिमित्तप्रतिषेधः, क्वचिच्च विशेषोपसर्गनिमित्तोपादानं तथा क्वचिद्विशेषार्थसंग्रहश्च तेषु तेषु सूत्रेषु दृश्यते। अतस्तेषां सोदाहरणं विवेचनमत्र प्रस्तूयते। तत्संग्रहस्तावदेवं विद्यते—

सदिरप्रतेः[3]	निषीदति
परिनिविभ्यः सेवसितसयसिवु सहसुट्स्तुस्वञ्जाम्[4]	परिषेवते
अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु[5]	अनुष्यन्दते
वेः स्कन्देरनिष्ठायाम्[6]	विष्कन्ता
परेश्च[7]	परिष्कन्ता
स्फुरति स्फुलत्योर्निर्विभ्यः[8]	निष्फुरति
"वेः स्कभ्नाते र्नित्यम्[9]"	विष्कभ्नाति
"अवाच्चाऽलम्बनाविदूर्ययोः[10]"	अवष्टभ्यास्ते, अवष्टब्धा सेना
"वेश्च स्वनो भोजने[11]	विष्वणति, अवष्वणति

1. पा० सू० ८।३।६५
2. पा० सू० ८।३।६७
3. पा० सू० ८।:।६६
4. पा० सू० ८।३।७०
5. पा० सू० ८।३।७२
6. पा० सू० ८।३।७३
7. पा० सू० ८।३।७४
8. पा० सू० ८।३।७६
9. पा० सू० ८।३।७७
10. पा० सू० ८।३।६८
11. पा० सू० ८।३।६९

एषु "सदिरप्रतेः" इत्यत्राप्रतेरिति विशेषोपसर्गनिमित्तप्रतिषेधात् 'प्रतिसीदति' इत्यत्र षत्वं न भवति। "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" इत्यत्र तु विशेषोपसर्गनिमित्तोपादनान्यत्र 'अभिसेवते' प्रतिसेवते इत्यत्र षत्वं वार्यते। एवम् "अनुविपर्यभिनिविभ्यः स्यन्दतेरप्राणिषु" "वेः स्कन्देरनिष्ठायाम्" "परेश्च" "स्फुरतिस्फुलत्योर्निर्निविभ्यः" इति चतुर्षु सूत्रेषु सङ्गृहीतविशेषोपसर्गनिमित्तेभ्य एव वैकल्पिकः षत्वविधिः सिध्यति नान्येभ्य उपसर्गनिमित्तकेभ्य इति निश्चीयते। 'विष्कम्नाति' इत्यत्र तु "वेः स्कभ्नातेर्नित्यम्" इति विशेषशास्त्रेण नित्यमेव षत्वं विधीयते। अत्र नित्यमितिपदेन पूर्वोक्तषत्वविधायकानुविपर्यभिनिभ्य इत्यादिशास्त्राणां वैकल्पिकत्वं परिपुष्यति। "अवाच्चाऽलम्बनाविदूर्ययोः" "वेश्च स्वनो भोजने" इति सूत्रयोर्विशेषार्थसङ्केतो वर्तते, अतः अवपूर्वात् स्तम्भधातोः षत्वमालम्बनाविदूर्ययोरर्थयोर्भवति। तत्रालम्बने अर्थादाश्रयणे अवष्टभ्यास्ते, इत्युदाह्रियते। आविदूर्ये अर्थात् सामिप्ये तु 'अवष्टब्धा सेना' इत्यत्र षत्वं विधीयते। एतद भिन्नार्थे शीतेन वृषलः अवस्तब्धः इत्यत्र तु षत्वं नोपलभ्यते। एष षत्वविधिश्चापूर्वः, यतो हि इणः परत्वाभावात् पूर्वेण केनापि सामान्यशास्त्रेणावष्टभ्य इत्यत्र षत्वं नैव प्राप्नोति। तस्मादनिणर्थोऽयं षत्वविधिरिति ज्ञेयम्। एवं वेरुपसर्गादवोपसर्गाच्च स्वन्धातोः सकारस्य षत्वं भोजनरूपविशेषार्थे एव दृश्यते। तेन सशब्दभोजने विष्णवति, व्यष्वणति अवष्वणति प्रभृतिषु षत्वं प्रवर्तते, न तु विस्वनति मृदङ्गः इत्यत्र केवलाव्यक्तशब्दे। एतावता यत्र भोजनेऽपि अव्यक्तशब्दो जायते, सैव क्रियात्र विशेषरूपेण गृहीतास्ति।

तदित्थं विशेषोपसर्गनिमित्तं विशेषार्थञ्चाधारीकृत्योपसगस्थनिमित्तादेशसम्बन्धिषत्वविधिर्विवेचितः।

आदेशरूपसकारसम्बन्धिषत्वनिषेधरूपापवादशास्त्राणां परिचयः

आदेशरूपसकारसम्बन्धिषत्वविधिविवेचनानन्तरं तत्सम्बन्धिनिषेधरूपायवादशास्त्राण्यपि सोदाहरणं विविच्यन्ते। तत्रेह पूर्वं तत्तदुत्सर्गशास्त्रं सोदाहरणमुपन्यस्यते। तद्यथा—

उत्सर्गशास्त्रं तदुदाहरणम्	अपवादशास्त्रं तदुदाहरणम्
"पूर्वपदात्[1]" ८।३।१०६ द्विषन्धिः	"न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्[2]" ८।३।११० विस्तब्धः कथयति

१. पा० सू० ८।३।१०६

२. पा० सू० ८।३।११०

"आदेशप्रत्यययोः[1]" ८।३।५९ रामेषु

"उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्चस्वञ्जाम्[5]" अभिषुणोति

"परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्[8]" परिषेवते

"स्तन्भेः[10]" अभिष्टभ्नाति

"सदिरप्रतेः[11]" निषीदति

"सात्पदाद्योः[2]" अग्निसात् दधिसिञ्चति

"सिचो यङि[3]" सेसिच्यते

"सेधतेर्गतौ[4]" अभिषेधयति

"सुनोतेः स्यसनोः[6]" अभिसोष्यति

"सोढः[7]" परिसोढः

"स्तम्भुसिवुसहां चङि[9]" पर्यसीषिवत्

"स्तम्भुसिवुसहां चङि" पर्यस्तम्भत्

"सदेः परस्य लिटि[12]" अभिषसाद

"निव्यभिभ्योऽड्व्यवाये वा छन्दसि[13]" न्यषीदत् पिता नः

अत्रोदाहृतोत्सर्गशास्त्राणां निषेधरूपापवादशास्त्रैरड्व्यवधाने अभ्यासव्यवधाने च प्राप्तं षत्वमपि निषिध्यते। अत एव "सदेरप्रतेरि"त्यत्र "प्राक्सितादड्व्यवायेऽपि" "स्थादिष्वभ्यासेन चाभ्यासस्य" इति सूत्रद्वयाधिकारात् प्राप्तषत्वस्य "सदिस्वञ्जोः परस्य लिटि" "निव्यभिभ्योऽड्व्यवाये वा छन्दसि" इति सूत्राभ्यां निषेधापवादः सिध्यति।

प्रत्ययसम्बन्धिषत्वविधिविमर्शः

अथ प्रत्ययसम्बन्धिषत्वविधौ तु "आदेशप्रत्यययोरि" ति सामान्यशास्त्रं केवलं प्रवर्तते। प्रत्ययश्च सामान्यतः सुप्तिङ्भेदेन द्विविधः। तत्र प्रत्ययसम्बन्धिषत्वविधिः रामेषु, सर्वेषाम् इत्यादौ प्रसिद्धः। तिङ्प्रत्ययसम्बन्धिषत्वविधिरपि-भविष्यति, अकार्षीत्, अह्वार्षीत् इत्यादौ च व्याख्यातः। एतदपवादभूतं शास्त्रं विद्यते "सात्पदाद्योरि"ति। अनेन शास्त्रेणादेशप्रत्ययसम्बन्धि षत्वमपवाद्यते। तेन 'दधिसिञ्चति' पदघटित सकारस्य षत्वं निषिध्यते। तथा अग्निसात् इत्यत्रेणः परस्य सादितिप्रत्ययसम्बन्धि

१. पा० सू० ८।३।५९
२. पा० सू० ८।३।१११
३. पा० सू० ८।३।६५
४. पा० सू० ८।३।११२
५. पा० सू० ८।३।११३
६. पा० सू० ८।३।११७
७. पा० सू० ८।३।७०
८. पा० सू० ८।३।११५
९. पा० सू० ८।३।११६
१०. पा० सू० ८।३।६७
११. पा० सू० ८।३।६६
१२. पा० सू० ८।३।११८
१३. पा० सू० ८।३।११९

सकारस्य षत्वं वार्यते। सिञ्चतीत्यत्र षत्वप्राप्तिस्तु मूलतः षिच् धातोः षकारस्य "धात्वादेः षः सः[१]" इति सूत्रेण सकारादेशे कृते आशङ्क्यते। एवमग्निशब्दात् "विभाषा साति कार्त्स्न्ये[२]" इति सूत्रेण सातिप्रत्यये सति षत्वं सम्भाव्यते। अतः सात्पदाद्योरिति शास्त्रेणोभयत्र षत्वं निषिध्यते।

तदेवं प्रत्ययसम्बन्ध्युत्सर्गशास्त्रस्य तन्निषेधापवादरूपशास्त्रस्य च विमर्शो जातः।

षत्वसम्बन्ध्यपवाद विरहितविशेषशास्त्राणां वर्गीकरणं तदुहारणानि च

व्रश्चभ्रस्जसृजमृजयजराज— भ्राजच्छशां षः[३]	मूलवृट् व्रष्टा, व्रष्टुम् शब्दप्राट्, विट्
'सुषामादिषु च[४]'	सुषामा, दुष्षामा
'एति संज्ञायामगात्[५]'	हरिषेणः, वारिषेणः
'नक्षत्राद् वा[६]'	रोहिणीषेण, भरणीषेणः
'ह्रस्वात् तादौ तद्धिते[७]'	सर्पिष्टरम्, यजुष्टरम्
'निसस्तपतावनासेवने[८]'	निष्टपति सुवर्णम्
'युष्मत्तत्तक्षुःष्वन्तः पादम्[९]'	अग्निष्ट्वं नामासीत्
'यजुष्येकेषाम्[१०]'	अर्चिभिष्टवम्
'स्तुतस्तोमयोश्छन्दसि[११]'	त्रिभिष्टुतस्य
'सुञः[१२]'	अभीषुणः
'सनोतेरनः[१३]'	गोषाः, नृषाः
'सहेः पृतनर्ताभ्यां च[१४]'	पृतनाषाहम्
'समासेऽङ्गुलेः सङ्गः[१५]'	अङ्गुलिषङ्गः
'अग्नेः स्तुतस्तोमसोमाः[१६]'	अग्निष्टुत्
'ज्योतिरायुषः स्तोमः[१७]'	ज्योतिष्टोमः, आयुष्टोमः

---

१. पा० सू० ५।४।५२
२. पा० सू० ६।१।६४
३. पा० सू० ८।२।३६
४. पा० सू० ८।३।९८
५. पा० सू० ८।३।९९
६. पा० सू० ८।३।१००
७. पा० सू० ८।३।१०१
८. पा० सू० ८।३।१०२
९. पा० सू० ८।३।१०३
१०. पा० सू० ८।३।१०४
११. पा० सू० ८।३।१०५
१२. पा० सू० ८।३।१०७
१३. पा० सू० ८।३।१०८
१४. पा० सू० ८।३।१०९
१५. पा० सू० ८।३।८०
१६. पा० सू० ८।३।८२
१७. पा० सू० ८।३।८३

'मातृपितृभ्यां स्वसा[1]'	मातृष्वसा, पितृष्वसा
'मातुःपितुर्भ्यामन्यतरस्याम्[2]'	मातुष्वसा–मातुःस्वसा
'अभिनिसः स्तनः शब्दसंज्ञायाम्[3]'	अभिनिष्टानो वर्णः
'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः[4]'	अभिषन्ति, निषन्ति
'सुविनिर्दुर्भ्यः सुपिसूतिसमाः[5]'	सुषुप्तः, विषुप्तः
'निनदीभ्यां स्नातेः कौशले[6]'	निष्णातः
'भीरोः स्थानम्[7]'	भीरुष्ठानम्
'गवियुधिभ्यां स्थिरः[8]'	गविष्ठिरः
'विकुशमिपरिभ्यां स्थलम्[9]'	विष्ठलम्
'अम्बाम्बगोभूमिसव्यापद्वित्रि– 'कुशेकुशङ्क्वङ्गुमञ्जिपुञ्जि– 'परमेबर्हिर्दिव्यग्निभ्यः स्थः[10]'	अम्बष्ठः, आम्बष्ठः
'शासिवसिघसीनाञ्च[11]'	अन्वशिषत्
'स्तौतिण्योरेव षण्यभ्यासात्[12]'	तुष्टूषति
'इणः षः[13]'	सर्पिष्पाशम्, सर्पिष्कल्पम्
'इदुदुपधस्य चाऽप्रत्ययस्य[14]'	निष्कृतम्, निष्पीतम्
'द्विस्त्रिश्चतुरिति कृत्वोऽर्थे[15]'	द्विष्करोति, द्विष्पचति
'इसुसोः सामर्थ्ये[16]'	सर्पिष्करोति, यजुष्करोति
'नित्यं समासेऽनुत्तरपदस्थस्य[17]'	सर्पिष्कुण्डिका, सर्पिष्पानम्
'कस्कादिषु च[18]'	भ्रातुष्पुत्रः सर्पिष्कुण्डिका

एतानि किल सूत्राणि षत्वविधिविषये विशेषरूपेण प्रवर्तन्ते, अतो नान्यैरपवाद्यन्ते। यद्यभिश्चात्र षत्वं न स्यात तदा तत्तल्लक्ष्येषु सामान्य-शास्त्रमापतेत्। यथा प्रथमं तावद् 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां

१. पा० सू० ८।३।८४
२. पा० सू० ८।३।८५
३. पा० सू० ८।३।८६
४. पा० सू० ८।३।८७
५. पा० सू० ८।३।८८
६. पा० सू० ८।३।८९
७. पा० सू० ८।३।८१
८. पा० सू० ८।३।९५
९. पा० सू० ८।३।९६
१०. पा० सू० ८।३।९७
११. पा० सू० ८।३।६०
१२. पा० सू० ८।३।६१
१३. पा० सू० ८।३।३९
१४. पा० सू० ८।३।४१
१५. पा० सू० ८।३।४३
१६. पा० सू० ८।३।४४
१७. पा० सू० ८।३।४५
१८. पा० सू० ८।३।४८

षः' इति षत्वविधायकविशेषशास्त्रेण षत्वाभावे व्रश्चादिषु सप्तसु झलि पदान्ते च कुत्वमापतेत्, छशान्तशब्दयोश्च जश्त्वमिति। तेन मूलवृजादि-पदानां सिद्धि र्न स्यात्। अतो विशेषानुशासनमिति बोध्यम्। इतः परमत्र 'सुषामादिषु चेति' सूत्रादारभ्य 'स्तौतिण्योरेवषण्यभ्यासादि' ति सप्त-विंशतिविशेषषत्वविधायकसूत्रैर्यदि षत्वं न विधीयेत, तदा सर्वत्र दन्त्यसकार एव श्रूयेत। स चेह नेष्टः, तस्मात् षत्वविधिरिति शास्त्रपद्धतिः। 'इणः षः' इति सूत्रादारभ्य 'कस्कादिषु च' इति षट्सूत्रै र्विसर्गस्य षत्वविधानं यदि न स्यात्तदा तु सर्वत्र 'कुप्वो≍क≍पौ च' इति सामान्यशास्त्रेण जिह्वामूली-योपध्मानीयौ भवेताम्। ततश्च सर्पिष्पाशम्, सर्पिष्कल्पमित्यादिलक्ष्येषु षत्वं नैव सङ्गतं भवेत्। षत्वसङ्गतिश्चात्राप्तैरिष्टा। अतः 'इणः षः' इत्यादिषट्सूत्रैरपि विशेषरूपेण षत्वं विहितम्।

तदित्थं चतुस्त्रिंशत्सूत्राणां षत्वविधानफलमपि सामान्यविशेषभाव-प्रदर्शनपूर्वकमिह चिन्तितम्।

णत्वसम्बन्ध्युत्सर्गापवादशास्त्रविवेचनम्

षत्वविधिविवेचनानन्तरं णत्वविधेर्विवेचनक्रमः प्राप्तः। यतो हि पाणिनिमहाभागाः पूर्वं तावदष्टाध्याय्या अष्टमाध्यायस्य तृतीयपादे षत्व-विधायकशास्त्राण्युपन्यस्य तदनु चतुर्थपादे णत्वविधायकशास्त्राणि समा-वेशितवन्तः। अतः षत्वविधिविवेचनानन्तरं णत्वविधिसमालोचनमुचितं प्रतिभाति। तत्र यथा इण्कुभ्यां परस्यापदान्तस्य षत्वं सामान्यतो दृश्यते, तथैव णत्वमपि सामान्यतो रषाभ्यां परस्य समानपदे श्रूयते। तथा च सूत्रमस्ति 'रषाभ्यां नोणः समानपदे[1]' इति। अपि च षत्वं यथा नुम्विसर्जनीय-शर्व्यवधानेऽपि प्रवर्तते, तथैव णत्वमप्यट्कुप्वाङ्नुम्व्यवधानेऽपि जायते। तथा चात्र सूत्रमस्ति 'अट्कुप्वाङ्नुम्व्यवायेऽपि[2]' इति। अर्थाद्यत्रैकपदस्थौ निमित्तनिमित्तिनौ स्तः तत्र रषाभ्यामव्यवहितोत्तरस्य नकारस्य णत्वं भवति। तेन चतुर्णाम्, पुष्णातीत्यत्र णत्वं सिध्यति। अत्र रेफनकारयोर्मध्ये षकारणकारयोर्मध्ये च वर्णान्तरकृतं व्यवधानं नास्ति। समानपदस्थत्वमपि रेफषकाराभ्यां सह नकारस्य वर्तत एव। एवं यत्राट्कुप्वाङ्नुम्भिर्व्यवधानं विद्यते तत्रापि रामेण, अर्केणेत्यादावपि णत्वं सिध्यति। निमित्तनिमित्तिनोरे-कपदस्थत्वमत्रापि गृह्यते। तेन यथा—रषाभ्यां णो नः इति पूर्वसूत्रेण समानपदे एव निमित्तनिमित्तिनो रेफनकारयोर्भिन्नपदस्थत्वादग्निर्नयति, वायुर्नयति

१. पा० सू० ८।४।१ २. पा० सू० ८।४।२

इत्यत्र णत्वं न भवति, तथैव रामनामेत्यत्र अट्कुप्वाङ्नुम्व्यवायेपि इति शास्त्रेण णत्वं नैव प्रवर्तते, अत्रापि समानपदे इत्यस्य सम्बन्धत्वेन निमित्त-निमित्तिनोर्भिन्नपदस्थत्वात। इतोऽन्यत्र यत्र कुत्रापि णत्वं विधीयते तत्र समानपदत्वं नावश्यकमिति बोध्यम्। अत एवानयोः सूत्रयोरनन्तरमेव 'पूर्वपदात्संज्ञायामगः[1]' इति सूत्रमुपन्यस्तम्। तेन द्रुणसेत्यत्र पूर्वपदस्थ-निमित्तादपि नकारस्य णत्वं भवति। अत्र यद्यपि पूर्वपदस्थनिमित्तनामोपसर्ग-संज्ञकपदानि सम्भवन्ति, तथापि अन्यत्र णत्वविधायकेषु निमित्तेषु रेफषकारौ भवत एव। अतः 'रषाभ्यां नोणः समानपदे अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रद्वयं णत्वविधौ सामान्येन णत्वविधायकम्। अन्यानि तु तत्तद्विशेप्रयोग-घटकनकारस्य णत्वविधायकतया विशेषसूत्राणीतिवक्तुं शक्यते।

प्रकृतिसम्बन्धिणत्वविधिः

आदेशप्रत्ययावयवसकारयोः षत्वविधिर्व्याख्यातः। णत्वे तावद् 'उपसर्गादसमासेऽपि णोपदेशस्य[2]' इति शास्त्रं विहाय क्वचित् प्रकृतेर्णत्वं, क्वचिच्च प्रत्ययस्य णत्वं विधीयते। 'उपसर्गादसमासेऽपि णोपदेशस्ये' त्यत्र तु णोपदेशग्रहणात् 'प्रणमति' इत्यत्र णम्धातो र्णकारस्य 'णो नः[3]' इति शास्त्रेण नकारादेशे कृते सति णत्वं भवति। अत आदेशस्य णत्वमत्र सङ्घटते। इतोऽन्यत्र प्रकृतिसम्बन्धिणत्वं प्रत्ययसम्बन्धिणत्वञ्च विधीयते। अतः प्रकारान्तरेण षत्वविधेरिव णत्वविधिरपि द्विविधः प्रतिभाति। तत्र तावत् प्रकृतिसम्बन्धिणत्वविधौ चतुर्विंशतिः सूत्राणि विशेषरूपेण प्रवर्तन्ते। तेषां नामानि सोदाहरणानि निम्नलिखितानि सन्ति।

पूर्वपदात्संज्ञायामगः	द्रुणसा
वनं पुरगामिश्रकासिध्रका-शारिकाकोटराग्रेभ्यः[4]	पुरगावणम्, मिश्रकावणम्
प्रनिरन्तःशरेक्षुप्लक्षाम्र-कार्ष्यखदिरपियूक्षाभ्योऽ-संज्ञायामपि[5]	प्रवणे यष्टव्यम्
विभाषौषधिवनस्पतिभ्यः[6]	दुर्वावणम्
अह्नोऽदन्तात्[7]	पूर्वाह्णः

१. पा० सू० ८।४।३
२. पा० सू० ८।४।१४
३. पा० सू० ६।१।६५
४. पा० सू० ८।४।३
५. पा० सू० ८।४।४
६. पा० सू० ८।४।६
७. पा० सू० ८।४।७

वाहनमाहितात्[१]	इक्षुवाहणम्
पानं देशे[२]	क्षीरपाणा उशीनराः
वा भावकरणयोः[३]	क्षीरपाणम्
प्रातिपदिकान्तनुम्विभक्तिषु च[४]	माषवापिणौ
एकाजुत्तरपदे णः[५]	वृत्रहणौ
कुमति च[६]	वस्त्रयुगिणौ
उपसर्गादसमासेऽपि णोपदेशस्य	प्रणमति
वा निंसनिक्षनिन्दाम्[७]	प्रणिंसनम्-प्रनिंसनम्
नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च[८]	प्रणिगदति
शेषे विभाषाऽकखादावषान्त उपदेशे[९]	प्रणिपचति
अनितेः[१०]	प्राणिति
अन्तः[११]	हे प्राण्
उभौ साभ्यासस्य[१२]	प्राणिणिषति
हन्तेरत्पूर्वस्य[१३]	प्रहण्यते
वमोर्वा[१४]	प्रहण्वः
अन्तरदेशे[१५]	अन्तर्हण्यते
अयनं च[१६]	अन्तरयणम्
छन्दस्यृदवदग्रहात्[१७]	नृमणाः
नश्च धातुस्थरुषुभ्यः[१८]	अग्नेरक्षाणः
उपसर्गाद्बहुलम्[१९]	प्रणः

१. पा० सू० ८।४।८
२. पा० सू० ८।४।९
३. पा० सू० ८।४।१०
४. पा० सू० ८।४।११
५. पा० सू० ८।४।१२
६. पा० सू० ८।४।१३
७. पा० सू० ८।४।३३
८. पा० सू० ८।४।१७
९. पा० सू० ८।४।१८
१०. पा० सू० ८।४।१९
११. पा० सू० ८।४।२०
१२. पा० सू० ८।४।२१
१३. पा० सू० ८।४।२२
१४. पा० सू० ८।४।२३
१५. पा० सू० ८।४।२४
१६. पा० सू० ८।४।२५
१७. पा० सू० ८।४।२६
१८. पा० सू० ८।४।२७
१९. पा० सू० ८।४।२८

एषूदाहरणेषु पूर्वपदस्थरेफषकाराभ्यां परस्य नस्य णत्वं तु अट्कुप्वाङ्नुम्भिर्व्यवधाने एव सम्भवति। यतो हि पूर्वपदस्थरेफषकाराव्यवहितोत्तरनत्वं नैवोपलभ्यते। तस्मात् "रषाभ्यां णो नः समानपदे" इति शास्त्रं "पूर्वपदात्संज्ञायामगः" इत्यादि शास्त्रेषु स्वकीयं समानपदत्वं विहायोपतिष्ठते।

अपि च पूर्वपदस्थरेफषकारौ यत्र निमित्तत्वेनोपतिष्ठेते तत्र तत्तद्विशेषनामपदानि, उपसर्गपदानि च सङ्गृह्यन्ते। अतः उपर्युक्तशास्त्रेषु पूर्वपदात्संज्ञायामगः" इति प्रथमं सूत्रं विहाय सर्वेषु तदधोलिखितसूत्रेषु तन्नामानि, उपसर्गपदानि च विशेषरूपेण सन्निविष्टानि सन्ति। एतावता एषु सङ्गृहीतसूत्रेषु पूर्वपदादिति प्रथमं सूत्रमन्यसूत्रापेक्षया सामान्यभूतमिति ज्ञायते।

प्रत्ययसम्बन्धिणत्वविधिः

प्रत्ययसम्बन्धिणत्वविधौ सामान्यतो "रषाभ्यां नोणः समानपदे" "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति शास्त्रद्वयं प्रवर्तते। तदुदाहरणानि च चतुर्णाम्, पुष्णाति, पुष्येण, रामाणामित्यादीनि प्रसिद्धान्येव। इतोऽन्यत्र प्रत्ययसम्बन्धिणत्वविधौ विशेषशास्त्राणि समुपलभ्यन्ते। तानि चोपसर्गनिमित्तमाधारीकृत्य प्रवर्तन्ते। तत्र तावत् "हिनु मीना[1]" इति विशेषशास्त्रेण प्रहिणोति, प्रहिणुतः, प्रमीणाति प्रमीणीतः इत्यत्र णत्वं भवति। "उपसर्गादसमासेऽपि णोपदेशस्य" इति पूर्वसूत्रादुपसर्गादिति पदमनुवर्तते। तेनोपसर्गस्थान्निमित्तादुत्तरस्य "हिनुमीना" इत्येतयोर्नकारस्य णकारादेशो विधीयते। एवम् "आनि लोट्[2] इति शास्त्रेण लोट्सम्बन्ध्यानीत्यस्य नकारस्य णत्वं प्रभवाणि, परियाणि प्रभृतिषु सिध्यति। एतच्च "हिनुमीना' 'आनि लोट्' इति सूत्रद्वयं तिङ्प्रत्ययसम्बन्धे सङ्घटते। यतो हि श्नु,श्नेति प्रत्ययौ सार्वधातुकतिङ्निमित्तमादायैवोपतिष्ठेते। आनीत्यस्य तु लोट्लकारसम्बन्धत्वात् तिङ्न्तमेव गृह्यते। तेन 'प्रवपानि बीजानि' इत्यत्र सुबन्ते णत्वं न भवति। एतत्सूत्रद्वयं परित्यज्यान्यानि प्रत्ययसम्बन्धिणत्वविधायकविशेषशास्त्राणि तु कृदन्तप्रत्ययसम्बन्धिनकारस्य णत्वं विदधति। तद्यथा 'कृत्यच[3]' इति शास्त्रेणोपसर्गस्थनिमित्तादुत्तरस्य कृत्प्रत्ययसम्बन्ध्यजव्यवहितोत्तरस्य नकारस्य णकारादेशः सामान्यतो भवति। तेन प्रयाणम्, प्रमाणम्, प्रयाणीयमित्यादौ णत्वं सिध्यति। एष च णत्वविधिर्ण्यन्ताद्-

१. पा० सू० ८।४।१५
२. पा० सू० ८।४।१६
३. पा० सू० ८।४।२९

विहितकृत्प्रत्ययसम्बन्धिनकारस्य णत्वविधाने वैकल्पिकः। एतदर्थमनुशासनमस्ति 'णेर्विभाषा[१]' इति। तेन प्रयापणम्–प्रयापनम् इत्युभयमपि व्यवह्रियते। अत्राप्यजव्यवहितोत्तरत्वं प्रत्ययनकारस्य पूर्ववदभिप्रेतमेव। इतः परं प्रत्ययसम्बन्धिवैकल्पिकणत्वविधौ 'हलश्चेजुपधात्[२]' इति शास्त्रमायाति। अनेन च इजुपधात् हलादिधातोर्विहितस्य कृत्यच उत्तरस्य णत्वं विकल्प्यते। तेन प्रकोपणम्–प्रकोपनम् इत्युभावपि प्रयोगौ प्रसिध्यतः। अत्र 'कृत्यचः' इति सामान्यशास्त्रेण णत्वविधिः प्राप्तः। स चानेन विशेषरुपेण विभाष्यते। एवं प्रमङ्गनमित्यत्र प्रोपसर्गपूर्वकमगिधातो ल्युट् प्रत्यये सति इदितत्वान्नुमि, परसवर्णे कृते योरनादेशे च जाते 'कृत्यचः' इति सामान्यसूत्रेण णत्वं सम्भाव्यते। किन्तु तन्नियमार्थम् 'इजादेः एनुमः[३]' इति विशेषशास्त्रमाविर्भवति। अत्र 'हलश्चेजुपधात्' इति पूर्वसूत्राद् हल इति पञ्चम्यन्तं पदमनुवर्तते। तस्मादिजादेः सनुमो हलन्ताद्धातोर्विहितकृदन्तस्थनकारस्य णत्वं भवतीत्यर्थे जाते 'प्रेङ्खणम्, प्रोम्भणम्' इत्यादौ नकारस्य णत्वं भवति। प्रमङ्गनमित्यत्र तु तथा नास्ति, अतो न णत्वमिति विवेकः।

णत्वविधौ निषेधरूपापवादसूत्राणि

निषेधरूपापवादसूत्राणि चात्र सन्ति षट्—
'न भाभूपूकमिगमिप्यायीवेपाम्[४]'
'षात्पदान्तात्[५]'
'नशेः षान्तस्य[६]'
'पदान्तस्य[७]'
'पदव्यवायेऽपि[८]'
'क्षुभ्नादिषु च[९]' इत्येतानि।

एतेषु 'न भाभूपूकमिगमिप्यायीवेपाम' इति प्रथमं निषेधशास्त्रं विद्यते। तच्च 'कृत्यचः' इति सामान्यशास्त्रविहितणत्वं प्रतिषेधति। तेन प्रभापनम्, प्रभवनम् प्रभृतिषु णत्वं न श्रूयते। अत्र परिगृहीतधातूनां णत्वनिषेधे वार्तिककारेण 'ण्यन्तभादीनामुपसङ्ख्यानम्' इति स्वीक्रियते। ततः प्रभापनम्, प्रभावनम् इत्यत्र णिचि णत्वाभावः सिध्यति। निष्पानम्,

१. पा० सू० ८।४।३०
२. पा० सू० ८।४।३१
३. पा० सू० ८।४।३२
४. पा० सू० ८।४।३४
५. पा० सू० ८।४।३५
६. पा० सू० ८।४।३६
७. पा० सू० ८।४।३७
८. पा० सू० ८।४।३८
९. पा० सू० ८।४।३९

दुष्पानम् इत्यच तु 'कृत्यचः' इति सामान्यसूत्रेण प्राप्तणत्वस्य निषेधाय 'षात्पदान्तात्' इति विशेषशास्त्रं प्रवर्तते। यतो 'न भाभूपूकमिगमिप्यायीवेपाम्' इति सूत्रात् नेति पदमग्रिमेषु पञ्चषु सूत्रेष्वनुवर्तते। पूर्वोक्तनिषेधसूत्रादत्र वैशिष्ट्यमिदमस्ति यन्निमित्तो षत्वं पदान्तत्वञ्चेत्युभयमत्रावश्यकम्। अतो निर्णयः, पुष्णाति इत्यत्र णत्वं न निषिध्यते। एवं 'प्रनष्टः' इत्यत्र 'उपसर्गादसमासेऽपि णोपदेशस्य' इति सामान्यशास्त्रविहितणत्वनिषेधाय 'नशेः षान्तस्य' इति तद्विशेषशास्त्रं प्रवर्तते। तदनु 'पदान्तस्य' इति निषेधरूपापवादशास्त्र रामान्, मनुष्यान् इत्यादौ 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति शास्त्रेण प्राप्तं णत्वं प्रतिषेधति। एवं चतुरङ्गयोगेन 'माषकुम्भवापेन' इत्यत्र च 'कुमति च' इति शास्त्रविहितणत्वस्य निषेधः 'पदव्यवायेऽपि' इति शास्त्रेण क्रियते। अन्ते च पूर्वोक्तणत्वविधायकशास्त्रैः स्वस्वनिमित्तत्वमादाय प्राप्तस्य सर्वस्य णत्वस्य निषेधः 'क्षुभ्नादिषु च' इति शास्त्रेण क्रियते। यतो हि क्षुभ्नादिराकृतिगणः। अतो नैकेन, शास्त्रेण णत्वनिषेध इति निश्चयः। तथा च 'क्षुभ्नीतः' इत्यत्र अट्कुप्वाङिति प्राप्तस्य णत्वस्य निषेधो 'नृनमनः' इत्यत्र तु 'पूर्वपदात्संज्ञायामगः' इत्यनेन प्राप्तस्य णत्वस्य निषेधोऽपि सिध्यति। एवं णत्वनिषेधरूपापवादशास्त्राणामपि परिचयो जातः।

तदित्थमिह षत्वविधिविवेचनानन्तरं णत्वसम्बन्ध्युत्सर्गापवादशास्त्राण्यपि विवेचितानि।

पञ्चमो विमर्शः

प्रत्ययविधावुद्देश्यभूताःप्रकृतयः

षत्वणत्वविधिविवेचनानन्तरं प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणां वर्गीकरणं प्रस्तूयते। शब्दानुशासने प्रत्ययसम्बन्धिशास्त्राणां बाहुल्यमस्ति। यतोहि प्रकृतिप्रत्यययोः सामरस्येन पदानि व्युत्पाद्यन्ते। तत्र प्रथमं धातुरूप-प्रकृत्यासह प्रत्ययानांसम्बन्धो भवति। तदनन्तरं प्रातिपदिकादपि प्रत्ययाः जायन्ते। प्रातिपदिकस्य द्वैविध्यमपि प्रत्ययसापेक्ष्यमनुभवति। यतोहि यत्र प्रकृतिप्रत्ययसहयोगेन प्रातिपदिकपदानि जायन्ते, तानि किलयोगजानि कथ्यन्ते। यत्र च प्रकृतिप्रत्यययोः सम्बन्धः सुलभो नास्ति, तत्राव्युत्पन्नप्राति-पदिकानि भवन्ति। तेभ्योऽपि सुबादिप्रत्ययानांसम्बन्धः संघटत एव। धातोरित्यधिकारेतुकृत्तिङ्भेदेन प्रत्ययानां द्वैविध्यं स्वीक्रियते।

अतः पूर्वमिह धातुविहितकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि विमृश्यन्ते। प्रत्ययविधौ च सामान्यत एष नियमः सर्वत्र भाति यत् प्रत्ययाः प्रकृतिपरा एव जायन्ते। तथा च तृतीयाध्यायायस्यादावेव सूत्रद्वयमुपन्यस्त-मस्ति 'प्रत्ययः[1]' 'परश्चेति[2]'। एतावता धातोर्विहितकृत्तिङ्प्रत्ययानां प्रकृतेः परत्वं न कुत्रापि व्यभिचरति। एवमेव प्रातिपदिकाद्विहितसुप्प्रत्ययानां परत्वमपि सुनिश्चितमेव।

यत्र तु सुबन्ताद्विहिततद्धितप्रत्ययेषु बहुचि, अकचि च प्रत्यये प्रत्य-यानां परत्वं व्यभिचरति, तत्रविशेषपदोपादानेन सामान्यशास्त्रस्य बाधो-बोध्यः। यथा 'विभाषासुपोबहुच् पुरस्तात्[3]' इति शास्त्रे पुरस्तादिति-पदं वर्त्तते।

अतः पुरस्तादितिविशेषपदोपादानेन प्रत्ययपरत्वस्य बाधो भवति। तेन इषदसमाप्तः पटुः इति विग्रहे बहुपटुः इत्यत्र बहुच् प्रकृतेः पूर्व एव भवति, नतु परः। तथा 'अव्ययसर्वनाम्नामकच् प्राक् टेः[4]' इति शास्त्रे प्राक् टेः इति विशेष वचनेनाकच् प्रत्ययेऽपि उच्चकैः, नीचकैः उभकौ सर्वकः प्रभृतिषु प्रकृतेः टेः प्रागेव दृश्यते, नतु प्रकृतेः परः।

---

१. पा० सू० ३।१।१
२. पा० सू० ३।१।२
३. पा० सू० ५।३।६८
४. पा० सू० ५।३।७१

तस्मादेतत् प्रत्ययद्वयंविहाय सर्वत्र प्रत्ययानां परत्वं नियतमेव। अस्तु। तदेवं प्रत्ययसम्बन्धिप्रकृतयो मूलतो धातुप्रातिपदिकसुबन्तभेदेन त्रिधा सिद्धाः।

धातुविहितकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि

पाणिनीयशब्दानुशासने धातुसंज्ञाविधायकं सूत्रद्वयं वर्त्तते। तत्र प्रथमेन 'भूवादयोधातवः[1]' इति सूत्रेण भ्वादिगणादारभ्य क्र्यादिगणं यावन्न-वगणीयपठितानां भू, एव, प्रभृतीनां धातुसंज्ञा भवति। द्वितीयेन 'सनाद्यन्ता-धातवः[2]' इतिशास्त्रेण च सनादिद्वादशप्रत्ययविहित्तदादेः धातुसंज्ञा भवति। सनादयो द्वादशप्रत्ययाश्च 'सन्क्यच्काम्यच्क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा, यगाय इयङ् णिङ् चेति द्वादशामी सनादयः। इत्येवं संगृहीताः सन्ति। एषां प्रत्ययानां सन्निवेशश्चाष्टाध्याय्यास्तृतीयस्य प्रथमपादे एवमुपलभ्यते।

एतद्विवेचनञ्च यथावसरमग्रे करिष्यते। पूर्वमत्र कृत्प्रत्यय-सम्बन्ध्युत्सर्गापवादशास्त्राणि विमृश्यन्ते। तत्र धातुभिः सार्धं कृत्प्रत्ययानां साक्षात्सम्बन्धो वर्त्तते। धातुविहितलडादेशतिबादिप्रत्ययानान्तु प्रायः तथा नास्ति, यतो मध्ये कश्चन शबादिविकरणः समापतति।

अतः पूर्वं कृत्प्रत्ययानां सामान्यविशेषरूपेण विवेचनमत्रक्रियते। अत्रापवादविषये एष विशेषनियमो वर्त्तते यदपवादशास्त्रेणोत्सर्गशास्त्रस्य बाधो न सर्वथा नित्यः, अपितु वैकल्पिकः। तथा च शास्त्रमस्ति 'वाऽसरूपोऽस्त्रियाम्[3]' इति। एतत् तात्पर्यमिदमस्ति यत् 'धातोः[4]' इति सूत्राधिकारे विहितो ऽसरूपोऽपवादप्रत्ययः उत्सर्गस्य बाधको भवति विकल्पेन, स्त्र्य-धिकारोक्तासरूपापवादप्रत्ययान् वर्जयित्वा। तेन तत्रस्थापवादप्रत्ययानां नित्यमेव बाधो भवति। अस्य वैकल्पिकापवादनियमस्य निदर्शनं यथा कृ धातोः 'तव्यत्तव्यानीयरः[5]' इत्युत्सर्गशास्त्रेण विहिततव्यादीनां प्रत्ययानां 'ऋहलोर्ण्यत्[6]' इति विशेषशास्त्रेण विहितण्यप्रत्ययेनासरूपत्वात् विकल्पेनैव बाधो भवति। ततश्चकार्यपदेसिद्धे सति कर्तव्यम्, करणीयम, इति पदद्वय-मपि तस्मिन्नेवार्थे प्रयुज्यत एव। 'स्त्रियां क्तिन्[7]' इत्यादि सामान्यशास्त्र-विहितक्तिन् प्रभृतिप्रत्ययास्तु तत्तदविशेषशास्त्रेण नित्यमेव बाध्यन्ते। तद्यथा

---

१. पा० सू० १।३।१
२. पा० सू० ३।१।३२
३. पा० सू० ३।१।९४
४. पा० सू० ३।१।९१
५. पा० सू० ३।१।९६
६. पा० सू० ३।१।१२४
७. पा० सू० ३।३।९४

चिकीर्षा, जिहीर्षा इत्यत्र 'अप्रत्ययात्[१]' इति सूत्रेण प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियां विहितेनाकारप्रत्ययेन क्तिन् प्रत्ययस्य नित्यमेव बाधो भवति। असरूपापवादत्वञ्च प्रथमविमर्शे विस्तरेण विवेचितम्।

इह तु धातुविहितासरूपप्रत्ययानामुत्सर्गापवादरूपेण विकल्पाविकल्प बाधभावः, तत्सूत्रोदाहरणनिर्देशपुरस्सरं विमृश्यते। तत्र तावद्धातु-विहितप्रत्ययाः सामान्यतः कर्त्तरि कर्मणि भावे च प्रवर्त्तन्ते। कृत्प्रत्ययेषु 'कृत्याः[२]' इति सूत्राधिकारविहितप्रत्ययाश्च भावे कर्मणि च जायन्ते न तु कर्त्तरि।

केवलं वास्तव्यः, इति प्रयोगमभिलक्ष्य 'वसेस्तव्यत्कर्त्तरि णिच्च[३]' इति वार्त्तिकेन कर्त्तृवाच्येऽपि तव्यत् प्रत्ययं विदधाति श्रीकात्यायनोमुनिः। इतोऽन्यत्र तु कृत्प्रत्यया भावेकर्मणि च विधीयन्ते। तथाचोक्तं 'तयोरेव-कृत्यक्तखलर्थाः[४]' इति। अत्र च 'लः कर्मणि च भावेऽचाकर्मकेभ्यः' इति पूर्व सूत्राद् भावे कर्मणि चेत्यनुवर्त्तनात्तयोरितिपदेन भावकर्मणोर्ग्रहणं भवति। ततश्च कृत्याधिकारप्रत्ययाः क्तखलर्थप्रत्ययाश्च भावकर्मणोरेव भवन्तीति सूत्रार्थः संघटते।

अतः 'ण्वुल्तृचौ[५]' इति सूत्रात्प्राक् प्रवर्त्तमानकृत्यप्रत्ययसम्बन्धि शास्त्राणामुत्सर्गापवादत्वमिह प्रस्तूयते। तत्र सर्वतः पूर्वमुत्सर्गशास्त्रमस्ति 'तव्यत्तव्यानीयरः' इति अनेन शास्त्रेण भावे कर्मणि च तव्यत् तव्य अनीयर् इत्येते प्रत्ययाः विधीयन्ते। अत्र यानि किल 'अचोयत्' 'पोरदुपधात्' प्रभृतिविशेषशास्त्राणि सन्ति, तानि विकल्परूपापवादकोटिं भजन्ते। यतोहि तत्तद्विशेषशास्त्रैर्यत्वयबादिविहितप्रत्ययाः असरूपभूता वर्त्तन्ते। ततश्च वाऽसरूपोऽस्त्रियाम्' इति नियमेन वैकल्पिकबाधः सुतरां सिध्यति। तेषां परिचयश्चात्र सोदाहरणमेवमस्ति

उत्सर्गशास्त्रम्	उदाहरणानि
'तव्यत्तव्यानीयरः[६]'	कर्त्तव्यम्, करणीयम्
एतद् वैकल्पिकापवादभूतानि शास्त्राणि	
'अचोयत्[७]'	चेयम्, चेतव्यम्, चयनीयम्
'पोरदुपधात्[८]' (यत्)	शप्यम्, शप्तव्यम्, शपनीयम्

१. पा० सू० ३।३।१०२
२. पा० सू० वा० ३।१।९५
३. पा० सू० ३।१।९६
४. पा० सू० ३।४।७०
५. पा० सू० ३।१।१३३
६. पा० सू० ३।१।९६
७. पा० सू० ३।१।९७
८. पा० सू० ३।१।९८

उत्सर्गशास्त्राणि	उदाहरणानि
'शकिसहोश्च[१]' (यत्)	शक्यम्, शकतव्यम्, शकनीयम्
'गदमदचरयमश्चानुपसर्गे[२]'	गद्यम्, गदितव्यम्, गदनीयम्, चर्यम्, चरितव्यम्, चरणीयम्,
'वदःसुपिक्यप् च[१]'	ब्रह्मोद्यम्, ब्रह्मवदनीयम् ब्रह्मवदितव्यम्
'भुवो भावे[२]' (क्यप्)	ब्रह्मभूयम्, ब्रह्मभवितव्यम्, ब्रह्मभवनीयम्
'हनस्तच[३]' (क्यप्)	ब्रह्महत्या, ब्रह्महन्तव्यम् ब्रह्महननीयम्
'एतिस्तुशास्वृदृजुषःक्यप्[४]'	इत्यः, एतव्यम्, अयनीयम्
'ऋदुपधाच्चाक्लृपिचृतेः[५]' (क्यप्)	वृत्यम्, वर्त्तितव्यम्, वर्त्तनीयम्
'ई च खनः[६]' (क्यप्)	खेयम्, खनितव्यम्, खननीयम्
भृञोऽसंज्ञायाम्[७]' (क्यप्)	भृत्यः, भर्तव्यम्, भरणीयम्,
मृजेर्विभाषा[८]' (क्यप्)	परिमृज्यः, परिमार्जितव्यम्, परिमार्जनीयम्
'प्रत्यपिभ्यां ग्रहेश्छन्दसि[९]' (क्यप्)	प्रतिगृह्यम प्रतिग्रहीतव्यम्, प्रतिग्रहणीयम्
'पदास्वैरिबाह्यापक्ष्येषु च[१०]' (क्यप्)	अवगृह्यम्, अवग्रहीतव्यम्, अवग्रहणीयम्
'विभाषाकृवृषोः[११]' (क्यप्)	कार्यम्, कर्त्तव्यम्, करणीयम्,
'अमावस्यदन्यतरस्याम्[१२]' (ण्यत्)	अमावस्या, अमावसितव्यम्, अमावसनीयम्
'ऋहलोर्ण्यत्[१३]'	कार्यम्, कर्तव्यम्, करणीयम्,
'ओरावश्यके[१४]' (ण्यत्)	लाव्यम्, लवितव्यम्, लवनीयम्,
'आसुयुवपिरपिलपित्रपि चमश्च[१५]' (ण्यत्)	आसाव्यम्, आसोतव्यम्, आसवनीयमिति ।

एतानि सूत्राणि 'तव्यत्तव्यानीयरः' इति सामान्यशास्त्रस्य विकल्पापवादभूतानि सन्ति । तत्र 'अचोयत्' इति सूत्रं 'तव्यत्तव्यानीयर' इति शास्त्रापेक्षयापवादभूतमपि 'ओरावश्यके' इति शास्त्रापेक्षया सामान्यमेवास्ति ।

१. पा० सू० ३।१।९९
२. पा० सू० ३।१।१००
३. पा० सू० ३।१।१०६
४. पा० सू० ३।१।१०७
५. पा० सू० ३।१।१०८
६. पा० सू० ३।१।१०९
७. पा० सू० ३।१।११०
८. पा० सू० ३।१।१११
९. पा० सू० ३।१।११२
१०. पा० सू० ३।१।११३
११. पा० सू० ३।१।११८
१२. पा० सू० ३।१।११९
१३. पा० सू० ३।१।१२०
१४. पा० सू० ३।१।१२२
१५. पा० सू० ३।१।१२४
१६. पा० सू० ३।१।१२५
१७. पा० सू० ३।१।१२७

अतः लाव्यम्, इत्यत्र 'ओरावश्यके' इति शास्त्रेण यत् प्रत्ययमपवाद्य ण्यद्विधीयते। अत्र ण्यति, यति, चासरूपत्वं नानुबन्धकृतमसारूप्यम्' इति परिभाषया प्रतिषिद्धम्। अतो ण्यति लाव्यम्' तद् असरूपत्वपक्षे तु तव्यति, अनियरि, च लवितव्यम् लवनीयम्, इति रूपद्वयमेव भवति न तु आवश्यके द्योत्ये लव्यम् इति भावः। आवश्यके द्योत्याभावे तु लभ्यमित्यत्र 'अचोयत्' इति शास्त्रेण यत् प्रत्ययो भवत्येव।

एवम 'आसुयुवपिरपिलपित्रपि चमश्च' इति शास्त्रमपि 'अचोयत्' 'पोरदुपधात्' इति शास्त्रद्वयविहितं यत्प्रत्ययमपवाद्य ण्यत् प्रत्ययं विदधाति। पूर्ववदत्रापि ण्यत्प्रत्ययस्यासरूपत्वपक्षे 'तव्यत्तव्यानीयर' इति शास्त्रमेव प्रवर्त्तते न तु यद्विधायकमेतच्छास्त्र द्वयमिति बोध्यम्।

तदेवमेभिः सूत्रैस्तदुदाहरणैश्चेह कृत्प्रत्ययसम्बन्ध्युत्सर्गापवाद-शास्त्राणां वैकल्पिकबाधविधेः परिचयः सम्पन्नः।

'स्त्र्यधिकारविहितधातुसम्बन्धिप्रत्ययानामुत्सर्गापवादत्वम्'

इतः पूर्वं धातोर्विहितभावकर्म सम्बन्ध्यसरूपप्रत्ययानामुत्सर्गापवादत्वं विवेचितम्। तत्र प्रत्ययानामसरूपापवादत्वादपवादशास्त्रस्य वैकल्पिकत्वं प्रदर्शितम्। यतोहि अपवादस्य वैकल्विकत्वे 'वाऽसरूपोऽस्त्रियाम्' इति शास्त्रमुपात्तम्। तत्रास्त्रियामितिपदेन स्त्रियां क्तिन' इति सूत्रादारभ्य 'आक्रोशेनञ्यनिः' इति सूत्रं यावत् स्त्र्यधिकारविहितप्रत्यया वर्त्तन्ते। तेषां प्रत्ययानाञ्चोत्सर्गापवादत्वमसरूपत्वेऽपि नित्यमेव भवति। अतस्तेषां विवेचनमिहावश्यकमिति मत्वा यथाक्रममुपरस्थाप्यते। तत्र 'स्त्रियां क्तिन्' इति शास्त्रं 'हलश्च इति सामान्यशास्त्रेण विहितघञ्प्रत्ययमपवाद्य कृधातोः स्त्रीलिङ्गे भावादौ क्तिन् प्रत्ययं विदधाति। तेन कृतिरित्यत्र स्त्रीत्व-विशिष्टेभावे क्तिन्नेव भवति न तु घञ्प्रत्ययः, घञ्प्रत्ययस्य क्तिनोऽसरूप-त्वेऽपि अस्त्रियामिति प्रतिषेधस्य जागरूकत्वात्। पुंस्त्वविशिष्टे भावे तु हलश्चेति सूत्रेण घञि कृते कारः इति प्रयोगः सिध्यत्येव।

अत्र 'स्त्रियां क्तिन् इति सूत्रव्याख्याने काशिकाकारः कथयति यदेष क्तिन् प्रत्ययः 'घञजपामपवादः किन्तु भट्टोजिदीक्षितः तथा न स्वीकरोति। सतु मनुते यत् क्तिन् प्रत्ययः घञोऽपवादः, अजपौ तु स परत्वाद्बाधते। तात्पर्यंत्विदमस्ति यत् "एरच" "ऋदोरप्' इति सूत्रद्वयं "स्त्रियां क्तिन्" इति सूत्रापेक्षया प्रबलम्, यतोहि इकारान्ताद्धातोः "एरच्" इति सूत्रेणाच् प्रत्ययः ऋकारान्तादुकारान्ताच्च धातोरप्प्रत्ययः इत्युभावप्यत्र स्त्रीत्व-

विशिष्टे भावादौ प्राप्नुतः । तत्र स्त्रियां क्तिनिति सूत्रापेक्षया विशेषविहितत्वात्क्तिन्प्र त्ययं बाधित्वा तौ स्यातामिति सम्भाव्यते, किन्तु तदप्राप्तियोग्येऽनयोरचारितार्थ्यं नास्ति, यतोहि चयः, जयः, करः, स्तवः, प्रभृतिषु तयोरजपोश्चारितार्थ्यमस्ति । स्त्रियां क्तिनित्यस्य चारितार्थ्यन्तु स्फीतिरित्यत्र सुलभमस्ति । अतोऽपवाद स्वरूपं न संघटते ।

तस्मात् चितिः, कृत्तिः, स्तुतिः, इत्यत्र तुल्यबलविरोधत्वेन विप्रतिषेधत्वात् स्त्रियां क्तिनिति सूत्रेणाजपोः परत्वादेव बाधो भवति न त्वपवादत्वादिति दीक्षितमतं प्रतिभाति । अस्तु ।

स्त्रियां क्तिनिति शास्त्रविहितक्तिन प्रत्ययस्यापि ये किलासरूपापवादभूताः प्रत्ययाः सन्ति तेषां विवेचनमेवं वर्त्तते । तत्र प्रथमं व्रज्यते, इज्यते, इति विग्रहे क्यपि "व्रजयजोर्भावे क्यप्" इति शास्त्रेण क्यबेव भवति न तु क्तिन् ।

एवं चिकीर्षा, जिहीर्षा, इत्यत्र "अप्रत्ययात्" इति शास्त्रेण प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियां क्तिन प्रत्ययमपवाद्य अकारप्रत्ययो जायते । अस्य "अप्रत्ययात्" इति शास्त्रविहिताकारप्रत्ययस्यापवादस्तु "ण्यासश्रन्थोयुच्[१]" इति विशेषशास्त्रविहितयुच्प्रत्ययेन भवति, तेन कारणा, आसना, ग्रन्थनेति पदानि सिध्यन्ति । एवमस्य युच्प्रत्ययस्याप्यपवादः "चिन्तिपूजिकथिकुम्बिचर्चश्च[२]" इति शास्त्रविहिताङ्प्रत्ययेन क्रियते । तथा च चिन्ता, पूजा, कथा, कुम्बा, चर्चेति पदानि व्यवह्रियन्ते । सूत्रेऽस्मिन् चर्चश्च इत्यत्र चकारपदेन युजपि भवतीति स्ववृत्तौ काशीकाकारो मन्यते, तेन चिन्तनापि भवति, किन्तु तट्टीकाकारः पदमञ्जर्यामाचार्यो हरदत्तः तथा न स्वीकरोति । स तु चकारोऽनुक्त समुच्चयार्थः तेन तोलयतेस्तुलेति, अत एव तुलां यदारोहति दन्तवासशा" इति नैषधकृदाहेति शिष्टप्रयोगमपि प्रमाणत्वेनोदाजहार । तदनु सर्वैः टीकाकारैश्च तथैव व्याख्यातम् । तस्मादेष पक्ष एव युक्तः प्रतिभाति । अस्तु, "गुरोश्च हलः" इति शास्त्रविहिताकारप्रत्ययोऽपि "स्त्रियां क्तिन्" प्रत्ययेन विशेषविहितत्वात् प्रबाध्यते ।

एवं "षिद्भिदादिभ्योऽङ्" इति शास्त्रेण "स्त्रियां क्तिनिति शास्त्रविहितक्तिन् प्रत्ययमपवाद्याङ्प्रत्ययो विधीयते । तेन जृष्वयोहानौ इत्यस्मात् धातोरङि जरा इति पदं सिध्यति । तथा भिदिरविदारणे छिदिरद्वैधीकरणे इत्यादिभिदादिगणपठितधातुभ्योऽङि च भिदा, छिदा, प्रभृतिशब्दाः सिध्यन्ति ।

१. पा० सू० ३।३।१०४ २. पा० सू० ३।३।१०५

किञ्च स्त्रियां क्तिनितिशास्त्रैरपवादभूतं शास्त्रम 'आतश्चोपसर्गे' इति विशेषशास्त्रं प्रवर्त्तते। तेन प्रदा, उपदा, इत्यत्राङेव भवति न तु क्तिनिति। 'आतश्चोपसर्गे' इति विशेषशास्त्रस्याप्यपवादभूतं शास्त्रमस्ति 'स्थागापापचोभावे' इति। तेन प्रस्थितिः, संगीतिः, सम्पीतिः इत्यत्र क्तिन्नेव भवति न त्वङ् प्रत्ययः। पक्तिरित्यत्र तु डुपचष् पाके इत्यस्माद् धातोः पूर्वं स्त्रियां क्तिनिति सामान्यशास्त्रेण क्तिन्प्रत्ययः प्राप्तः। तमपवाद्य 'षिद्-भिदादिभ्योऽङ्' इति विशेषशास्त्रेणाङ्प्राप्तः। ततोऽपि विशेषशात्रेण 'स्थागापापचो भावे' इत्यनेन क्तिनेव विधीयते। 'आतश्चोपसर्गे' षिद्भिदा-दिभ्योऽङ्' इति शास्त्रद्वयस्य स्वोद्देश्यतावच्छेदकेन प्रतिप्रसवरूपा-पवादत्वं भजते।

एवमग्रेऽपि ण्वुल्, ण्वुच्, प्रत्ययावपि सामान्यशास्त्रविहितक्तिन् प्रत्ययस्यापवादभूतौ स्तः। तेन प्रच्छर्दिका, प्रवाहिका, इत्यत्र ण्वुल् भवति। भवतः शायिका, अर्हति भवानिक्षभक्षिकामित्यादि प्रयोगेषु ण्वुलेव भवति, न तु तिङ् प्रत्ययो न चाङ् प्रत्ययः। तथा च शास्त्रद्वयमत्रोपतिष्ठते। 'रोगाख्यायां ण्वुल्बहुलम् पर्यायार्हणोत्पत्तिषुण्वुच्' इति। तत्रेक्षुभक्षिकेत्यत्र 'गुरोश्च हलः' इति विहितस्याप्रत्ययस्यापि अपवादभूतो ण्वुच् प्रत्ययो वर्त्तते।

एवम् 'आक्रोशे नञ्यनिः' इति शास्त्रेणाक्रोशे द्योत्येविहितानि प्रत्ययः क्तिन्प्रत्ययमपवाद्य प्रवर्त्तते। तेनाकरणिस्ते वृषल्भूयादित्यत्रानिः प्रत्ययः सिध्यति।

एषामेव स्त्र्याधिकारविहितासरूपापवादप्रत्ययानां वैकल्पिकबाधो न भवतीति निश्चयः।

एतद्वर्गीकरणम्

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	उदाहरणानि
'स्त्रियां क्तिन्[१]' कृतिः	'व्रजयजोर्भावे क्यप्[२]'	व्रज्या, इज्या
	'अप्रत्ययात्[३]'	चिकीर्षा
	'गुरोश्च हलः[४]'	कुण्डा
	'षिद्भिदादिभ्योऽङ्[५]'	जरा
	'आतश्चोपसर्गे[६]'	प्रदा

१. पा० सू० ३।३।९४
२. पा० सू० ३।३।९८
३. पा० सू० ३।३।१०२
४. पा० सू० ३।३।१०३
५. पा० सू० ३।३।१०४
६. पा० सू० ३।३।१०६

'आतश्चोपसर्गे	'स्थागापापचोभावे[1]'	प्रस्थितिः
'षिद्भिदादिभ्योऽङ्'	'स्थागापापचोभावे'	पक्तिः
'स्त्रियां क्तिन्'	'रोगाख्यायां ण्वुल्बहुलम्[2]'	प्रच्छर्दिका
'स्त्रियां क्तिन्'	'पर्यायार्हणोत्पत्तिषु ण्वुच्[3]'	अर्हति भवान् इक्षुभक्षिका
'गुरोश्च हलः'	'पर्यायार्हणोत्पत्तिषु ण्वुच्	,,
'स्त्रियां क्तिन्'	'आक्रोशे नञ्यनिः[4]'	अकरणिस्ते वृषल् भूयात्

तदित्थमिह विवेचितानामसरूपप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वरूपेण सोदाहरणं वर्गीकरणं सम्पन्नम् ।

क्तखलर्थविधायकसूत्रविवेचनम्

भावकर्मवाचककृत्यप्रत्ययानामुत्सर्गापवादत्वविवेचनानन्तरं 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रोक्तक्तखलर्थप्रत्यया अपि प्रसङ्गतो विविच्यन्ते । यतः तेऽपि भावे कर्मणि च प्रवर्त्तन्ते । तत्र निष्ठा' इति सूत्रविहितक्तप्रत्ययस्य किमप्यपवादशास्त्रं नोपलभ्यते, उत्सर्गसमानदेशात्वाभावात् । यतोहि एतौ किल प्रत्ययौ 'भूते' इति सूत्राधिकारात् सामान्यतः भूतकाले एव भवतः । तत्र क्तप्रत्ययो भावे कर्मणि क्तवतु प्रत्ययस्तु कर्तर्येव दृश्यते । इतोऽन्यत्र यत्र कुत्रापि विशेषशास्त्रेण क्तप्रत्ययो दृश्यते । तत्र वर्त्तमानकाले, आदिकर्मणि, कर्तरि तथा अधिकरणेचेति कालः कारकाणि च नियतानि सन्ति । अत उत्सर्गापवादस्य तत्र प्रश्न एव नास्ति । तानि क्तप्रत्ययविधायकविशेषशास्त्राणि चेह संगृह्य व्याख्यायन्ते । तत्र सूत्रपाठक्रमश्चैवमस्ति ।

'ञीतः क्तः' ६।२।१८७
'मतिबुद्धिपुजार्थेभ्यश्च' ३।२।१८८
'नपुंसके भावे क्तः' ३।३।११४
'आदि कर्मणि क्तः कर्तरि च' ३।४।७१
'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरूहजीर्यतिभ्यश्च' ३।४।७२
'क्तोऽधिकरणे च ध्रौव्यगति प्रत्यवसानार्थेभ्यः' ३।४।७६

एषु 'ञीतः क्तः' इति सूत्रेण ञिमिदा स्नेहने इत्यस्माद् धातोर्वर्त्तमानेऽपि क्तप्रत्ययो भवति । 'निष्ठा' इति सामान्यशास्त्रेण तु भूतार्थे क्तप्रत्ययो

१. पा० सू० ३।३।९५
२. पा० सू० ३।३।१०८
३. पा० सू० ३।३।१११
४. पा० सू० ३।३।११२

विहितः। अनेन तु ञित् 'धातोः' वर्त्तमानेऽपि क्तप्रत्ययो विधीयते। अत्र ञित्वं वर्त्तमानत्वञ्चेत्युभयं विशिष्यते।

एवं राज्ञां मतः, राज्ञां मिष्टः, राज्ञां बुद्धः, प्रभृतिषु 'मतिबुद्धि-पूजार्थेभ्यश्च' इति शास्त्रेण वर्त्तमानार्थे क्तप्रत्ययो भवति। इदं शास्त्रं 'ञीतः क्तः' इतोऽपि विशेषभूतं वर्त्तते। यतः तत्र सामान्यतो ञित्सम्बन्धिधातूनां ग्रहणमत्र तु विशेषरूपेण मतिबुद्धिपूजार्थकधातूनामेव निर्देशो जातः। तस्मात् पूर्वापेक्षयास्य विशेषत्वं वर्त्तत एव।

एवं 'नपुंसके भावे क्तः' इति शास्त्रेण क्तप्रत्ययस्तु हसितम्' शयितमित्यत्र नपुंसकलिङ्गे भावे विधीयते। अतः पूर्वापेक्षयालिङ्गनिर्धा-रणत्वेनापूर्वत्वं प्रतिभाति। यद्यपि तयोरेव कृत्यक्तखलर्था इति नियमात् निष्ठा ञितः क्तः, प्रभृतिपूर्वोक्तसूत्रविहितक्तप्रत्ययः भावकर्मणोरेव भवति, तथापि प्रकृतः कटं देवदत्तः, इत्यत्र कर्तर्यपि क्तप्रत्ययो दृश्यते। तथाचानुशास्ति महर्षिपाणिनिः 'आदिकर्मणि क्तः कर्त्तरि च' इति सूत्रेण। अत्र आदि कर्मणिपदेन प्रारम्भकालो गृह्यते। ततश्चास्मिन्नर्थे विशेषरूपेण कर्तरि, भावे, कर्मणि चापि पूर्ववत् क्तप्रत्ययो भवत्येव। अतः प्रकृतः कटो देवदत्तेन, प्रकृतं देवदत्तेन इत्यपि व्यवह्रियते। कर्मणोऽविवक्षातः कृधातोरकर्मकत्वमतोऽत्रभावेऽपि क्तप्रत्यय इति भावः।

एवं गत्यर्थेभ्योऽकर्मकेभ्यः श्लिषादिभ्यश्च धातुभ्यः क्तः प्रत्ययः कर्त्तरि भवति। तदर्थमनुशासनमस्ति 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-जीर्यतिभ्यश्च' इति। इदमपि शास्त्रं कर्त्तरि क्तप्रत्ययविधानेऽपूर्वत्वं भजते। भावे कर्मणि तु सामान्यशास्त्रेणापि क्तप्रत्ययस्य प्राप्तिरस्त्येव। अतएव गङ्गां गतो देवदत्तः' गङ्गा गता देवदत्तेन, गतं देवदत्तेन इति पूर्ववद् वाच्यत्रयं व्यवह्रियते।

तदेवम् 'आदिकर्मणि क्तः कर्त्तरि च' 'गत्यर्थाकर्मकश्लिषशीङ्स्थास-वसजनरुहजीर्यतिभ्यश्च' इति सूत्रद्वयेन कर्तृवाच्येऽपि क्तप्रत्ययः साधितः।

अपि चैष क्तप्रत्ययः 'इदमेषामासितम्, 'इदमेषां यातम्', इदमेषां भुक्तमित्यत्राधिकणेऽपि 'ध्रौव्यगतिप्रत्ययवसानार्थेभ्यो-धातुभ्यो दृश्यते। तथाचानुशासनमस्ति 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यव-सानार्थेभ्यः' इति। अत्रापि पूर्ववद् यथा योग्यं कर्त्तरि कर्मणि भावे च क्त प्रत्ययो भवत्येव। अत एव पूर्ववदस्मिन् सूत्रेऽपि तत्संग्रहाय चकारपद-मुपात्तमस्ति।

तदेवमेभिः सूत्रैः कर्त्तरि नपुंसकेभावे 'आदिकर्मणि, अधिकरणेऽपि क्तप्रत्ययो विधीयते। एष्वर्थेषु निष्ठेति सामान्यशास्त्रविहितक्तप्रत्ययस्य प्रवृत्तिर्न भवति। अतोऽपूर्वविधित्वमेषां शास्त्राणां न तूपसर्गापवादभाव इति।

खलर्थप्रत्ययविधायकशास्त्रेषूत्सर्गापवादत्वं तु वर्त्तत एव। तद्यथा 'ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल्'[१] इत्युत्सर्गशास्त्रेण ईषद् दुःसुषूपपदेषु धातोः खल्प्रत्ययः कृच्छ्राकृच्छ्रार्थेषु विधीयते। तेनेषत्करः, दुष्करः, सुकर इति पदानि सिध्यन्ति, किन्तु ईषत्पानः सोमो भवता, दुष्पानः, सुपानः इत्यत्र 'आतोयुच'[२] इति शास्त्रेण एषूपपदेष्वर्थेषु चाकारान्तधातोर्युच् प्रत्ययो भवति, न तु खलप्रत्ययः। यतोहि 'आतोयुच्' इति शास्त्रस्य क्षेत्रं पूर्वोक्तशास्त्रापेक्षया व्याप्यमस्ति, अतो व्याप्यशास्त्रेण व्यापकशास्त्रस्य बाध इत्युत्सर्गापवादभावोऽत्र जार्गात। एवमुक्तार्थेषूपपदेषु च 'छन्दसि गत्यर्थेभ्यः'[३] इति शास्त्रेण गत्यर्थकधातुभ्यो युच्प्रत्ययः खल्प्रत्ययमपवाद्य विधीयते। तेन सूपसदनोऽग्निः, इति वैदिकपदं सिध्यति।

सुवेदनामकृणोत् ब्रह्मणे गामिति वेदवाक्यस्थसुवेदनापदस्य सिद्धिस्तु 'अन्येभ्योऽपि दृश्यते'[४] इति विशेषशास्त्रविहितयुच्प्रत्ययेन भवति। यतोहि विदे गत्यर्थकत्वाभावात् पूर्वोक्तसूत्रन्तुनात्र प्रवर्त्तते। अतः खल्प्रत्ययविधायकशास्त्रस्यात्रावश्यप्राप्तौ शास्त्रमेतज्जातमिति सिद्धमस्याप्यपवादत्वम्। अत्र 'छन्दसि गत्यर्थेभ्यः' 'अन्येभ्योऽपि दृश्यते' इत्युभे शास्त्रे वैदिकपदानां संसिद्धौ खल्प्रत्ययविधायकशास्त्रस्याप्यपवादभूते स्तः। 'आतोयुच्' इति शास्त्रन्तु लौकिकपदसिद्धिमभिलक्ष्यापवादभूतमित्युक्तसूत्रे छन्दसीति पदनिर्देशादेवावगम्यते

तदित्थमिह प्रतिज्ञातं क्तखलर्थविधायकसूत्रविवेचनं निष्पन्नम्।

'कर्तृवाचिकृत्प्रत्ययानामुत्सर्गापवादत्वम्'

भावकर्मवाचि कृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्रविवेचनान्तरं प्राप्तक्रमाणां कर्तृवाचिकृत्प्रत्ययानामुत्सर्गापवादत्वं विमृश्यते। तत्र धातोरित्यधिकारस्तु तृतीयाध्यायं यावत् प्रवर्त्तत एव। अतो 'वाऽसरूपोऽस्त्रियाम्' इति परिभाषाशास्त्रनियमेन धात्वधिकारेऽस्मिन् असरूपोऽपवादप्रत्यय उत्सर्गप्रत्ययस्य बाधको भवति वैकल्पिकेन इति सिद्धान्तो जार्गात। तद्यथा 'ण्वुल्तृचौ'[५] इति सामान्यशास्त्रेण करोतीति विग्रहे कर्त्ता,

१. पा० सू० ३।३।१२६
२. पा० सू० ३।३।१२८
३. पा० सू० ३।३।१२९
४. पा० सू० ३।३।१३०
५. पा० सू० ३।१।१३३

कारकः, पचतीति विग्रहे पक्ता, पाचकः, इति द्वे द्वे रूपे सिध्यतः। तत्र तावदेतच्छास्त्रापवादभूतं शास्त्रमस्ति 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'[१] इति। अनेन शास्त्रेण नन्द्यादिभ्योल्युर्ग्रह्यादिभ्यो णिनिः पचादिभ्योऽच्चेति यथासंख्यं ल्युणिन्यचः प्रत्यया जायन्ते। ततश्च नन्द्यादिगणपठितधातुभ्यो ल्युप्रत्यये सति नन्दनः, दूषणः, साधनप्रभृतिपदानि सिध्यन्ति। एष च ल्यु-प्रत्ययो ण्वुल्तृच्प्रत्यययोरसरूपभूतः। अतो नन्दकः, नन्दिता, साधकः साधिता, प्रभृतिषु पदेषु सामान्यशास्त्रविहितौ ण्वुल्तृच्प्रत्ययावपि भवत एव। एवं ग्रह्यादिभ्यो णिनिर्ग्राही, ण्वुलि तृचि च ग्राहकः, ग्रहीता। तथा पचादि-भ्योऽचि पचः, पाचकः, पक्ता इति रूपत्रयं दृश्यते।

पचादेराकृतिगणत्वात् पचादिभ्यो धातुभ्यो विहितस्याच् प्रत्ययस्यापि 'ज्वलतिकसन्तेभ्यो णः'[२] इति विशेषशास्त्रेणापवादो भवति। ततश्च ण-प्रत्यये सति ज्वालः पक्षे ज्वलः, एवं चालः चलः इति पदद्वयं व्यवह्रियते। अत्र 'ज्वलतिकसन्तेभ्यो णः' इति शास्त्रे 'अनुपसर्गाल्लिम्पविन्दधारिपारि-वेद्युदेजिचेतिसातिसाहिभ्यश्च'[३] 'ददातिदधात्योविभाषा'[४] इति पूर्वसूत्रद्वया-दुपसर्गादितिपदं विभाषेतिपदञ्चानुवर्त्तेते। तेन प्रज्वलः इत्यत्राजेव भवति न तु णप्रत्ययः। विभाषया णप्रत्ययविधानेनैव च ज्वालः ज्वलश्चेत्युभयं सिध्यति, यतोहि 'नानुबन्धकृतमसारूप्यमिति परिभाषया णाचोः सरूपत्व-मेवातो वैकल्पिकापवादस्य नास्त्यत्रावसरः। एवं 'विभाषाग्रहः'[५] इति शास्त्रेण पचाद्यच् प्रत्ययमपवाद्य ग्रहधातोर्णप्रत्ययो विधीयते। तेन ग्राहः, ग्रहः, इत्युभयं सिध्यति। अत्रापि णप्रत्ययस्य विकल्पविधानं णाचोः प्रत्यययोः सरूपत्वादेव स्वीकृतम्। असरूपत्वे तु 'वाऽसरूपोऽस्त्रियाम् इत्यनेनैव सिध्येत। तेन ग्राहः, इति पदं जलचरे प्रयुज्यते। ग्रहपदन्तु ज्योतिषि प्रसिद्धमतो विभाषापदमत्र व्यवस्थामपि ग्राहयति। तेन जलचरे ग्राहः, ज्योतिषि ग्रहः इति पदमेव प्रयोज्यम्।

तदेवं 'ण्वुल्तृचौ' इत्युत्सर्गापवादभूतस्य 'नन्दिग्रहिपचादिभ्यो ल्यु-णिन्यचः' इत्यपवादशास्त्रस्यापि 'ज्वलतिकसन्तेभ्यो णः' विभाषाग्रहः' इति शास्त्रद्वयमपवादत्वेन व्याख्यातम्। एवमग्रे 'इगुपधज्ञाप्रीकिरः कः'[६] इति शास्त्रमपि 'ण्वुल्तृचौ' इति शात्रापेक्षया विशेषभूतं विद्यते। तेन कप्रत्यये सति विलिख-बुध-कृशप्रभृतिपदानि सिध्यन्ति। कप्रत्ययस्य च ण्वुल्तृचोर-

१. पा० सू० ३।१।१३४
२. पा० सू० ३।१।१४०
३. पा० सू० ३।१।१३८
४. पा० सू० ३।१।१३९
५. पा० सू० ३।१।१४३
६. पा० सू० ३।१।१३५

सरूपापवादत्वेन विलेखकः, विलेखिता, बोधकः,बोद्धा, इत्यादिषु ण्वुल्तृचावपि भवतः । एवं पूर्वोक्तभावकर्मवाचि प्रत्ययवत् कर्तृवाचि प्रत्ययेऽप्यसरूपप्रत्ययविधायकविशेषशास्त्रद्वारा सामान्यशास्त्रस्य वैकल्पिकापवादो दृश्यते । तत्र तावद् यान्यपवादस्याप्यपवादभूतानि विशेषशास्त्राणि सन्ति, तानीह विविच्यन्ते । तद्यथा प्रस्थः, सुग्लः इत्यत्र 'आतश्चोपसर्गे'[१] इति शास्त्रेण कप्रत्ययो जातः । स च कप्रत्ययो वक्ष्यमाणस्य 'श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्चेति'[२] शास्त्रघटकाकारान्तधातुभ्यो विहितणप्रत्ययस्यापवादभूतः । यतोहि 'आतश्चोपसर्गे' इति शास्त्रमुपसर्गविशिष्टमाकारान्तधातुमभिवाञ्छति । श्याद्व्यधेति सूत्रघटकाऽऽत्पदन्तु सामान्यतः आकारान्तधातुमेवापेक्षते, न तु सोपसर्गाकारान्तधातुमतोहेतोः 'आतश्चोपसर्गे' इति शास्त्रं तदपेक्षया व्याप्यं वर्त्तत एव । ततश्च व्याप्यशास्त्रेण व्यापकशास्त्रस्य बाधः सिद्धः । आवश्यायः, अवसायः इत्यत्र तु अवपूर्वात् इति श्यैङ् गतौ, षोऽन्तकर्मणि इत्यस्माच्च धातोः सोपसर्गत्वेऽपि 'श्याद्व्यधेति सूत्रेण कप्रत्ययमपवाद्य णप्रत्यय एव विधीयते, यतोहि अवश्यायः, अवसायः इत्यत्राप्युपसर्गत्वाद् "आतश्चोपसर्गे" इति विशेषशास्त्रस्यैव प्राप्तिरस्ति, किन्तु 'श्याद्व्यधेत्यत्रात् पदेन सर्वविधाऽऽकारान्तधातूनां ग्रहणे तत्तत्पदसिद्धौ पुनरूपसर्गविशिष्टस्य श्यैङ्षो धातोश्च ग्रहणमिहेदमेव बोधयति, यदत्र 'आतश्चोपसर्गे' इति विशेषशास्त्रविहितकप्रत्यस्यानेन 'श्याद्व्यधेति सामान्यशास्त्रेण बाधो भवति । तथा चोक्तं काशिकावृत्तौ—'आकारान्तादेव श्यायतेः प्रत्ययेसिद्धे पुनर्वचनं बाधकबाधनार्थम्, उपसर्गे कं बाधित्वाऽयमेव भवतीति ।[३] अस्तु !

ददः, दायः, दधः, धायः इतिरूपद्वयसिद्ध्यर्थं तु 'दधातिदधात्योर्विभाषा' इति शास्त्रेण 'श्याद्व्यधेति सूत्रविहितणप्रत्ययमपवाद्य वैकल्पिकः शप्रत्ययो विधीयते । वैकल्पिकशप्रत्ययविधानेन यत्र शप्रत्ययो भवति, तत्र दद इति प्रयोगः सिध्यति, यतोहि शप्रत्ययकृते 'सार्वधातुकत्वाच्छपि तस्य च 'जुहोत्यादिभ्यः श्लुः'[४] इति श्लु कृते 'श्लौ'[५] इति शास्त्रेण द्वित्वे 'श्नाभ्यस्तयोरातः'[६] इति सूत्रेणाकारलोपे च सति दद इति पदं भवति । पक्षे श्याद्व्यधेति शास्त्रेण णप्रत्ययेसति 'आतोयुक्'[७] इति सूत्रेण युकि च

१. पा० सू० ३।१।१३६
२. पा० सू० ३।१।१४१
३. पा० सू० ३।१।१४१
४. पा० सू० २।४।७५
५. पा० सू० ६।१।१०
६. पा० सू० ६।४।११२
७. पा० सू० ७।३।३३

कृते दायः इति पदमपि जायते। अत्र च प्रत्यययोर्नानुबन्धकृतमसारूप्यमिति वचनात् सारूप्यमेवातोऽसरूपापवादत्वं नात्र संघटते। तस्मादेवात्र शप्रत्ययस्य वैकल्पिकविधानं सफलमिति ज्ञेयम्। अत्राप्यौत्सर्गिकत्वाद् ण्वुल्तृचौ प्रत्ययौ भवत एव।

एवं दुनोतीति दावः, नयतीति नायः, इत्यत्र दुन्योरनुपसर्गे[1] इति विशेषशास्त्रेण णप्रत्ययो भवति। तथा नर्तकः, खनकः, रजकः, गाथकः, गायनः प्रभृति पदानां संसिद्धौ च 'शिल्पिनि ष्वुन्'[2] 'गस्थकन्'[3] 'ण्युट्च'[4] इति शास्त्रैः ष्वुन्, थकन्, ण्युट् प्रत्यया यथाक्रमं विधीयन्ते। एते च प्रत्ययाः प्रायः ण्वुल् तृच्प्रत्यययोरसरूपभूताः सन्ति। तस्माद् वैकल्पिकापवादत्वमत्रापि सुतरां सिद्धम्। 'शिल्पिनिष्वुन्' 'गस्थकन्' इत्यनयोरुपसर्गापवादत्वं तु न शङ्कयम्, शिल्पिनि कर्तरि गाथकस्य ग्रहणेऽपि ष्वुन् प्रत्ययस्य परिगणितशिल्पिकर्तृणामभिधाने प्रवृत्तिदर्शनात्। तथाचोक्तं महाभाष्ये 'नृतिखनिरञ्जिभ्य इति वक्तव्यम्, इह मा भूत् वायक"[5] इति। अर्थादनेन परिगणनेन तन्तुसन्तानार्थकवेञ् धातोः वयति, वयते, वेति विग्रहे शिल्पिनि कर्तरि वायक इत्यत्र ण्वुलेव भवति न तु ष्वुन् प्रत्ययः।

एतेन गाथक इत्यत्रापि ष्वुन् प्रत्ययस्य प्रसङ्गो नास्तीति स्पष्टं प्रतीयते। ण्वुल्तृच् प्रत्ययौ तु सामान्यतोऽत्र थकन् ण्युट् प्रत्ययविषयेऽपि पाक्षिकरूपेण प्रवर्तेते एव। ततश्च गाथकः, गातेति रूपद्वयमपि तस्मिन्नर्थेऽसरूपापवादप्रत्ययसम्बन्धात् प्रयुज्यत एव। एवमसति विशेषनियमे कर्तृवाच्यसरूपप्रत्ययप्रवृत्तौ सत्यां, ण्वुल्तृच्प्रत्यययोरपि पक्षे प्रवृत्ति र्भवत्येवेति भाति निष्कर्षः।

कर्मकारकोपपदकर्तृवाचिकृत्प्रत्ययानामुत्सर्गापवादत्वम्

कर्तृवाचिकृत्प्रत्ययविधायकशास्त्राणामुत्सर्गापवादनिरूपणानन्तरं कर्मकारकोपपदकर्तृवाचिकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि विविच्यन्ते। तत्र तावत् 'कर्मण्यण्'[6] इत्युत्सर्गशास्त्रेण सामान्यतः सर्वत्र कर्मण्युपपदे धातोरण् प्रत्ययो विधीयते। तेन 'कुम्भं करोति, काण्डं लुनाति, वेदमधीते इत्यादि विग्रहेषु अणि सति कुम्भकारः, काण्डलावः, वेदाध्यायः इत्यादीनि पदानि सिध्यन्ति।

---

१. पा० सू० ३।१।१४२
२. पा० सू० ३।१।१४५
३. पा० सू० ३।१।१४६
४. पा० सू० ३।१।१४७
५. म० भा० ३।२।१
६. पा० सू० ३।२।१

कुम्भादिपदानामुपपदत्वन्तु 'तत्रोपपदं सप्तमीस्थम्'[1] इति शास्त्रेण सम्पाद्यते। यतोहि धातोरिति अधिकारसूत्रादनन्तरमेव 'तत्रोपपदं सप्तमीस्थम्' इति सूत्रं वर्त्तते। अतः सूत्रस्थतत्रपदेन धात्वधिकार एव गृह्यते। ततश्चास्मिन् धात्वधिकारे सूत्रेषु सप्तम्यन्तपदेन यत्प्रतिपादितं तदुपपदसंज्ञकं भवति। तद्यथा–'कर्मण्यण्' इत्यत्र कर्मणीति सप्तम्यन्तपदप्रतिपाद्यस्य कुम्भं करोतीत्यत्र कुम्भपदस्योपपदसंज्ञा भवति।

तस्मात् कुम्भकार इत्यत्राण् प्रत्ययः 'कर्मण्यण्' इत्युत्सर्गशास्त्रेण जात इति भावः। क्वचिच्च ग्रामं गच्छति, आदित्यं पश्यति, हिमवन्तं शृणोतीत्यत्राण् प्रत्ययस्य प्रवृत्तिस्त्वनभिधानान्न भवति। तथा चोक्तं महाभाष्ये 'कस्मान्न भवति, आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामंगच्छतीति' अनभिधानादेव न भविष्यति'[2] इति। अनभिधानादिति प्रतीकमादाय प्रदीपकारः कैयटः स्पष्टं प्रतिपादयति यत् 'नित्यानां शब्दानामिदमन्वाख्यानमात्रम्। नचादित्यं पश्यतीत्याद्यर्थप्रतिपादनाय आदित्यदर्शादयः शब्दा लोके प्रयुज्यन्त इति शात्रेणापि साधुत्वेन नानुमास्यन्त इत्यर्थः'। एतावता शिष्टप्रयुक्तपदानामन्वाख्यानार्थं शब्दानुशासनमिति सिद्धान्तः सर्वत्रोत्सर्गापवादशास्त्रप्रवृत्तौ जागरूक इत्यवगन्तव्यम्।

अस्य 'कर्मण्यण्' इत्युत्सर्गशास्त्रस्यापवादभूतं शास्त्रं वर्त्तते 'आतोऽनुपसर्गे कः'[3] इति। तेन गां ददाति इति विग्रहे 'गोद इत्यत्राण् प्रत्ययं प्रबाध्य कप्रत्यय एव भवति। अत्राण्विधायकशास्त्रस्य अवश्यप्राप्तौ कप्रत्ययविधायकशास्त्रस्यारम्भापवादत्वं स्पष्टमेव। महाभाष्यकारः पतञ्जलिश्च शब्दानां प्रतिपत्तौ प्रतिपदपाठस्यानभ्युपायं प्रतिपाद्योत्सर्गापवादरूपसामान्यविशेषलक्षणोदाहरणे एतत्सूत्रद्वयं व्याजहार। तच्चेह पूर्वमपवादस्वरूपनिर्धारणेऽस्माभिरूदाहृत्योपपादितम्।

अथ 'आतोऽनुपसर्गे कः' विशेषशास्त्रस्याप्यपवादभूतं विशेषशास्त्रं प्रवर्त्तते 'ह्वावामाश्च'[4] इति। अनेन हि शास्त्रेण स्वर्गं ह्वयति, तन्तून् वयति, धान्यंमायते इत्येतेषु विग्रहेषु कप्रत्ययं प्रबाध्याण्प्रत्यय एव विधीयते। ततश्च स्वर्गह्वायः, तन्तुवायः, धान्यमायः इति पदानि निष्पद्यन्ते। अत्र पूर्वं 'कर्मण्यण्' इति सामान्यशास्त्रेण प्राप्तमण् प्रत्ययमपवाद्य तद्विशेषेण 'आतोऽनुपसर्गे कः' इति शात्रेण कप्रत्ययः प्रस्तूयते, किन्तु अस्य कप्रत्ययविधायकविशेषशास्त्रस्यापि 'ह्वावामश्च' इति विशेषशास्त्रेणापवादो भवति।

---

१. पा० सू० ३।१।९२
२. पा० सू० ३।२।१
३. पा० सू० ३।२।१
४. पा० सू० ३।२।२

यतोहि पूर्वसूत्रेण सामान्यतः सर्वेभ्यो धातुभ्यः कर्मण्युपपदेऽण् प्रत्ययस्य विधानं प्राप्तम्, तत्र कप्रत्ययस्तु आकारान्तधातुभ्योऽनुपसर्गेभ्य एव जायते अतस्ततोव्याप्यः। 'ह्वावामश्च' इत्यत्र तु आकारान्तधातुष्वपि त्रयाणामेव ग्रहणमस्ति, अतो विशेषस्यापि विशेषभूतमिदं शास्त्रमितिरीत्या प्रतिप्रसवरूपेण पुनरण् प्रत्यय एवानेन विशेषशास्त्रेण विहितः।

एवं 'गोपाष्टक्'[१] इति शास्त्रमपि 'आतोऽनुपसर्गे कः' इति शास्त्रस्यापवादकमस्ति। तेन साम गायति, सुरां पिबतीत्यत्र क प्रत्ययं प्रबाध्य टक् प्रत्ययो जायते। ततश्च सामगः सामगी, सुरापः, सुरापी, प्रभृतिपदानामन्वाख्यानं भवति। अत्रापि शिष्टप्रयुक्तानां पदानामन्वाख्यानमिति सिद्धान्तं पुरस्कृत्य आचार्यकात्यायनः प्राह—'सुराशीध्वोः पिबतेरितिवाच्यम्' अर्थात् सुराशीध्वोःकर्मोपपदयोरेव पिबतेष्टक्प्रत्ययो भवति नान्यत्र। तेन क्षीरं पिबति सुरां पातीतिविग्रहे 'आतोऽनुपसर्गे कः' इत्युत्सर्गशास्त्रेण कप्रत्ययो भवति, ततश्च क्षीरपा, सुरपेत्यत्र टाबेव श्रूयते, टकि प्रत्यये तु टित्वाद् ङीब् भवतीति विशेषोऽप्यत्र स्पष्टं प्रतिभाति।

तदेवं "कर्मण्यण्" इत्युत्सर्गशास्त्रस्य यानि किलापराणि-अपवादशास्त्राणि मिलन्ति तानि सर्वाणि सोदाहरणानीह प्रस्तूयन्ते—

उत्सर्गशास्त्रम्	प्रत्ययाः	उदाहरणानि
'कर्मण्यण्'[२]	अण्	कुम्भकारः
एतदपवादशास्त्राणि	प्रत्ययाः	उदाहरणानि
तुन्दशोकयोः परिमृजापनुदोः[३]	क	तुन्दपरिमृजः
		शोकापनुदः
'प्रे दाज्ञः'[४]	,,	सर्वप्रदः
'समिख्यः'[५]	,,	गोसंख्य
हरतेरनुद्यमनेऽच्'[६]	अच्	अंशहरः
'वयसि च'[७]	अच्	अस्थिहरःश्वा
'आङि ताच्छील्ये'[८]	,,	पुष्पाहरः
'अर्हः'[९]	,,	पूजार्हा

१. पा० सू० ३।२।८
२. पा० सू० ३।२।१
३. पा० सू० ३।२।५
४. पा० सू० ३।२।६
५. पा० सू० ३।२।७
६. पा० सू० ३।२।९
७. पा० सू० ३।२।१०
८. पा० सू० ३।२।११
९. पा० स० ३ २।१२

भिक्षासेनादायेषु च'[1]	ट	भिक्षाचरः, सेनाचरः
पुरोऽग्रतोऽग्रेषु सर्तेः'[2]	,,	आदायचरः,
*कृञो हेतुताच्छील्यानुलोम्येषु[3]	,,	शोककरी कन्या यशस्करो विद्या कूलकरं धनम्
दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दी किंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु'[4]	,,	दिवाकरः विभाकरः
'कर्मणि भृतौ'[5]	,,	कर्मकरः
स्तम्बशकृतोरिन्'[6]	रिन्	स्तम्बकरिर्व्रीहिः शकृत्करिर्वत्सः
हरतेर्दृतिनाथयोः पशौ'[7]	,,	दृतिहरिः पशुः नाथहरिः
छन्दसि वनसनरक्षिमथाम्'[8]	,,	ब्रह्मवनिं त्वा क्षत्रवनिम्
एजेःखश्'[9]	खश्	अङ्गमेजयः
नासिकास्तनयोर्ध्माधेटोः'[10]	,,	नासिकन्धमः नासिकन्धयः स्तनन्धयः
नाडीमुष्ट्योश्च'[11]	,,	नाडिन्धमः मुष्टिन्धयः
उदिकूलेरुजिवहोः'[12]	,,	कूलमुद्रुजः रथः
वहाभ्रे लिहः'[13]	,,	वहंलिहो गौः, अभ्रंलिहोवायुः
परिमाणे पचः'[14]	खश्	प्रस्थंपचः
मितनखे च'[15]	,,	मितंपचा ब्राह्मणी

* अस्यापवादशास्त्रस्य निषेधरूपापवादशास्त्रमस्ति 'नशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु' इति । तेन शब्दकारः, श्लोककारः, इत्यादिपदेषु 'कर्मण्यण्' इत्युत्सर्गशास्त्रेण अण्प्रत्यय एव प्रतिप्रसवरूपेण दृश्यते ।

१. पा० सू० ३।२।१७
२. पा० सू० ३।२।१८
३. पा० सू० ३।२।२०
४. पा० सू० ३।२।२१
५. पा० सू० ३।२।२२
६. पा० सू० ३।२।२४
७. पा० सू० ३।२।२५
८. पा० सू० ३।२।२७
९. पा० सू० ३।२।२८
१०. पा० सू० ३।२।२९
११. पा० सू० ३।२।३०
१२. पा० सू० ३।२।३१
१३. पा० सू० ३।२।३२
१४. पा० सू० ३।२।३३
१५. पा० सू० ३।२।३४

विध्वरुषोस्तुदः'[१]	,,	विधुन्तुदः, अरुन्तुदः
असूर्यललाटयोर्दृशितपोः'[२]	,,	असूर्यम्पश्या राजदाराः
	,,	ललाटन्तप आदित्यः
प्रियवशे वदः खच्[३]	खच्	प्रियंवदः
द्विषत्परयोस्तापे'[४]	,,	द्विषन्तपः, परन्तपः
वाचियमोव्रते'[५]	,,	वाचंयम आस्ते
पूः सर्वयोर्दारिसहोः'[६]	,,	पुरन्दरः (सर्वंसहो राजा)
सर्वकूलाभ्रकरीषेषु कषः'[७]	,,	सर्वंकषः खलः
मेघर्तिभयेषु कृञः'[८]	,,	मेघंकरः, ऋतिंकर भयंकरः
क्षेमप्रियमद्रेऽण्च'[९]	अण्,खच्	क्षेमकारः, क्षेमंकरः, प्रियकारः प्रियंकरः मद्रकारः, मद्रंकरः
संज्ञायां भृतृवृजिधारिसहितपिदमः'[१०]	खच्	विश्वंभरा, वसुन्धरा
गमश्च'[११]	,,	सुतंगमः
अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः'[१२]	ड	अन्तगः, अत्यन्तगः
आशिषि हनः'[१३]	,,	शत्रुहः
अपे क्लेशतमसोः'[१४]	,,	क्लेशापहः पुत्रः तमोपहः सूर्यः
कुमारशीर्षयोर्णिनिः'[१५]	णिनिः	कुमारघाती, शीर्ष-

१. पा० सू० ३।२।३५
२. पा० सू० ३।२।३६
३. पा० सू० ३।२।३८
४. पा० सू० ३।२।३९
५. पा० सू० ३।२।४०
६. पा० सू० ३।२।४१
७. पा० सू० ३।२।४२
८. पा० सू० ३।२।४३
९. पा० सू० ३।२।४४ अनेन शास्त्रेणाण् प्रत्ययो विधीयते । चकारात्पूर्वानुवृत्तः खच् प्रत्ययोऽपि संगृह्यते । अत्र सूत्रे चकारपदोपादानेन खच् प्रत्ययस्य संग्रहे तु खचण् प्रत्यययोर्नानुबन्धकृतमसारूप्यमेव कारणं बोध्यम् । अन्यथा वाऽसरूपोऽस्त्रियामित्यनेनैव रूपद्वयं सिद्धं स्यात् ।
१०. पा० सू० ३।२।४६
११. पा० सू० ३।१।४७
१२. पा० सू० ३।२।४८
१३. पा० सू० ३।२।४९
१४. पा० सू० ३।२।५०
१५. पा० सू० ३।२।५१

		घाती
लक्षणे जायापत्योष्टक्[1]	टक्	जायाघ्नो ब्राह्मणः पतिघ्नी वृषली
अमनुष्यकर्तृके च[2]	,,	जायाघ्नः तिलकालकः पतिघ्नी पाणिरेखा
शक्तौ हस्तिकपाटयोः[3]	,,	हस्तिघ्नो मनुष्यः, कपाटघ्नश्चौरः
स्पृशोऽनुदके क्विन्[4]	क्विन्	घृतस्पृक्
भजोण्वि[5]	ण्वि:	अर्द्धभाक्
छन्दसि सहः[6]	,,	तुराषाट्
वहश्च[7]	,,	प्रष्ठवाट्
कव्यपुरीषपुरीष्येषु ञ्युट्[8]	ञ्युट्	कव्यवाहनपितृणाम्
हव्येऽनन्तः पादम्[9]	विट्	पुरीषवाहनः पुरीष्यवाहनः
अपवादशास्त्राणि	**प्रत्ययाः**	**उदाहरणानि**
अदोऽनन्ने[10]	विट्	आमात्, सस्यात्
क्रव्ये च[11]	,,	क्रव्यात्
दुहकब्घश्च[12]	कप्	कामदुघाधेनुः
बहुलमाभीक्ष्ण्ये[13]	णिनि;	कषायपायिणो गान्धाराः
कर्मणि हनः[14]	,,	पितृव्यघाती
ब्रह्मभ्रूणवृत्रेषु क्विप्[15]	क्विप्	ब्रह्महा
सुकर्मपापमन्त्रपुण्येषु कृञः[16]	,,	सुकृत् कर्मकृत्
सोमे सुञः[17]	,,	सोमसुत्
अग्नौ चः[18]	,,	अग्निचित्
कर्मणीनि विक्रियः[19]	इनि	सोमविक्रयी

१. पा० सू० ३।२।५२
२. पा० सू० ३।२।५३
३. पा० सू० ३।२।५४
४. पा० सू० ३।२।५८
५. पा० सू० ३।२।६२
६. पा० सू० ३।२।६३
७. पा० सू० ३।२।६४
८. पा० सू० ३।२।६५
९. पा० सू० ३।२।६६
१०. पा० सू० ३।२।६८
११. पा० सू० ३।२।६९
१२. पा० सू० ३।२।७०
१३. पा० सू० ३।२।८१
१४. पा० सू० ३।२।८६
१५. पा० सू० ३।२।८७
१६. पा० सू० ३।२।८९
१७. पा० सू० ३।२।९०
१८. पा० सू० ३।२।९१
१९. पा० सू० ३।२।९३

आतोऽनुपसर्गे कः इत्येतद्व्यतिरिक्तान्यप्येतानि षट्पञ्चाशत सूत्राणि 'कर्मण्यण्' इति सामान्यशास्त्रस्यापवादभूतानि सन्ति। एतल्लक्ष्येषु सर्वत्र 'कर्मण्यण्' इति सामान्यशास्त्रावश्यप्राप्तौ क, अच्, ट, इन् प्रभृति प्रत्यया विशेषशास्त्रेण विधीयन्ते। ते चाण् प्रत्यये जाते सत्यनवकाशाः स्युरिति निरवकाशत्वादण् प्रत्ययं प्रबाधन्ते। तेषु ये वै क, ट, खश्, खच्, ड टक, कबादि प्रत्यया विशेषशास्त्रविहिता दृश्यन्ते, ते चानुबन्धविनिर्मुक्तावस्थायामण् प्रत्ययस्य सारूप्यमेव भजन्ते। अतो 'वाऽसरूपोऽस्त्रियाम्' इति विकल्पापवादकोटौ नान्तर्भवति। ये तु इन्, णिनि, ल्युट इनिरित्येते प्रत्यया अण् प्रत्ययस्यासरूपत्वेनोपात्ताः, तत्रासति विशेषप्रतिबन्धे 'कर्मण्यण्' इत्युत्सर्गशास्त्रस्य पाक्षिकप्रवृत्तावरोधका न भवन्ति।

तद्यथा 'स्तम्बशकृतोरिन्' इत्यपवादशास्त्रेण व्रीहिवत्सयोः कर्त्रोर्विवक्षितयोः इन प्रत्ययो विधीयते न सर्वत्र।

तेन स्तम्बकरि व्रीहिः, शकृत्करिर्वत्स, इति व्यवह्रियते। इतोऽन्यत्र तु 'कर्मण्यण्' इत्युत्सर्गशास्त्रेणाण् प्रत्यये सति स्तम्बकारः, शकृत्कारः, इति प्रयुज्यते। तथाचोक्तं सूत्रेऽस्मिन् वार्त्तिककारेण 'व्रीहिवत्सयोरितिवक्तव्यम्' इति।

एवं 'हरतेर्दृतिनाथयोः पशौ' इति विशेषशास्त्रेण पशौ कर्तरि इन् प्रत्ययो विधीयते, तेन "दृतिहरिः पशुः" नाथहरिपशुरित्यत्रैवेन भवति। अन्यस्मिन् कर्तरि तु सामान्यशास्त्रेणाण्प्रत्यये सति दृतिहारः, नाथहारो मनुष्य इति व्यवह्रियते।

'कुमारशीर्षयोर्णिनिः' इति विशेषशास्त्रेण कुमारघाती, शीर्षघाती इत्यत्र णिनि प्रत्ययो विधीयते। अस्य णिनेः सामान्यशास्त्रविहिताण्प्रत्ययेन सह सारूप्यं नास्ति। अतो वैकल्पिकापवादत्वेनाणिसति कुमारघातः इत्यपि भवितुमर्हति।

ल्युट् प्रत्ययश्च साक्षाद्ण्विप्रत्ययस्यापवादभूतो वर्त्तते। यतोहि छन्दसि विषयेऽपि सर्वत्र 'कर्मण्यण्' इति सामान्य सूत्रेणाण्प्रत्ययः सम्भाव्यते। तत्र 'वहश्च' इति विशेषशास्त्रेण तं प्रबाध्य ण्विप्रत्ययो विधीयते। तेन दिव्यं वहतीति विग्रहे दिव्यवाट् इति पदं सिध्यति। किन्तु कव्यं वहति, पुरीषं वहति, पुरीष्यं वहतीति विग्रहेषु ण्विप्रत्ययमपवाद्य 'कव्यपुरीषपुरीष्येषुञ्युट्' इति विशेषशास्त्रेण ञ्युट् प्रत्ययो जातः।

तस्मात् कव्यवाहनः, पुरीषवाहनः, पुरीष्यवाहनः इति पदानि सिध्यन्ति। भाषायां तु दिव्यवाहः, इत्यादावणेव सम्भवति।

एवमिनिप्रत्ययविषयेऽपि व्यवस्था विद्यते। तत्र तावदेष प्रश्नो भवति यत् 'कर्मणीनिर्विक्रियः' इति सूत्रे 'कर्मणिहनः' इति सूत्रात् कर्मणीति पदमनुवर्त्तत एव, ततश्च कर्मण्युपपदे विपूर्वात्क्रीणातेर्धातोरिनि प्रत्ययो भविष्यति, पुनः सूत्रेस्मिन् कर्मणीति पदोपादानं किमर्थम्? समाधाने च कुत्सानिमित्तं पुनः कर्मग्रहणमिहेत्युच्यते। अतो यत्र कर्तुः कुत्सा प्रतीयेत, तत्रैवेनिर्भवेदिति। यथा सोमं विक्रीतवान्, रसं विक्रीतवानिति विग्रहे सोमविक्रयी रसविक्रयी इति सिद्धेन पदद्वयेन सोमरसविक्रेतु ब्राह्मणस्य निन्दा गम्यते। धर्मशास्त्रे हि तद् विक्रयणं निषिद्धम्[1]।

यत्र तु निन्दानावगम्यते तत्र सामान्यसूत्रेणाणेव भवति। यथा धान्यविक्राय इत्यत्र, तथाचोक्तं काशिकावृत्तौ "कर्मणीति वर्त्तमाने पुनः कर्मग्रहणं कतुः कुत्सा निमित्ते कर्मणि यथा स्यात्। कर्ममात्रे मा भूत् 'सोमविक्रयी, रसविक्रयी। इह न भवति धान्यविक्रायः'

महाभाष्ये तु सूत्रेऽस्मिन् 'कर्मणि कुत्सिते' इति वार्त्तिकव्याख्याने कर्मणि कुत्सिते इतिवक्तव्यम्। इह मा भूत् 'धान्यविक्रायः'[2] इत्येवोक्तम्,

किन्तु काशिकावृत्तावेव तथा व्याख्यातं येन 'कर्मणि कुत्सिते' इति वार्त्तिकं प्रत्याख्यानं भवति। तदेवं 'कर्मण्यण्' इत्युत्सर्गशास्त्रविहिताण् प्रत्ययस्य इन णिनि, ल्युट्, इनिप्रत्यया असरूपापवादत्वेन व्याख्याताः।

अत्र कर्मण्युपपदे धातोरण्प्रत्ययविधायकमपरमपि शास्त्रमस्ति 'अण्कर्मणि चेति।[3] एतच्च शास्त्रं 'तुमुन्ण्वलौ क्रियायां क्रियार्थायाम्'[4] इति सामान्यशास्त्रेण क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यतिकाले विहितण्वुल् प्रत्ययमपवाद्य प्रवर्त्तते। यतोहि 'अण्कर्मणि चेति चकारेण पूर्वसूत्रतः क्रियार्थायां क्रियायामिति समुच्चीयते, अत क्रियार्थायां क्रियायां कर्मणि चेत्यपपदद्वये सत्येव सूत्रास्य प्रवृतिर्भवति। ततश्च विशेषविहितत्वात् काण्डलावोव्रजतीत्यत्राणत्र भवति न तु ण्वुल् प्रत्ययः। एतावता यत्र क्रियार्थो क्रियामात्रमुपपदत्वेन गृह्यते, तदेव लक्ष्यमस्य ण्वुल् प्रत्ययस्येति निश्चीयते। यथा कृष्णं द्रक्ष्यन तदर्थं यातीत्यर्थे कृष्णं दर्शको यातीत्यत्र केवले यातीति क्रियोपपदे ण्वुल प्रत्ययः सिद्धः।

---

१. सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शुद्रो भवति ब्राह्मणः क्षीरविक्रियात्॥ मनुस्मृतिः अ. १० श्लो. ९२

२. म० भा० ३।२।९३

३. पा० सू० ३।३।१२

४. पा० सू० ३।३।१०

अत्रेदमपि ज्ञेयं यदेष अण् प्रत्ययोऽपि 'कर्तरि कृत्'[1] इत्यत्राधिकारान्तर्गतत्वेन 'कर्मण्यण्' इति शास्त्रविहिताण्प्रत्ययवत् कर्त्रर्थकः। तस्मादत्रापि पूर्वं 'ण्वुल्तृचौ' इति सूत्रमपवाद्य 'कर्मण्यण्' इति सूत्रेण सामान्यतोऽण् प्राप्त तञ्चाण् प्रत्ययं क्रियार्थायां क्रियायामुपपदे विशेषविहितोण्वुल् प्रत्ययः बाधितुं प्रवृत्तः, किन्तु 'अण्कर्मणि च' इति शास्त्रविहिताण् प्रत्ययस्तु तस्माद्ण्वुल् विधेरपि विशेषनिमित्तक इति हेतोः पुनः प्रतिप्रसवरूपेणाण् प्रत्ययोऽत्र विहित इति भावः।

इत्थञ्चेह कर्मकारकोपपदकर्तृवाचिकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राण्यपि विवेचितानि।

भाववाचिकृत्प्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम्

तत्रतावत् भाववाचिप्रत्ययसम्बन्धिशास्त्रेषूत्सर्गशास्त्रं प्रवर्तते 'भावे'[2] इति। अनेन हि शास्त्रेण सिद्धावस्थापन्ने धात्वर्थेवाच्ये धातोर्घञ् प्रत्ययो विधीयते। यतोहि भावो व्यापारो वा सामान्यतः सकलधातुवाच्यः। भावश्च भावनोत्पादना क्रियेति पर्यायत्वेन गृहीतः। तथाचोक्तं भट्टोजिदीक्षितेनापि 'व्यापारो भावना सैवोत्पादना सैव च क्रियेति।[3] स च भावो द्विविधः साध्यावस्थापन्नः सिद्धावस्थापन्नश्चेति। तत्र तिङ्वाच्यो भावः खलु लिङ्गसंख्यान्वितः साध्यावस्थापन्नः। तद्यथा 'त्वया मया अन्यैश्च भूयते' इत्यत्र भावे प्रत्यये न कापि संख्या विवक्षिता। भूयते इत्यत्रैकत्वन्तु एकवचनमुत्सर्गतः करिष्यते'[4] इति भाष्यवचनात् स्वाभाविकं बोध्यम्। पाकः पाकौ, पाकाः इत्यादि व्यवहाराच्च कृदभिहितोभावो लिङ्गसंख्यान्वययोग्यः सिद्धावस्थापन्नः प्रसिद्धः। अत एव 'कृदभिहितो भावो द्रव्यवद्भवतीति'[5] नियमो जातः। तथाचोक्तं भर्तृहरिणापि—

'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥ इति'[6]

तदेवं सिद्धावस्थापन्ने भावे सामान्यतो धातोर्घञ्प्रत्ययस्य विधानं भवति। एतदुदाहरणे च पाकः, त्यागः, रागः, इत्यादि पदानि प्रस्तूयन्ते। यद्यप्येष घञ्प्रत्यय उत्सर्गतः सर्वधातुविषयः, तथापि तत्तद्विशेषरूपापवादशास्त्रैर्बाध्यते तद्यथा पक्तिरित्यत्र 'स्त्रियां क्तिन्' इत्यनेन घञ्प्रत्ययमपवाद्य क्तिन् विधीयते। स्त्रीलिङ्गे नपुंसकलिङ्गे तथा वचनान्तरेऽपि भावार्थक-

---

१. पा० सू० ३।४।६७
२. पा० सू० ३।३।१८
३. म० भा० १।१।६७
४. म० भा० ३।१।३७
५. म० भा० ३।१।६७
६. वाक्य० का० ३।१।४८

प्रत्ययानां प्रवृत्तिदर्शनात् भावार्थकप्रत्ययविधाने 'भावे' इति सामान्यशास्त्रे पुल्लिङ्गनिर्देशः, एकवचननिर्देशश्च न तन्त्रत्वेन विवक्षितः। तथाचाह 'सर्वलिङ्गनिर्देशः' 'नात्रनिर्देशस्तन्त्रम्' इति वार्तिकद्वयव्याख्याने महाभाष्यकारो यत् भावे सर्वलिङ्गनिर्देशः कर्तव्यः'। भूतौ भवने भावे इति। किं प्रयोजनम् ? सर्वलिङ्गे भावे एते प्रत्यया यथा स्युरिति। किं पुनः कारणं न सिध्यति ? पुल्लिङ्गेनायं निर्देशः क्रियते, एकवचनान्तेन च। तेन पुल्लिङ्ग एव भावे एकवचने चैते प्रत्ययाः स्युः स्त्रीनपुंसकयोर्द्विवचनबहुवचनयोश्च न स्युः। कथं पुनस्तेनैव च नाम निर्देशः क्रियते, तच्चातन्त्रं स्यात्। तत्कारी च भवांस्तद्द्वेषी च। नान्तरीयकत्वदत्र पुल्लिङ्गेन निर्देशः क्रियते एकवचनेन च। अवश्यं कयाचिद्विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः। तद्यथा कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति, नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन् मांसार्थी मत्स्यान् शकलान् सकण्टकानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति।

एवमिहापि नान्तरीयकत्वात्पुल्लिङ्गेन निर्देशः क्रियते, एकवचनान्तेन च। नह्यत्र निर्देशस्तन्त्रम् कयाचिद्विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः' इति। एतदेवाभिप्रेत्य काशिकावृत्तावपि पुल्लिङ्गैकवचनञ्चात्र न तन्त्रम्, लिङ्गान्तरे वचनान्तरेऽपि चात्र प्रत्यया भवन्त्येव, पक्तिः, पक्त्वम्, पचनम्, पाकौ पाकाः' इत्युक्तम्। तस्मात् सर्वत्र धात्वर्थे भावे घञ्, प्रत्यय प्रवर्तते एव। एतदपवादभूतं ड्वितः क्त्रिः[1] 'ट्वितोऽथुच्[2]' इति शास्त्रद्वयमुपतिष्ठते। तेन पवित्रमम, वेपथु इत्यत्र च क्रमशः क्त्रिः अथुच्प्रत्ययश्च भवति। तत्र 'ड्वितः क्त्रिः' इति सूत्रव्याख्याने दृश्यते मतभेदो यत् काशिकावृत्तौ सूत्रेऽस्मिन् 'भावे अकर्तरि च कारके' इति वर्त्तत 'इत्युक्तम्। तेन तन्मते अकर्तरि च कारके संज्ञायाम्' इति सूत्रस्यापवादकमिदं सूत्रमित्यवगम्यते, किन्तु सिद्धान्तकौमुद्यामयं भाव एव स्वभावादिति प्रोक्तम्। एतद् व्याख्याने बालमनोरमाकारः कथयति यत् अत्र भावे इत्यत्रानुवर्त्तते नत्वकर्तरि च कारके इत्यपीति भावः। अनयोः पक्षयोः कौमुदीकारमतमेव युक्तं प्रतिभाति, यतः 'ट्वितोऽथुच' इत्यत्र भाव एव प्रत्ययः काशिकावृत्तावप्युक्तः। तदनुच 'यजयाच्यतविच्छप्रच्छरक्षोनङ्' इति सूत्रेऽकर्तरि च कारके संज्ञायामित्यस्यानुवर्त्तनं सर्वसम्मतम्। तस्मात् ड्वितः क्त्रिः' इति शास्त्रमपि 'भावे' इति सूत्रस्यैवापवादभूतमस्तीति भावः।

---

१. पा० सू० ३।३।८८   २. पा० सू० ३।३।८९

'भावे' इति सूत्रादनन्तरं सूत्रमस्ति 'अकर्तरि च कारके संज्ञायाम्' इति। अनेनापि घञ्प्रत्यय एव विधीयते, किन्तु कर्तृभिन्ने कारके संज्ञायाम्। तेन रज्यतेऽनेनेति विग्रहे रागः, प्रास्यन्ते क्षिप्यन्ते शत्रवोऽनेनेति विग्रहे च प्रासः इत्यत्र घञ् प्रत्ययः सिध्यति। अत्र रागशब्देन रञ्जनद्रव्यविशेषो गृह्यते, प्रासशब्देन चायुधविशेषः। ततश्च संज्ञात्वमुभयत्र प्रसिद्धम्। एतस्य 'अकर्तरि च कारके संज्ञायाम्' इत्युत्सर्गशास्त्रस्यापवादशास्त्राणि बहूनि सन्ति। तेषां सर्वेषां परिचयः सोदाहरणमिह प्रस्तूयते।

उत्सर्गशास्त्रम्	**प्रत्ययाः**	**उदाहरणानि**
'अकर्तरि च कारके संज्ञायाम्'[१]	घञ्	रागः
एतदपवादसूत्राणि		
'एरच्'[२]	अच्	चयः
'ऋदोरप्'[३]	अप्	करः, यवः
'ग्रहवृदृनिश्चिगमश्च'[४]	अप्	ग्रहः, वरः
'उपसर्गेऽदः'[५]	अप्	प्रघसः-विघसः,
'नौ ण च'[६]	ण् अप	न्यादः निघसः
'व्यधजपोरनुपसर्गे'[७]	अप्	व्यधः, जपः
*स्वनहसोर्वा[८]	अप्	स्वनः, स्वानः
'यमः समुपनिविषु च'[९]	अप्	संयम, संयाम
'नौ गदनदपठस्वनः'[१०]	अप्	निगदः, निगादः
'क्वणो वीणायां च'[११]	अप्	निक्वणः, निक्वाणः
'नित्यं पणः परिमाणे'[१२]	अप्	मलकपणः

१. पा० सू० ३।३।१९ ५. पा० सू० ३।३।५९
२. पा० सू० ३।३।५६ ६. पा० सू० ३।३।६०
३. पा० सू० ३।३।५७ ७. पा० सू० ३।३।६१
४. पा० सू० ३।३।५८ ८. पा० सू० ३।३।६२

*. सूत्रेऽस्मिन् वेति पदं वर्त्तते, अतोऽनेन घञ् प्रत्ययस्यापवादो भविष्यति वैकल्पिकः। वेति पदञ्च 'नित्यं पणः परिमाणे' इति सूत्रात् प्राक् प्रवर्त्तते। अतः स्वोत्तरैः त्रिभिः सूत्रैरपि अप्रत्ययस्य पाक्षिकत्वं सिध्यति। अत्र वासरूपोऽस्त्रियाम् इत्यनेन वैकल्पिकापवादत्वन्तु न सम्भवति–नानुबन्धकृतसमारूप्यमिति नियमस्यात्रापि जागरूकत्वाद् अत एव सूत्रेऽस्मिन् वेतिपदं सार्थकमितिज्ञेयम्।

९. पा० सू० ३।३।६३ ११. पा० सू० ३।३।६५
१०. पा० सू० ३।३।६४ १२. पा० सू० ३।३।६६

'मदोऽनुपसर्गे'[१]	अप्	धनमद
'प्रमदसंमदौ हर्षे'[२]	अप्	प्रमदः समदः
'समुदोरजः पशुषु'[३]	अप	समजः पशूनां संघः
अपवाद शास्त्राणि	**प्रत्ययाः**	**उदाहरणानि**
'ह्वः सम्प्रसारणं चान्यभ्युपरिषु'[४]	अप्	निहवः, अभिहवः
'आङि युद्धे'[५]	अप्	आहवः
'भावोऽनुपसर्गस्य'[६]	अप्	हवः
'हनश्च वधः'[७]	अप्	वधेन दस्युम्
'मूर्तौ घनः'[८]	अप्	अभ्रघनः
'अन्तर्घनोदेशे'[९]	अप्	अन्तर्घनः
'यजयाचयतविच्छप्रच्छरक्षोनङ्'[१०]	नङ्	यज्ञः याच्ञा
स्वपोनन्'[११]	नन्	स्वप्नः
'उपसर्गे घोः किः'[१२]	किः	प्रतिः अन्तर्धिः
'स्त्रियां क्तिन्'[१३]	क्तिन्	कृतिः, चितिः

तदेवमकर्तरि च कारके संज्ञायामित्युत्सर्गशास्त्रस्य चतुर्विंशत्यपवादशास्त्राणां परिचयो जातः ।

'एरच सूत्रापवाद शास्त्राणि'

यद्यप्यकर्तरि च कारके संज्ञामित्युत्सर्गशास्त्रं प्रति 'एरच् ऋदोरप्' इति शास्त्रद्वयस्यापवादत्व वर्त्तते, तथाप्यन्यशास्त्रापेक्षया तूत्सर्गत्वमुभयत्र प्रसिद्धम् । तथाहि 'एरच्' इति शास्त्रेणेवर्णान्ताद्धातो र्भावे कर्तृभिन्ने कारके संज्ञायामच् प्रत्ययो विधीयते। अतः अकर्तरि च कारके संज्ञायामित्युत्सर्गशास्त्रस्याप्राप्तियोग्येऽचारितार्थ्यादस्यापवादत्वं स्वीकृतम्, किन्तु परिमाणाख्यायां गम्यमानायामिवर्णान्ताद्धातोरपि घञेव भवति नाच् प्रत्ययः । तथा चानुशासनमस्ति 'परिमाणाख्यायां सर्वेभ्यः'[१४] इति ।

१. पा० सू० ३।३।६७
२. पा० सू० ३।३।६८
३. पा० सू० ३।३।६९
४. पा० सू० ३।३।७२
५. पा० सू० ३।३।७३
६. पा० सू० ३।३।७५
७. पा० सू० ३।३।७६
८. पा० सू० ३।३।७७
९. पा० सू० ३।३।७८
१०. पा० सू० ३।३।९०
११. पा० सू० ३।३।९१
१२. पा० सू० ३।३।९२
१३. पा० सू० ३।३।९४
१४. पा० सू० ३।३।२०

अतो निचीयतेराशी क्रियते इति निचाय तण्डुलानां निचायः तण्डुलनिचाय इत्यत्र घञ् प्रत्यय. सिध्यति। अत्र सर्वेभ्यः इति पदेन 'ऋदोरप्' शास्त्रस्यापि बाधो बोध्यः। तेन निष्पूयते शोध्यते तुषाद्यपनयमेन यस्तण्डुलः सनिष्पाव इत्यत्र घञ् भवति, न तवर्णान्ताद्धातोरपीतिभावः। यद्यप्यत्र 'पुरस्तादपवादा अनन्तरान् विधीन बाधन्ते नोत्तरान्' इति परिभाषया 'एरच्' इति शास्त्रस्यैवापवादः प्राप्तो न तु तदुत्तरस्य "ऋदोरप्" इत्यस्य, तथापि सूत्रेऽस्मिन् 'सर्वेभ्यः' इति पदसामर्थ्यादजपोरुभयोर्बाधः समुचितः। तथा चोक्तं महाभाष्ये 'सर्वग्रहणं किमर्थम् ? सर्वेभ्यो धातुभ्यो घञ् यथा स्यादजपोरपिविषये, एकस्तण्डुलनिचायः, द्वौ शूर्पनिष्पावौ,[१] इतिः।

एवम् उदि श्रयतियौति पद्रुवः'[२] इति विशेषशास्त्रेणापि स्वस्वप्रवृत्तिनिमित्तमाश्रित्य प्रवृत्तम् एरच् 'ऋदोरप्' इति शास्त्रद्वयं प्रबाध्य घञ् प्रत्ययो विधीयते।

तेन उच्छ्रायः, उत्पावः, इत्यादौ घञ् प्रत्ययो दृश्यते। तदित्थमजपोरुभयोरपवादकं 'परिमाणाख्यायां सर्वेभ्यः' उदिश्रयतियौति पूद्रुवः इति शास्त्रद्वयं निष्पन्नम्।

अपवाद शास्त्राणि	प्रत्ययाः	उदाहरणानि
'इङश्च'[३]	घञ्	अध्यायः
श्रिणी भुवोऽनुपसर्गे'[४]	घञ्	श्रायः, नायः, भावः
'अवोदोर्नियः'[५]	घञ्	उन्नायः
परिन्योर्नीणोद्यूताभ्रेषयोः'[६]	घञ्	परिणायेन शरान् हन्ति
परावनुपात्यय इणः'[७]	घञ्	तव पर्यायः
व्युपयोः शेते पर्याये'[८]	घञ्	तव विशायः
हस्तादाने चेरस्तेये'[९]	घञ्	पुष्पप्रचायः
निवासचितिशरीरोपसमाधानेष्वादेश्चकः'[१०]	घञ्	काशीनिकायः

१. पा० सू० ३।३।२०, भाष्ये

२. पा० सू० ३।३।४९-भावः इत्यत्र तु ऋदोरबिति सामान्यशास्त्रस्यानेनापवादो भवतीति भावः।

३. पा० सू० ३।३।२१

४. पा० सू० ३।३।२४

५. पा० सू० ३।३।२६

६, पा० सू० ३।३।३७

७. पा० सू० ३।३।३८

८. पा० सू० ३।१।३९

९. पा० सू० ३।३।४०

१०. पा० सू० ३।३।४१

संघेचानौत्तराधर्ये[१] घञ् भिक्षुनिकायः

एषूदाहरणेषु सर्वत्रेवर्णान्तधातुत्वाद् 'एरच इति' सामान्यशास्त्रस्यावश्यप्राप्तौ शास्त्राण्येतान्यारभन्ते अतस्तदपवादभूतानीति सुतरां सिद्धम्।

ॠदोरपसूत्रस्यापवादशास्त्राणि

ॠदोरबिति शास्त्रं खलु "अकर्तरि च कारके संज्ञायाम्" इति सामान्य शास्त्रस्यापवादभूतमस्तीति प्राग्व्याख्यातम्, किन्त्वन्यशास्त्रापेक्षया 'ॠदोरप्' इति शास्त्रमप्युत्सर्गपदभाग् भवति। तत्रैतदपवादशास्त्राणि च घञ् प्रत्ययविधायकानि द्वादश सन्ति। तद्यथा—

शास्त्राणि	प्रत्ययाः	उदाहरणानि
उपसर्गेरुवः"[२]	घञ्	सरावः
समियुद्रुदुवः"[३]	,,	संयावः
वौक्षुश्रुवः"[४]	,,	विक्षावः
प्रेद्रुस्तुस्रुवः"[५]	,,	प्रद्रावः
निरभ्योः पूल्वोः"[६]	,,	निष्पावः
उन्न्योर्ग्रः"[७]	,,	उद्गारः, निगारः
कृधान्ये"[८]	,,	उत्कारो निकारः धान्यविशेषः
"प्रे स्त्रोऽयज्ञे"[९]	,,	प्रस्तारः
प्रथने वावशब्दे"[१०]	,,	पटस्य विस्तारः
छन्दोनाम्नि च"[११]	,,	विष्टारः पंक्तिश्छन्दः
विभाषाङि रुप्लुवोः"[१२]	,,	आरावः, आरवः
परौभुवोऽवज्ञाने"[१३]	,,	परिभावः, परिभवः

"विभाषाङिरुप्लुओः" परौभुवोऽज्ञाने" इति शास्त्रद्वयेन 'ॠदोरप्' इति सामान्यशास्त्रस्यापवादस्तु भवति वैकल्पिकः, यतोहि "नानुबन्धकृतम-

१. पा० सू० ३।३।४२
२. पा० सू० ३।३।२२
३. पा० सू० ३।३।२३
४. पा० सू० ३।३।२५
५. पा० सू० ३।३।२७
६. पा० सू० ३।३।२८
७. पा० सू० ३।३।२९
८ पा० सू० ३।३।३०
९. पा० सू० ३।३।३२
१०. पा० सू० ३।३।३३
११. पा० सू० ३।३।३४
१२. पा० सू० ३।३।५०
१३. पा० सू० ३।३।५६

सारूप्यमिति नियमस्यात्रापि जागरूकत्वेन "वाऽसरूपोऽस्त्रियामिति परिभाषासूत्रस्य प्रवृत्तिर्नैव संभवति।

एषां सूत्राणां लक्ष्येषु क्वचिदुवर्णान्तत्वात् क्वचिच्च ऋकारान्तत्वात् "ऋदोरप्" इति सामान्यशास्त्रस्य प्रवृत्तिसम्भावनायामेतानि शास्त्राणि जातानि। तत्र यद्यत्र "ऋदोरप्" इति शास्त्रेणाबेव भवेत्तदा सर्वमेतत्सत्रजातं व्यर्थं स्यात्। अतो निरवकाशो विधिरपवादः" इति नियमेन "ऋदोरप्" इति शास्त्रस्यैतानि घञ् विधायकशास्त्राण्यपवादभूतानि सन्तीति निश्चीयते।

ग्रहवृदृनिश्चिगमश्चेति शास्त्रस्यापवादशास्त्राणि

"ग्रहवृदृनिश्चिगमश्च"[1] इति शास्त्रं हि "अकर्तरि च कारके संज्ञायाम्" इति सामान्यशास्त्रम् 'एरच्' इति सामान्यशास्त्रञ्चापवाद्य प्रवर्तते। तत्र निश्चीयते इति "निश्चय" इत्यत्र सर्वतः "पूर्वमकर्तरि च कारके संज्ञायामित्यनेन" घञ् प्रत्ययः प्राप्तः, किन्तु एरजिति शास्त्रेण तदपवाद्य अच् प्रत्ययः प्राप्तः। एष अच् प्रत्ययोऽप्यनेन विशेषशास्त्रेण बाध्यते। यतो हि सर्वतः प्रथमं पूर्वसूत्रेण तु सर्वेभ्यो धातुभ्यो घञ् प्रत्ययो विधीयते। तदनु एरजिति सूत्रेणेवर्णान्ताद् धातोरच् प्रत्ययः विधानेन ततो विशेषभूतम्। अस्मिन् सूत्रे तु इवर्णान्तेषु धातुषु चिधातोर्नामतोग्रहणमस्ति। अतः सामान्यविशेषभावः परम्परायां सर्वतोविशेषस्य प्राबल्यमिति शब्दानुशासनसिद्धान्ताद् "ग्रहवृदृनिश्चिगमश्चेति शास्त्रं प्रबल सन्निश्चय इत्यत्र एरजिति शास्त्रं प्रबाध्य प्रवर्तते। यद्यपि निश्चय इत्यत्रापि अपि च सति नास्ति स्वरूपतो भेदः प्रतीयते. पुनरपि स्वरभेदविद्यत एव, तथाहि अचि प्रत्यये सति 'चितः'[3] इति शास्त्रेणान्तोदात्तस्वरः सम्भवेत्। अपि प्रत्यये च "अनुदातौ सुप्पितौ"[2] इति शास्त्रेणानुदात इति। अत्रानुदात्त एवेष्टः, ततश्चाब् विधानमिति भावः।

इतरेभ्यो ग्रहादिभ्यस्तु साक्षाद् "अकर्तरि च कारके संज्ञायाम्" इति सामान्यशास्त्रेण प्राप्तघञ् प्रत्ययमेवापवाद्यानेनाप् प्रत्ययो विधीयते। तेन ग्रहः, वरः, दरः, गमश्चेति पदानि सिध्यन्ति। तदेवं ग्रहवृदृनिश्चिगमश्चेति शास्त्रं पूर्वोक्तशास्त्रद्वयस्यापवादकमिति निश्चितम्।

अत्र पुनरस्यापवादशास्त्रजिज्ञासायां घञ् प्रत्ययविधायकानि दश सूत्राणि बुद्धौ समायान्ति। तानि च पुरस्तात् प्रस्तुत्य विविच्यन्ते।

---

१. पा० सू० ३।३।५८
२. पा० सू० ६।१।१६३
३. पा० सू० ३।१।४

अपवाद शास्त्राणि	प्रत्ययाः	उदाहरणानि
"उदिग्रहः"[1]	घञ्	उद्ग्राहः
समिमुष्टौ[2]	,,	मल्लस्य संग्राहः
"आक्रोशेऽन्वयोर्ग्रहः[3]	,,	अवग्राहस्ते भूयात्
प्रेल्पिसायाम्"[4]	,,	पात्रग्राहेण चरति भिक्षुः
परौयज्ञे"[5]	,,	उत्तरः परिग्राहः
'नौवृधान्ये'[6]	घञ्	नीवाराः
अवेग्रहो वर्षप्रतिबन्धे[7]	घञ्	अवग्राहः, अवग्रहः,
प्रेवणिजाम्'[8]	,,	तुलाप्रग्राहेण चरति तुला प्रग्रहेण
'रश्मौ च'[9]	,,	प्रग्राहः, प्रग्रहः
वृणोतेराच्छादने'[10]	,,	प्रवारः, प्रवरः

एषु दशसु सूत्रेषु 'उदिग्रहः' इत्यारम्य 'रश्मौ चेति नवसूत्रपर्यन्तं ग्रह धातोः सम्बन्धो वर्त्तते। अतो 'ग्रहवृदृनिश्चिगमश्चेति शास्त्रस्य सामान्यतः सर्वत्र प्राप्तिरस्ति, किन्तु तत्तदुपसर्गविशिष्टाद् ग्रहधातोस्तत्तद् विशेषार्थ द्योत्ये च एभिर्विशेषसूत्रैरप्प्रत्ययमपवाद्य घञ् प्रत्ययो विधीयते। तत्रापि 'अवेग्रहो वर्षप्रतिबन्धे' 'प्रेवणिजाम्' 'रश्मौ च' इति शास्त्रत्रयेणाप् प्रत्ययस्य पाक्षिको भवति बाधः। अत एवैतदुदाहरणे घञप्प्रत्ययनिष्पन्नपदयोरुभयोनिर्देशः कृतः। 'वृणोतेराच्छादने' इत्यन्तिमसूत्रेणापि पाक्षिको बाधोभवति, किन्तु प्रावार इत्यत्र वृ धातुमभिलक्ष्य पूर्वोक्तससामान्यसूत्र प्रवर्त्तते। तच्चानेनाच्छादनरूपविशेषार्थे बाध्यत इति विवेकः।

तदेवमिह भाववाचिकृत्प्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वमुपपन्नम्।

'करणाधिकरणार्थकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम'

तत्र तावत् 'ल्युट् च'[11] इति सूत्रात् 'करणाधिकरणयोश्च'[12] इति

१. पा० सू० ३।३।३५
२. पा० सू० ३।३।३६
३. पा० सू० ३।३।४५
४. पा० सू० ३।३।४६
५. पा० सू० ३।३।४७
६. पा० सू० ३।३।४८
७. पा० सू० ३।३।५१
८. पा० सू० ३।३।५२
९. पा० सू० ३।३।५३
१०. पा० सू० ३।३।५४
११. पा० सू० ३।३।११५
२१. पा० सू० ३।३।११७

शास्त्रे ल्युडनुवर्त्तते। 'ल्युटच' इति शास्त्रेण ल्युट्प्रत्ययस्तु नपुंसके भावे विधीयते, तेन हसनं शयनं जल्पनं जनानामित्यत्र ल्युट् प्रत्ययो दृश्यते। 'ल्युट् च' इति सूत्रघटकचकारेण तदव्यवहितपर्वोक्तसूत्रात् नपुंसके, भावे, इति पदद्वयमनुवर्त्तते[1]। क्तपदन्तु ल्युट् प्रत्यय दृष्ट्वा निवर्त्तते। एतदेव ल्युट्प्रत्ययपदं 'करणाधिकरणयोश्च' इति सूत्रार्थेनापि सम्बध्यते। ततश्च करणेऽधिकरणे च कारके धातोर्ल्युट् प्रत्ययो भवतीत्यर्थः सम्पद्यते। इध्मप्रव्रश्चनः इत्यत्र प्रवृश्च्यतेऽनेनेति करणार्थे ल्युटि सति प्रव्रश्चन इति विग्रहे च इध्मप्रव्रश्चन इति पदं सिध्यति। एवं गोदोहनीस्थाली, इत्यत्र दुह्यतेऽस्यामित्यधिकरणार्थे च ल्युटि दोहनी गोर्दोहनीति विग्रहे च गोदोहनीति पदं निष्पद्यत इति सामान्यतः करणाधिकरणार्थे ल्युटः प्रवृत्ति दृश्यते। करणाधिकरणयोरधिकारस्तु 'स्वरितेनाधिकार' इति सूत्रानुशासनाद् व्याख्यानाच्च 'ईषदुदुःसुषु कृच्छ्राकृच्छार्थेषुखल्' इति सूत्रात् प्रागेव स्वीक्रियते। तथाचोक्तं 'करणाधिकरणयोश्चेति सूत्र व्याख्याने सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनापि खलः प्राक्करणाधिकरणयोरित्यधिकारः। एतेन खल् प्रत्ययविधायक सूत्रात् प्रागुक्तसूत्रैः करणाधिकरणयोरेवार्थयोः प्रत्यया विधीयन्ते इति लभ्यते। तत्र च यदि विशेषविधिःस्यात्तदा तेन विशेषविधिना ल्युट् प्रत्ययस्यापवादो निश्चितः। तद्यथा दन्ताश्छाद्यन्तेऽनेनेति विग्रहे दन्तच्छद इत्यत्र 'पुंसिसंज्ञायां घः प्रायेण[2]' इति विशेषशास्त्रेण ल्युट् प्रत्ययमपवाद्य घप्रत्ययो विधीयते। एवं समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः–स देशः संस्ताव इत्यत्रापि 'यज्ञेसमिस्तुवः[3]' इति विशेषशास्त्रेण ल्युट् प्रत्ययस्यापवादो दृश्यते। तदेवं करणाधिकरणयोश्चेत्युत्सर्गशास्त्रस्याप्यपवादभूतमेतच्छास्त्रद्वयमिति मतम्।

तत्र 'पुंसिसंज्ञायां घः प्रायेण' इत्यपवादशास्त्रस्याप्यपवादभूतानि त्रीणि शास्त्राणि सन्ति। 'अवेतृस्त्रोर्घञ्[4]' 'हलश्च[5]' 'उदङ्कोऽनुदके[6]' इति। यतोहि अवतरति विग्रहे अवतारः कूपादेः अवस्तीर्यते आच्छाद्यतेऽनेनेति विग्रहे अवस्तार इत्यत्र च पर्वोक्तल्युटप्रत्ययमपवाद्य अवे उपपदे 'तृस्तृभ्यां करणाधिकरणयोः' पुंसि संज्ञाया घञ्स्यादित्यर्थकेन 'अवेतृस्त्रोर्घञ्' इति विशेषशास्त्रेण घञ् विधीयते। एवं रमन्ते योगिनोऽस्मिन्निति रामः अपमृज्यतेऽनेन व्याधिरित्यपामार्ग इत्युभयत्र सामान्यतः प्राप्तं ल्युट् प्रत्ययं प्रबाध्य 'हलश्च' इति शास्त्रेण हलन्ताद् धातोर्घञ् विधीयते। तथा 'उद-

१. पा० सू० ३।३।११५

२. पा० सू० ३।३।११८

३. पा० सू० ३।३।३१

४. पा० सू० ३।३।१२०

५. पा० सू० ३।३।१२१

६. पा० सू० ३।३।१२३

ङ्कोऽनेदके' इति विशेषशास्त्रेणापि घृतमुदच्यते उद्ध्रियतेऽस्मिन्निति विग्रहे घृतोदकं भाण्डमित्यत्र ल्युट्प्रत्ययमपवाद्य घञ् प्रत्ययो विधीयते।

अपि च अधीयतेऽस्मिन्नध्यायः, नयन्त्यनेनेति न्यायः, उद्यु वन्त्यनेनेति उद्यावः, संहरन्त्यनेनेति संहारः तथा आनीयन्ते मत्स्यादयोऽनेनेति आनायो जालमित्येते प्रयोगा घञ् प्रत्ययघटिता एव व्यवह्रियन्ते। अत एव 'अध्याय-न्यायोद्यासंहाराश्च[1]' जालमानायः[2]' इति सूत्राभ्यां ल्युट्प्रत्ययमपवाद्य घञन्ता निपात्यन्ते। तदेवं करणाधिकरणार्थकप्रत्ययविधायकशास्त्राणा-मुत्सर्गापवादत्वमिह चिन्तितम्।

'तच्छीलाद्यर्थकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम्'

तच्छीलाद्यर्थकप्रत्ययानां सम्बन्धस्तावत तृन् प्रत्ययादारभ्य क्विप-प्रत्ययमभिव्याप्य वर्त्तते। तथा चाधिकारसूत्रमस्ति 'आक्वेस्तच्छीलतद-धर्मतत्साधुकारिषु[3]' इति तत्र 'तृन्' इति सूत्रेण सामान्यतः सर्वेभ्यो धातुभ्यः तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु तृन् प्रत्ययो विधीयते। तेन कटकरणक्रियाशीले कर्तृ कर्ता कटानिति प्रयुज्यते। एवं तद्धर्मणि तृन् प्रत्ययविषये मुण्डयितारः श्राविष्टायना भवन्तीति उदाह्रियते। एतदभि-प्रायस्तु श्रीवासुदेवदीक्षितेन वधूमुण्डनं स्वधर्म इति अनुष्ठातार इति स्प-ष्टमुक्तः। तत्साधुकारिण्यर्थे च तृनिकटं साधु करोतीति तात्पर्येण कर्ता कटमिति निष्पद्यते। एवमेष तृन् प्रत्ययः सर्वेभ्यो धातुभ्य उक्तार्थेषूत्सर्गतः प्रवर्त्तते। अस्योत्सर्गशास्त्रापवादभूतशास्त्राणां क्रमश्चैवं विद्यते।

अपवादशास्त्राणि	प्रत्ययाः	उदाहरणानि
अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद रूच्यपत्रपवृत्तुवृधु सहचर इष्णुच"[4]	इष्णुच्	निराकरिष्णुः अलङ्करिष्णुरित्यादि
णेश्छन्दसि"[5]"	"	वीरुधः पारयिष्णवः
भुवश्च"[6]"	"	भविष्णुः
ग्लाजिस्थश्च क्स्नुः[7]"	क्सनुः	ग्लास्नुः
त्रसि गृधि धृषि क्षिपेः क्नुः"[8]	क्नुः	त्रस्नुः गृध्नुरित्यादि
शमित्यष्टाभ्यो घिनुण्"[9]	घिनुण्	शमी, तमीत्यादि

१. पा० सू० ३।३।१२२
२. पा० सू० ३।३।१२४
३. पा० सू० ३।३।१३५
४. पा० सू० ३।२।१३६
५. पा० सू० ३।२।१३७
६. पा० सू० ३।२।१३८
७. पा० सू० ३।२।१३९
८. पा० सू० ३।२।१४०
९. पा० सू० ३।२।१४१

संपृचानरुधाङ्यमाङ्यसपरिसृसंसृज परिदेविसंज्वरपरिक्षिपपरिरटपरिवद- परिदहपरिमुहदुषद्विषद्रुहदुहयुजा- क्रीडविविचत्यजरजभजातिचरापचरा- 'मुषाभ्याहनश्च'[1]	,,	अनुरोधीत्यादि
'वौ कषलसकत्थस्रम्भः'[2]	,,	विकासी, विलासीत्यादि
अपे चलषः'[3]		अपलाषी
प्रेस्रपसृद्रुमथवदवसः'[4]	,,	प्रलापी, प्रसारीत्यादि
निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरट् परिवादिव्याभाषासूयोवुञ्'[5]	वुञ्	निन्दकः हिंसक, इत्यादि
देविक्रुशोश्चोपसर्गे'[6]	,,	आदेवकः, आक्रोशकः
चलनशब्दार्थादकर्मकाद्युच्'[7]	युच्	चलनः, चोपनः
अनुदात्तेतश्च हलादेः'[8]	,,	वर्त्तनः, वर्धनः
जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुच- लषपतपदः'[9]	,,	जवनः, चङ्क्रमण इत्यादि
क्रुधमण्डार्थेभ्यश्च'[10]	,,	क्रोधनः रोषणः
'लषपतपदस्थाभूवृषहनकमगम शृभ्य उकञ्'[11]	उकञ्	लाषुकः पातुकः इत्यादि
'जल्पभिक्षकुट्टलुण्टवृङः षाकन्[12]'	षाकन्	जल्पाकः, भिक्षाकः
प्रजोरिनिः[13]	इनिः	प्रजवी
जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च'[14]		जयी, दरीत्यादि

१. पा० सू० ३।२।१४२
२. पा० सू० ३।२।१४३
३. पा० सू० ।२।१४४
४. पा० सू० ३।२।१४५
५. पा० सू० ३।२।१४६
६. पा० सू० ३।२।१४७
७. पा० सू० ३।२।१४८
८. पा० सू० ३ २।१४९*

* अस्य "अनुदात्तेतश्च हलादेः' इति शास्त्रस्यापि निषेधरूपापवादभूत "न यः' 'सूददीपदीक्षश्च' इति शास्त्रद्वय वर्त्तते । तेन क्नूयिता, क्ष्मायिता इत्यत्र यकारान्ताद्धातोर्युच् प्रतिषिध्यते । एवं सूदिता, दीपिता, दीक्षिता, इत्यत्रापि युज् निषेधो दृश्यते, उभयत्र युच् निषेधात् प्रतिप्रसवरूपेण पुनः तृन्निति सामान्यशास्त्रविहिततृनप्रत्ययः सिध्यति ।

९. पा० सू० ३।२।१५०
१०. पा० सू० ३।२।१५०
११. पा० सू० ३।२।१५४
१२. पा० सू० ३।२।१५५
१३. पा० सू० ३।२।१५६
१४. पा० सू० ३।२।१५७

अपवादशास्त्राणि	प्रत्ययाः	उदाहरणानि
"स्पृहिगृहिपतिदयिनिन्द्रातन्द्राश्रद्धाभ्य आलुच्[1]		स्पृहयालुः गृहयालुः
दाधेट् सिशद् सदोरु "[2]	रूः	दारु, धारुः
सृघस्यदः क्मरच्[3]	क्मरच्	सृमरः, घस्मर
'भञ्जभासमिदोघुरच्[4]	घुरच्	भङ्गुरः, भासुर,
'विदिभिदिच्छिदेःकुरच्[5]	कुरच्	विदुरः, भिदुरः
'इण्नशजिसर्तिभ्यःक्वरप्[6]'	क्वरप्	इत्वरः, नश्वरः
'यजजपदशां यङः[7]	ऊक्	यायजूकः, जञ्जपूकः
'नमिकम्पिस्म्यजसकमहिंसदीपोरः[8]	रः	नम्रः, कम्प्रः
'सनाशंसभिक्ष उः[9]	उः	चिकीर्षुः, आशंसुः
'क्याच्छन्दसि[10]	,,	देवाक्रिजगातिसुन्नुयुः
'आदृगमहनजनः किकिनौ लिट् च[11]	किकिनौ	पपिःसोमम ददिर्गाः
'स्वपितृषोर्नजिङ्[12]	नजिङ्	स्वप्नक् तृष्णक्
'शृवन्द्योरारुः[13]	आरुः	शरारुः, वन्दारुः,
'भियः क्रुक्लुकनौ[14]	क्रुक्लुकन्	भीरुः, भिलुकः,
'स्थेशभासपिसकसो वरच्[15]	वरच्	स्थावरः, ईश्वरः
'यश्च यङः[16]	,,	यायावरः
'भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्	क्विप्	विभ्राट् भाः
'अन्येभ्योऽपि दृश्यते[18]	,,	छित्, भित्

एतानि किल शास्त्राणि तृन्निति सामान्यशास्त्रस्यावश्यप्राप्तौ विशेषरूपेणोपात्तानि। अतस्तदपवादभूतानिति निगदं प्रतीयते।

तदित्थमिह धातुविहितकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणां विवेचनं परिपूर्णम्।

इति पञ्चमो विमर्शः ॥

---

१. पा० सू० ३।२।१५८
२. पा० सू० ३।२।१५९
३. पा० सू० ३।२।१६०
४. पा० सू० ३।२।१६१
५. पा० सू० ३।२।१६२
६. पा० सू० ३।२।१६३
७. पा० सू० ३।२।१६६
८. पा० सू० ३।२।१६७
९. पा० सू० ३।२।१६८
१०. पा० सू० ३।२।१७०
११. पा० सू० ३।२।१७१
१२. पा० सू० ३।२।१७२
१३. पा० सू० ३।२।१७३
१४. पा० सू० ३।२।१७४
१५. पा० सू० ३।२।१७५
१६. पा० सू० ३।२।१७६
१७. पा० सू० ३।२।१७७
१८. पा० सू० ३।२।१७८

षष्ठो विमर्शः

धातुविहिततिङ्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि

धातुविहितकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्रविवेचनानन्तरं धातुविहिततिङ्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणां विवेचनं क्रमात्प्राप्तम्। अतस्तत्प्रस्तूयते। तत्र तावत् तिङ्पदेन तिङ्प्रत्याहारो गृह्यते। स च "तिप्तस्झि-सिप्थस्थ मिब्वस्मस्-तातांझ-थासाथां--ध्वमिड्वहिड्महिङ्[1]" इति सूत्रस्थतिबादिङन्तसमुदायस्य बोधकः। समुदाये चाष्टादशप्रत्ययानां समावेशो वर्तते। एतेऽष्टादशप्रत्यया लादेशरूपेण शब्दानुशासने गृहीताः सन्ति। यतो हि सकर्मकेभ्यो धातुभ्यः कर्तरि कर्मणि तथाऽकर्मकेभ्यो धातुभ्यः कर्तरि, भावे च वाच्ये दश लकारा विधीयन्ते। तथा च शास्त्रमस्ति "लः कर्मणि च भावे चाऽकर्मकेभ्यः[2]" इति। यद्यपि शास्त्रे धातोर्विहिता लडादिदशलकारा एव साक्षात्प्रत्ययपदभाजो भवन्ति, तथापि व्यवहारे तदादेशरूपतिङ्प्रत्याहारेणैव बोधो भवति। अतो "यो यस्य स्थानापन्नः स तद्धर्मं लभते" इति सिद्धान्तेनार्थबोधकत्वरूपप्रत्ययत्वं तिङ्यपि सुतरां सिद्धम्।

लडादिदशलकाराणामुत्सर्गापवादत्वम्

तत्र धातोर्विहितलडादिलकाराणां परस्परमुत्सर्गापवादत्वं द्विधा दृश्यते। प्रथमवर्गे तावत् तान्येव शास्त्राणि समायान्ति यैः कानिचिदेव लकारविधायकशास्त्राण्यपवाद्यन्ते। द्वितीयवर्गे तु सर्वलकाराणामपवादभूतानि विशेषशास्त्राणि दृश्यन्ते। तत्र प्रथमवर्गे लट् लकारः तत्तत्पदयोगं विशेषार्थञ्चाश्रित्य भूते भविष्यत्कालेऽपि प्रवर्तते। तद्यथा—'लट् स्मे[3]' इति विशेशशास्त्रेण स्मशब्दयोगे सति "परोक्षे लिट्[4]" इति सामान्यशास्त्रेण परोक्षभूते प्राप्तं लिट्लकारमपवाद्य लट् विधीयते। तेन "यजति स्म युधिष्ठिरः" इति साम्प्रतं प्रयुज्यते।

एवम्भूतानद्यतने स्मशब्दयोगे लङ्लकारमपवाद्य "अपरोक्षे च[5]" इति विशेषशास्त्रेण लट् विधीयते। ततश्च एवं "पिता अब्रवीत्" इत्यर्थे एवं "स्म पिता ब्रवीति" इति वर्तमानकालिकः प्रयोगः सिद्धो भवति।

---

१. पा० सू० ३।४।७८
२. पा० सू० ३।४।६९
३. पा० सू० ३।२।११८
४. पा० सू० ३।२।११५
५. पा० सू० ३।२।११९

सामान्यभूतेऽपि पृष्टप्रतिवचने ननुशब्दयोगे लुङ् लकारमपवाद्य "ननौ पृष्टप्रतिवचने[१]" इति शास्त्रेण भूते लट् विधीयते। तेन "अकार्षीः किमिति" प्रश्नस्योत्तरे "ननु करोमि भोः" इति वाक्यं सङ्घटते। यत्र किल ननु इति पृथक्पदे स्वीक्रियेते, तत्र नशब्दे नुशब्दे च योगे सति पूर्वोक्तपृष्टप्रतिवचनार्थे विकल्पेन लङ् लकारं बाधते, लट् लकारः। तदर्थं "नन्वो विभाषा[२]" इति शास्त्रं पृथगेव निर्मितमस्ति। अतोऽकार्षीः किमिति प्रश्ने न करोमि, नाकार्षमिति। एवं नुशब्दयोगे 'अहं नु करोमि' 'अहं न्वकार्षमिति च यथेच्छं लकारद्वयं व्यवह्रियते। तथा भविष्यत्कालेऽपि वैकल्पिको लड्विधि दृश्यते। तेषां परिचयस्तु सोदाहरणमेवं विद्यते।

"विभाषा कदा कर्ह्योः[३]"	कदा कर्हि वा भुङ्क्ते, भोक्ष्यते, भोक्ता वा
"किं वृत्ते लिप्सायाम्[४]"	कं कतरं कतमं वा भोजयसि, भोजयिष्यति, भोजयितासि वा
"लिप्स्यमानसिद्धौ च[५]"	योऽन्नं ददाति, दास्यति, दाता वा स स्वर्गं याति, यास्यति, याता वा
"लोडर्थलक्षणे च[६]"	कृष्णश्चेद् भुङ्क्ते, त्वं गाश्चारय
"लिङ् चोर्ध्वमौहूर्तिके[७]"	मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत्, आगच्छति, आगमिष्यति, आगन्ता वा अथ त्वं छन्दोऽधीष्व
"वर्तमानसामीप्ये वर्तमानवद्वा[८]"	कदा आगतोऽसि ? अयमागच्छामि, अहमगमम्, कदा गमिष्यसि ? एष गच्छामि, गमिष्यामि वा

एभिर्विशेषसूत्रैस्तदुदाहरणैश्चेदं प्रतीयते यत् कदाकर्ह्यादिपदयोगे लिप्स्यमानसिद्ध्याद्यर्थे लट्लकारोऽपि भवति वैकल्पिकः। स चात्र "लट् शेषे च[९]" इति सामान्यशास्त्रविहितलृट्लकारस्य विकल्पापवादभूतः सन् प्रवर्तते।

अस्य लृट्लकारस्यापि विकल्पापवादभूतमेकं शास्त्रं विद्यते "इच्छार्थेभ्यो विभाषा वर्तमाने[१०]" अनेन विशेषशास्त्रेण वर्तमानकाले लिङ्ङपि

१. पा० सू० ३।२।१२०
२. पा० सू० ३।३।५
३. पा० सू० ३।३।६
४. पा० सू० ३।३।७
५. पा० सू० ३।३।८
६. पा० सू० ३।३।९
७. पा० सू० ३।३।१३१
८. पा० सू० ३।३।१३
९. पा० सू० ३।३।१३
१०. पा० सू० ३।३।१६० प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्

विधीयते। तेन इच्छेत्-गच्छति-कामयेत्, कामयते इत्यत्रेच्छार्थेभ्यो धातुभ्यो लटि लिङ्लकारोऽपि सिद्धः।

भूतकाले च "लुङ्[1]" इति सामान्यशास्त्रेण लुङ्लकारो भवति। तत्रापि यद्यनद्यतनभूतस्य बोधयिष्येत् तदा "अनद्यतने लङ्[2]" इति विशेषशास्त्रेण लङ्लकारो विधीयते। एवं परोक्षानद्यतनभूतेऽभीष्टे सति "परोक्षे लिट्[3]" इति ततोऽपि विशेषशास्त्रेण लिट्लकारो दृश्यते। तस्माद् भूतकालेऽपि सामान्यविशेषभावमाश्रित्य अभूत्, अभवत्, बभूव इति यथाक्रमं रूपत्रयं प्रयुज्यते। तत्र परोक्षभूतस्य लिटोऽपवादस्तु स्मशब्दयोगे "लट् स्मे" इति विशेषशास्त्रविहितलट्लकारेण भवतीति व्याख्यातमनुपदमेव प्राक्।

अथ भविष्यत्काले "लृट् शेषे च" इति सामान्यशास्त्रेण लृट्लकारो विधीयते। तत्र भविष्यदनद्यतनेऽर्थे विवक्षिते सति "अनद्यतने लुट्[4]" इति विशेषशास्त्रेण लुट्लकारः सम्पद्यते। ततश्च भविष्यति काले, भविष्यति अनद्यतने, भविष्यति च भवितेति व्यवह्रियते। ततश्चानयोरुत्सर्गापवादो निश्चितः।

लृट्लकारस्तु लङ्लकारमपवाद्य प्रवर्तते। तद्यथा--'स्मरसि कृष्ण! गोकुले वत्स्यामः' इत्यत्र 'अभिज्ञा वचने लृट्[5]' इति विशेषशास्त्रेण स्मृतिबोधने उपपदे भूतानद्यतने लृटलकारो दृश्यते। तत्र यदि यच्छब्दयोगः स्यात् तदा 'न यदि[6]' इति शास्त्रेण तन्निषिध्यते। अतः 'अभिजानासि कृष्ण! यद् वने अभुञ्जमहि' इत्यत्र लङेव भवति, न तु लृडिति निषेधरूपापवादत्वेन लङः प्रतिप्रसवरूपत्वमत्र जातम्।

लृट्लकारापवादभूतस्य लुट्लकारस्याप्यपवादशास्त्राणि चत्वारि सन्ति। तत्र तावत् क्रियाप्रबन्धे क्रियासातत्ये चानद्यतनकालद्योतको लुट्लकारातिदेशो निषेधरूपेणापवाद्यते। तथा च सूत्रमस्ति 'नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः[7]' इति। अत्रानद्यतनपदेनातीतानागतयोरुभयोरपि

---

१. पा० सू० ३।२।११०

२. पा० सू० ३।२।१११ अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पुर्वार्द्धेन च सहितोऽद्यतनस्तद्भिन्नोऽनद्यतनः।

३. पा० सू० ३।२।११५ साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वं परोक्षत्वम्।

४. पा० सू० ३।३।१५

५. पा० सू० ३।२।११२

६. पा० सू० ३।२।११३

७. पा०सू० ३।३।१३५

ग्रहणमिष्यते। तेन लुङ्लुटावुभावपि निषिध्येते। ततश्च 'यावज्जीवमन्न-मदात्, दास्यतीत्यत्र सामान्यतः लुङ्लुटावेव भवतः।

एवं 'योऽयमध्वा गन्तव्यः। आपाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून् पास्यामः' इत्यत्र प्राप्तस्य लुट्लकारस्य निषेधो दृश्यते। तदेवं विशेषशास्त्रमस्ति—'भविष्यति मर्यादावचनेऽवरस्मिन्[1]' इति। अत्र भविष्यतीति पदोपादानेनानद्यतनलुटः एव निषेधप्रसङ्गः प्राप्तः, न त्वनद्यतनलङः इति स्पष्टं भवति।

एवमग्रिमेण 'कालविभागे चानहोरात्राणाम्[2]' इति विशेषशास्त्रेण अहोरात्रसम्बन्धिनि विभागे भविष्यदनद्यतनलकारस्यैव निषेधः क्रियते। अत एव 'यः अयं वत्सरः आगामी तस्य यदवरमाग्रहायण्याः तत्र युक्ता अध्येष्यामहे' इत्यत्र लृडेव भवति, न तु लुडिति।

चतुर्थेन 'परस्मिन् विभाषा[3]' इति विशेषशास्त्रेण तु लुट्लकारस्य प्रतिषेधो वैकल्पिको भवति। तेन 'यः अयं संवत्सरः आगामी तस्य यत् परमाग्रहायण्यास्तत्र अध्येष्यामहे, अध्येतास्महे' इत्यत्र लृड्लुड् वेति यथेच्छं व्यवहर्तव्यम्। एतस्मात् सूत्रात् पूर्वोक्ते 'भविष्यति मर्यादावचनेऽवरस्मिन्' 'कालविभागे चानहोरात्राणाम्' इति सूत्रद्वये चावरपदोपादानेन मर्यादायाः पूर्वप्रदेश एव प्रविभागे गृहीतः। अत्र तु परपदोपादानेन मर्यादायाः परप्रदेशो गृह्यत इत्यपि विशेषः।

तदित्थं लुट्लकारस्यापवादभूतानि चत्वारि निषेधरूपाणि शास्त्राणि व्याख्यातानि।

सर्वलकारापवादरूपद्वितीयवर्गस्थविशेषसूत्राणां परिचयस्त्वेवं विद्यते। तत्र माङ्शब्दयोगे 'माङि लुङ्[4]' इति शास्त्रेण सर्वलकाराणामपवादत्वं प्रसिद्धम्। अत एव 'मा कार्षीः, मा शुचः' इत्यत्र लुङ्लकारो दृश्यते। अत्र लुङि अडागमस्तु 'न माङ्योगे[5]' इति विशेषशास्त्रेण निषिद्धमिति प्राग्व्याख्यातम्। यद्यप्यत्रोत्सर्गतो विध्यर्थे लोट्लिङ् वा लकारः प्राप्तः, तथापि तदपवाद्य लुङ्लकार एव विधीयते। एवं 'मा करिष्यसि' इत्यर्थेऽपि 'मा कार्षीः' इति प्रयोग एव शब्दानुशासनरीत्या समुचितः। यत्र तु 'मा गच्छतु' 'मा गमिष्यति' इति प्रयोग उपलभ्यते, तत्र 'मा' शब्दस्य योगो बोध्यः, न तु

---

१. पा० सू० ३।३।१३६
२. पा० सू० ३।३।१३७
३. पा० सू० ३।३।१३८
४. पा० सू० ३।३।१७५
५. पा० सू० ६।४।७४

माङ्शब्दस्य। माङ्मेत्युभावपि शब्दौ निषेधार्थकौ स्तः। तद्विवेचनाय च सूत्रेऽस्मिन् माङ्शब्दस्य निर्देशो विहितः।

एवं यस्मिन् वाक्ये निन्दाद्योतकौ अपिजातुशब्दयोर्योगो दृश्यते, तत्र 'गर्हायां लडपिजात्वोः[१]' इति विशेषशास्त्रेण कालत्रये लट्लकार एव भवति। यथा 'अपि जायां त्यजसि' 'जातु गणिकामाधत्से' इत्यत्र भूते भविष्यत्कालेऽपि लट्लकारानुशासनमेव दृश्यते। तत्र यदि कथं शब्दस्य प्रयोगः स्यात्तदा लिङ् लकारोऽपि सम्भाव्यते। तदर्थमनुशासनमस्ति 'विभाषा कथमिलिङ् चेति[२]'। तेन 'धर्मं त्यक्तवान्, त्यक्ष्यसि' त्यजसी' ति कालत्रयेऽपि कथं शब्दयोगे 'धर्मं त्यजेः, त्यजसि वेति' व्यवह्रियते।

कः कतरः कतमो वा हरिं निन्देत्, निन्दयिष्यति वेति वाक्यमपि सर्वलकारबोधकपरमस्ति। अत एव 'किं वृत्ते लिङ्लृटौ[३]' इति विशेषशास्त्रेण सर्वलकारानपवाद्य लिङ्लृटौ विहितौ। सूत्रस्थेन किंवृत्तशब्देन किंशब्दनिष्पन्नं विभक्त्यन्तं डतरडतमान्तं च पदं सङ्गृह्यते। अस्तु।

पर्वसूत्रानुवृत्तौ लिङ्लृटौ असम्भावनायामक्षमायां चार्थेऽपि सर्वलकारानपवाद्य 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि[४]' इति शास्त्रेण विधीयेते। तेन न सम्भावयामि न मर्षये वा,भवान् हरिं निन्देत्, निन्दयिष्यति वा कः कतरो, कतमो वा हरिं निन्देत्, निन्दयिष्यति वेत्युभयत्रापि लकारद्वयमेव श्रूयते। अत्र 'अकिंवृत्त इति पदेन साकमपि पदोपादानेनास्य शास्त्रस्य प्रवृत्तिः किंवृत्तेऽपि सूच्यते।

यत्र च वाक्ये क्रोधद्योतककिंकिलेति शब्दः प्रयुज्यते, अस्त्यर्थाः, अस्ति भवति विद्यतयो वा प्रयुज्यन्ते, तत्रोक्तानवक्लृप्त्यमर्षयोरर्थयो द्योत्ये लृट्लकार एव भवति। तेन 'न श्रद्दधे न मर्षये वा, किं किल त्वं शूद्रान्नं भोक्ष्यसे, अस्ति भवति, विद्यते वा शूद्रीं गमिष्यसीति 'किंकिलास्त्यर्थेषु लृडि[५]' ति शास्त्रेण सङ्गच्छते। पूर्वशास्त्रेणात्रापि सर्वलकारानपवाद्य लिङ्लृटौ प्राप्तौ। तत्रानेन तु लिङप्यपवाद्य लृडेव विधीयते इति विशेषः।

तद्विपरीतं 'जातुयदोर्लिङ्[६]' इति विशेषशास्त्रेण तु पूर्वोक्तार्थयोर्लृड्लकारमपवाद्य लिङ् विधीयते। तेन 'जातु यद्वा त्वादृश हरिं निन्देत् नावकल्पयामि, न मर्षयामि' इत्यत्र लिङ्लकार एव श्रूयते, न तु लृड्लकारः।

---

१. पा० सू० ३।३।१४२
२. पा० सू० ३।३।१४३
३. पा० सू० ३।३।१४४
४. पा० सू० ३।३।१४५
५. पा० सू० ३।३।१४६
६. पा० सू० ३।३।१४७

एवं 'यच्च, यत्र वा त्वमेव कुर्याः, न श्रद्दधे, न मर्षयामि' इत्यत्रापि 'यच्चयत्रयोः[1]' इति विशेषशास्त्रेण लिङेव विहितः।

तथा निन्दायाम् आश्चर्ये च यच्च यत्र शब्दयोर्योगे सर्वलकारानपवाद्य 'गर्हायां च[2]' 'चित्रीकरणे च[3]' इति विशेषशास्त्राभ्यां लिङेव विधीयते। तेन 'यच्च यत्र वात्वं शूद्रं याजयेः, अन्याय्यं तत्' 'यच्च यत्र वात्वं शूद्रं याजयेः आश्चर्यमेतत्' इत्युदाहरणद्वयं यथाक्रमं सङ्घटते,

यच्च यत्राभ्याम् अन्यस्मिन्नुपपदे आश्चर्ये द्योत्ये तु यदि यदिशब्दस्य प्रयोगो न स्यात्तदा सर्वलकारानपवाद्य 'शेषे लृडयदौ[4]' इति शास्त्रेण लृट्लकारोऽनुशिष्यते। तेन 'आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति' इत्यत्र लृट्लकार एव दृश्यते।

सामान्यतः सर्वलकारानपवाद्य लिङ्लकारविधानन्तु निम्नलिखित-सूत्रैर्जातम्।

तद्यथा—

'उताप्योः समर्थयोर्लिङ्[5]'	उत अपि वा हन्यादघं हरिः
'कामप्रवेदनेऽकच्चिति[6]'	कामो मे भुञ्जीत भवान्
सम्भावनेऽलमिति चेत्—	
'सिद्धाप्रयोगे[7]'	अपि गिरिं शिरसा भिन्द्यात्
'हेतुहेतुमतोर्लिङ[8]'	कृष्णं नंस्यति चेत्सुखं यास्यति
इच्छार्थेषु लिङ्लोटौ[9]'	इच्छामि भुञ्जीत्, भुङ्क्ताम् वा भवान्
विधिनिमन्त्रणामन्त्रणाधीष्ट-'सम्प्रश्नप्रार्थनेषु लिङ्[10]'	यजेत्, इह भुञ्जीत्, भवानित्यादि

अत्रैतत् सूत्रोदाहरणैरेव तत्तत्सूत्राणां प्रवृत्तिनिमित्तं स्पष्टं प्रतीयत इति विस्तरभयान्न व्याख्यातम्।

---

१. पा० सू० ३।३।१४८

२. पा० सू० ३।३।१४९

३. पा० सू० ३।३।१५०

४. पा० सू० ३।३।१५१

५. पा० सू० ३।३।१५२

६. पा० सू० ३।३।१५३

७. पा० सू० ३।३।१५४ 'सम्भावयामि भुञ्जीत्, भोक्ष्यते वा भवान्' इत्यत्र तु 'विभाषाधातौ सम्भावनवचनेऽयदि ३।४।१५५ इति शास्त्रेणोक्तार्थे वैकल्पिको लिङ् विधिरिष्टः।

८. पा० सू० ३।३।१५६

९. पा० सू० ३।३।१५७

१०. पा० सू० ३।३।१६१

तदित्थं सर्वलकारापवादरूपद्वितीयवर्गस्य शास्त्रविवेचनेन साकं सर्वविधलकाराणामुत्सर्गापवादत्वनिरूपणमपि निष्पन्नम्।

लकारादेशतिङामुत्सर्गापवाद शास्त्राणि

लकाराणामुत्सर्गापवादविवेचनानन्तरं तदादेशतिङ्सम्बन्ध्युत्सर्गापवादशास्त्राणि निरूप्यन्ते। तत्र सामान्यतः सर्वविधलकाराणां स्थाने पूर्वोक्ततिप्तस्झीत्यादिशास्त्रेण तिङादेशो भवति। तत्र "तङानावात्मनेपदम्[1]" "स्वरितञितः कर्त्रभिप्राये क्रियाफले[2]" इत्याभ्यां विशेषशास्त्राभ्यां तदेव विधीयते। तङ पदेन तिङ्प्रत्याहारघटिततादिङन्तं नवलादेशा गृह्यन्ते। त एव आत्मनेपदभाजो भवन्ति। ते चानुदात्तेतधातोर्ङित्धातोश्चोत्सर्गतो विधीयन्ते। तदर्थमनुशासनमस्ति "अनुदात्तङित्तआत्मनेपदम्[3]" अतस्तदतिरिक्तेभ्यो धातुभ्यस्तु "शेषात्कर्तरि परस्मैपदम्[4]" शास्त्रेण परस्मैपदं सिध्यति। आत्मनेपदपरस्मैपदयोरुत्सर्गापवादत्वमग्रे निरूपयिष्यते। पूर्वमुत्सर्गतो लकारस्य स्थाने तिङादेशो भवतीत्युक्तम्। तत्राप्यपवादरूपेण सत्संज्ञकशतृशानजादेशविधायकशास्त्राण्युपतिष्ठन्ते। येषु "लटः शतृशानचावप्रथमासामानाधिकरणे[5]" इति शास्त्रं प्रथमं समायाति। तथाचोक्तं भाष्ये "शतृशानचौ तिङपवादाविति[6]" अनेन शास्त्रेणापि अप्रथमान्तेन समानाधिकरणे सति लट् स्थाने शतृशानचौ विधीयते। अतः "पचन्तं चैत्रं पश्यति देवदत्तः' इति वाक्ये पचन्तमित्यत्र लटः स्थाने शत्रादेशो दृश्यते। एवं पचमानं चैत्रं पश्यति' इत्यत्रापि शत्रादेश एव भवति तिङादेशमपवाद्य। सन् ब्राह्मणः इत्यत्र प्रथमान्तेन सामानाधिकरणेऽपि लटः स्थाने शतृरूपादेशस्तु "वर्त्तमाने लट्[7]" इति सूत्राल्लट्पदेऽनुवर्त्तमाने पुनः लटः शतृशानचावित्यत्र लट्ग्रहणसामर्थ्यादेव भवति। तथाचोक्तं काशिकायाम्—"लडितिवर्त्तमाने पुनर्लड्ग्रहणमधिविधानार्थम्, क्वचित् समानाधिकरणेऽपि भवति सन्ब्राह्मणः, अस्तिब्राह्मणः इत्यादि[8]"। अस्तु! हे पचन् हे पचमाना, शयानाः भुञ्जते यवनाः, म्रियमाणः सोमः इत्यत्रापि "सम्बोधने च[9]" लक्षणहेत्वोः क्रियायाः[10]" इति विशेषशास्त्राभ्यां तिङादेशमपवाद्य शतृशानचौ प्रवर्त्तेते। अत्र शतृशानच्विषये वासरूपन्यायेन विकल्पापवादस्तु न

---

१. पा० सू० १।४।१००
२. पा० सू० १।३।७२
३. पा० सू० १।३।१२
४. पा० सू० १।३।७८
५. पा० सू० ३।२।१२४
६. म० भाष्ये ३।२।१२४
७. पा० सू० ३।१।१२३
८. पा० सू०
९. पा० सू० ३।२।१२५
१०. पा० सू० ३।२।१२६

शवङ्य. लादेशेषु वासरूपविधिर्नास्तीति परिभाषायाजागरूकत्वात्। अस्याः परिभाषायाः तात्पर्यन्त्विदमस्ति यल्लादेशकृतवैरूप्यवत्सु लकारेषु वासरूपविधिर्न प्रवर्त्तते इति। अस्यां परिभाषायाञ्च ज्ञापकमस्ति "हशश्वतोर्लंङ्"[1] इति सूत्रेण लङ् विधानम्, यतोहि हशश्वतोर्योगे परोक्षे लिटिसति असरूपत्वाल्लङपि सेत्स्यति. पुनर्लङ् विधानं व्यर्थं सत् ज्ञापयति–यल्लादेशेषु वासरूपविधिर्नास्तीति। अत्र "लिटःकानज्वा"[2] इति सूत्रे वाग्रहणमपि बोधयति यद् वासरूपसूत्रे अपवादः आदेशत्वानामाक्रान्तप्रत्यय एव गृह्यते इति। एतच्च "लिटःकानज्वा" इति सूत्रभाष्यप्रदीपोद्द्योते "परिभाषेन्दुशेखरे च व्याख्यातं नागेशभट्टैः।

तदेवमिह तिङोऽपवादभूतानि शास्त्राणि निरूपितानि।

तिङादेशानामुत्सर्गापवादत्वम्

तिङादेशेषु "झोऽन्तः[3]" इत्युत्सर्गशास्त्रं सर्वप्रथमं प्रवर्त्तते। प्रत्ययावयवस्य झकारस्यान्तादेशो भवतीत्यर्थकेन च तिङ् प्रत्याहारबोध्यस्य झकारस्य स्थाने अन्तादेशो जायते–भवन्ति, एधन्तेप्रभृतिषु, अभ्यस्तेभ्योधातुभ्यस्तु "अदभ्यस्तात्[4]" इति विशेषशास्त्रेण ददति, ददतु, इत्यत्र अदादेशो विधीयते। अतोऽन्तादेशस्यायं योगोऽपवादकः इति मतम्। अददुरित्यत्र "सिजभ्यस्तविदिभ्यश्च[5]" इति शास्त्रेण अदादेशमप्यपवाद्य जुस् भवति। तत्रेदं कारणमस्ति यत् "सिजभ्यस्तविदिभ्यश्च" इति सूत्रे "नित्यं ङितः[6]" इति सूत्राद् ङित इति पदमनुवर्त्तते। अतोऽभ्यस्तेभ्योङिति झेर्जुसेव भवति नत्वदादेशः। अन्तादेशापवादकेन "झेर्जुसे[7]" इति विशेषशास्त्रेण जुस्। विधानन्तु नात्र संघटते, झेर्जुसित्यत्र "लिङः सीयुट्[8]" इति सूत्राल्लिङः सम्बन्धात्। अत एव अभ्यस्तेभ्योलङि झस्य जुस् विधानार्थं "सिजभ्यस्तविदिभ्यश्च" इति सूत्रेऽभ्यस्तपदं संनद्धम्।

एवं लङसम्बन्धिझेरपि जुसादेशोऽन्तादेशमपवाद्य भवति वैकल्पिको "लङःशाकटायनस्यैव[9]" "द्विषश्चेति[10]" विशेषशास्त्राभ्याम्। तेन अयुः, अयान्, अद्विषुः, अद्विषन्, इति सिध्यति। एनयोः पूर्वसूत्रे आतः इति

१. पा० सू० ३।२।११६
२. पा० सू० ३।२।१०६
३. पा० सू० ७।२।३
४. पा० सू० ७।१।४
५. पा० सू० ४।४।१०६
६. पा० सू० ३।४।९९
७. पा० सू० ३।४।१०८
८. पा० सू० ३।४।१०२
९. पा० सू० ३।४।१११
१०. पा० सू० ३।४।११२

सूत्रमनुवर्त्तते । तस्मादाकारान्तादुत्तरस्य लङादेशस्य झेर्जुसादेश इति फलति । अस्तु ।

यथा झेर्जुसिति विशेषशास्त्रं लङि पचेयुः, यजेयुरित्यत्रान्तादेशमपवाद्य प्रवर्त्तते तथैव "झस्य रन्[१]" इति शास्त्रमपि पचेरन्, यजेरन् इत्यत्रान्ता देशमपवाद्य संगच्छतें । पचियजोरूभयपदत्वं तु स्वरितेतत्त्वात् प्रसिद्धम् ।

तदेवं तिङादेशेषु "झोऽन्तः" इत्युत्सर्गशास्त्रस्यापवादशास्त्राणि निर्धारितानि । इतोऽग्रे 'इतश्च[२]' इति सामान्यशास्त्रेण ङिल्लकारसम्बन्धिनः इकारस्य नित्यं लोपो भवति परस्मैपदेषु । तेन अपचत्, अपाक्षीत्, अपक्ष्यत्इत्यत्रेकारलोपो दृश्यते, किन्तु तत्रैव अपचम्, पचेयम्, अपाक्षम् इत्यत्र मिपि "तस्थस्थमिपां तान्तन्तामः[३]" विशेषशास्त्रेण इकारलोपमपवाद्य अम् विधीयते । एवं लोट्यपि पचतु, पचन्तु, इत्यत्र इकारलोपमपवाद्य "एरुः[४]" इति विशेषशास्त्रेणेकारस्योकारादेशो जायते । लोटः ङित्वन्तु "लोटो लङ्वत्[५]" इति शास्त्रेणाति दिश्यते । अतोऽत्र "इतश्च" इति सामान्यशास्त्रस्य प्रवृत्तिरिति भावः । लोट् लकारस्योत्तमपुरुषैकवचने भवानि, पचन्तीत्यादौ "मेर्निः[६]" इति विशेषशास्त्रेण एरुरिति शास्त्रस्याप्यपवादो भवति । तथा चोक्तं मेर्निरिति सूत्रवृत्तौ काशिकायाम् उत्वलोपयोरपवाद इति । तत्रोत्वापवादेनैव लोपस्याप्यपवादः सुतरां सिद्धः, यतोहि लोपमपवाद्योत्वं विधीयते । तत्र यद्युत्वस्यापि ततोऽपि विशेषशास्त्रेणापवादः स्यात् तदा का कथा लोपापवादस्येति भावः । आत्मनेपदेतु लोट् सम्बन्धिनः एकारस्य "आमेतः[७]" इति शास्त्रेण अमादेशो विधीयते । तेन एधताम्, एधेताम्, एधन्तामित्यादिपदानि सिध्यन्ति । एतदपवादभूतं शास्त्रमस्ति "सवाभ्यां वामौ[८]" इति । तेन एधस्व, एधध्वम्, इत्यत्र सकारवकाराभ्यामुत्तरस्यैकारस्य यथाक्रमं व, अम्, च भवतः ।

एवं लोट्सम्बन्ध्युत्तमपुरुषेऽपि एधै, एधावहै, एधामहै, इत्यत्र आमेतः इति शास्त्रमपवाद्य "एत ऐ[९]" इति विशेषशास्त्रेण एकारस्य स्थाने ऐकारादेशो भवति । एवमेव पुनः पुनः अतिशयेन एककर्तृकंवर्त्तमानकालिकं यानमित्यर्थे याहि याहीति यातीत्यत्र 'क्रियासमभिहारे लोट्लोटोहिस्वौवाच-

१ पा० सू० ३।४।१०५
२. पा० सू० ३।४।१००
३. पा० सू० ३।४।१०१
४. पा० सू० ३।४।८६
५. पा० सू० ३।४।८५
६. पा० सू० ३।४।८९
७. पा० सू० ३।४।९०
८. पा० सू० ३।४।९१
९. पा० सू० ३।४।९३

तध्वमोः[1] इति विशेषशास्त्रेण सर्वलकारानपवाद्य लोटलकारो विधीयते। अपि च लोटः स्थाने तिङोऽपवाद्य हिस्वौ भवतः। एतच्च सिद्धान्तकौमुद्या लकारार्थप्रक्रियायां विस्तरेण व्याख्यातमस्ति, अतः तन्नेहोपन्यस्यते पिष्टपेषणभयात्। अत्र तु केवलमपवादकोटावेतच्छास्त्रं कथमायातीत्येव विचार्यते। तथा च शास्त्रमेतद् सर्वलकारानपवाद्य लोट्लकारं विदधाति। लोट् स्थाने च तिङोऽपवाद्य हिस्वौ चेति निष्कर्षः।

तदित्थं तिङ्ङादेशसम्बन्ध्युत्सर्गापवादशास्त्राणि विवेचितानि।

विकरणप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम्

शब्दानुशासने प्रकृतिप्रत्ययमोर्मध्यस्थाः प्रत्ययाः विकरणपदेन व्यवह्रियन्ते। अत्र प्रकृतिपदेन धातवः प्रत्ययपदेन लडादेशप्रत्यया एव गृह्यन्ते। यतो ह्यनयोः प्रकृतिप्रत्ययोरन्तराल एव च ते प्रत्ययाः दृश्यन्ते। तथाहि सार्वधातुके यक्[2] इति सूत्रभाष्ये यक्शप् प्रत्ययचाधारीत्यकृत्य विचारितम्—भावकर्मकर्त्तारः सार्वधातुकार्था वा स्युर्विकरणार्थाविति ? कथं च सार्वधातुकार्थाः स्युः कथं वा विकरणार्थाः ? भावकर्मवाचिनि सार्वधातुके यग् भवति, कर्तृवाचिनि सार्वधातुके शब्भवतीति सार्वधातुकार्थाः। भावकर्मणोर्यग् भवति सार्वधातुके कर्त्तरि शब्भवति सार्वधातुके इति विकरणार्थाः[3] एतावता प्रकृतिप्रत्ययोरन्तरालप्रत्ययस्य विकरणत्वं सिद्धम्।

किञ्च विकरण इति महती संज्ञा, अतः विक्रियते प्रकृतिप्रत्ययोरव्यवहितोत्तरसम्बन्धविच्छेदः क्रियतेऽनेन व्युत्पत्त्यापि विकरणपदमुक्तार्थे पर्यवसनम्। विकरणेषु तावत् यक्शप्श्यन्श्नुशादयः स्यतास्च्लिप्रभृतयश्च प्रत्ययाः परिगण्यन्ते। तत्र सार्वधातुके यक्' कर्त्तरि शबिति शास्त्रद्वयमुत्सर्गतो विकरणविधावुपतिष्ठते। 'सार्वधातुके यक्' इति शास्त्रेण विधीयमानो यग्रूपविकरणप्रत्ययः भावे, कर्मणि क्वचिच्च कर्मकर्त्तर्यपि सार्वधातुके प्रत्ययेपरे दृश्यते। कर्त्तरि शबिति शास्त्रविहितशब् विकरणस्तु कर्त्तरि वाचिनि सार्वधातुकेपरे भवतीति विवेकः। अनयोरेकस्य शब्विकरणविधायककर्त्तृशबिति शास्त्रस्यापवादा विद्यन्ते, न तु यग्विधायकस्य सार्वधातुके यगितिशास्त्रस्य, यतोहि सर्वत्र भावकर्मवाच्ये तिङ्प्रत्यये यक् प्रत्ययः प्रवर्त्तत एव। तत्तद्गणविहितविकरणप्रत्ययविधायकसूत्राणि च सामान्यस्य कर्त्तरिशबिति शास्त्रस्यैवापवादभूतानि सन्ति, तेषामपवादशास्त्राणां सोदाहरणं परिचयस्तु एवमस्ति—

---

१. पा० सू० ३।४।५
२. पा० सू० ३।१।६७
३. पा० सू० ३।१।६७ महाभाष्ये

उत्सर्गशास्त्रम्	प्रत्ययाः	उदाहरणानि
'कर्त्तरि शप्[1]'	शप्	भवति गच्छति
एतदपवादशास्त्राणि		
'दिवादिभ्यः श्यन्[2]'	श्यन्	दीव्यति
'वा भ्राशभलाशभ्रमुक्रमुक्लमुत्रसि-त्रुटिलषः[3]'	,,	क्राम्यति क्रामति
'यसोऽनुपसर्गे[4]'	,,	यस्यति, यसति
'संयसश्च[5]'	,,	संयस्यति, संयसति
'स्वादिभ्यः श्नुः[6]'	श्नुः	सुनोति
'श्रुवः शृ च[7]'	,,	शृणोति
'अक्षोऽन्यतरस्याम्[8]'	,,	अक्ष्णोति, अक्षति
'तनूकरणेतक्षः[9]'	,,	तक्षति काष्ठम्, तक्ष्णोति काष्ठम्
'तुदादिभ्यः शः[10]'	शः	तुदति
'रूधादिभ्यः श्नम्[11]'	श्नम	रूणद्धि
'तनादिकृञ्भ्य उः[12]'	उः	तनोति
'धिन्विकृण्व्योरच[13]'	,,	धिनोति
'क्रयादिभ्य.श्ना[14]'	श्ना	क्रीणाति
'स्तम्भुस्तुम्भुस्कम्भुस्कुम्भु-स्कुञ्भ्यःश्नुश्च[15]'	श्नु,श्ना	स्तम्नाति, स्तम्नोति

एतेहि श्यन्नादिश्नान्तविकरणाः शब्विकरणस्यावश्यप्राप्तौ विधीयन्ते, तस्माच्छबपवादभूताः सन्तीति भावः । एवं 'लिङ्याशिष्यङ्[16]' इति शास्त्रविहिताङ् प्रत्ययेनापि शबपवाद्यते, तेन 'मन्त्रे वोचेमाग्नये' इति वैदिक प्रयोगः सिध्यति । 'वोचेम' इति वचेराशिर्लिङः मसि रूपमस्ति । तत्र

१. पा० सू० ३।१।६८
२. पा० सू० ३।१।६९
३. पा० सू० ३।१।७० वैकल्पिकापवादः
४. पा० सू० ३।१।७२ वैकल्पिकापवादः
५. पा० सू० ३।१।७२ वैकल्पिकापवाद
६. पा० सू० ३।१।७३
७. पा० सू० ३।१।७४
८. पा० सू० ३।१।७५ वैकल्पिकापवाद
९. पा० सू० ३।१।७६
१०. पा० सू० ३।१।७७
११. पा० सू० ३।१।७८
१२. पा० सू० ३।०।७९
१३ पा० सू० ३।१।८०
१४. पा० सू० ३।१।८१
१५. पा० सू० ३।१।८२
१६. पा० सू० ३।१।८६

वैदिक्यां शब्दानुशासनप्रक्रियायां 'छन्दस्युभयथा' इति सूत्रेण सार्वधातुकत्वाच्छपः प्राप्तिरासीदिति ज्ञेयम्।

एते पूर्वोक्तशबादिश्नान्तविकरणप्रत्ययाश्च स्यतासीविकरणप्रत्ययाभ्यां प्रबाध्यन्ते। तथाहि 'स्यतासी लृलुटोः[१]' इति सूत्रभाष्ये पक्ष्यति, यक्ष्यतीत्यत्र परत्वाच्छबादयः प्राप्नुवन्तीतिप्रश्नमुद्भाव्य 'यक्शपावुत्सर्गापवादाः श्यनादयः श्यादयश्चेति सिद्धान्तवचनेन समाहितम्। तस्माद् भविता, भविष्यतीत्यत्र स्यतासी भवतः।

एवमेव 'च्लिलुङि[२]' इति विशेषशास्त्रेणापि शबादयो बाध्यन्ते। तथाचोक्तं 'च्लिलुङि' इत्येतत् सूत्रव्याख्याने सिद्धान्तकौमुद्यां शबाद्यपवाद इति। तत्र शबाद्यपवादजाते च्लौ, तत्स्थाने चोत्सर्गतः 'च्लेः सिच्' इति शास्त्रेण सिजादेशो भवति। तेन अकार्षीत्, अहार्षीत्प्रभृतिपदानि सिध्यन्ति। अस्य 'च्लेः सिच्' इति सामान्यशास्त्रस्यापवादभूतानि शास्त्राणि तु निम्नलिखितानि वर्त्तन्ते—

उत्सर्गशास्त्रम्	प्रत्ययाः	उदाहरणानि
'च्लेःसिच्[३]'	सिच्	अकार्षीत्
एतस्यापवादशास्त्राणि		
'शलइगुपधादनिटःक्सः[४]'	क्सः	अधुक्षत्
णिश्रिद्रुस्रुभ्यः कर्तरि चङ्[५]'	चङ्	अचीकरत्
'विभाषाधेट्श्व्योः[६]'	,,	अदधत्, अधात्
'गुपेश्छन्दसि[७]'	,,	गृहानजूगुपतं युवम्
'अस्यतिवक्तिख्यातिभ्योऽङ्[८]'	अङ्	अख्यत्
'लिपिसिचि ह्वश्च[९]'	,,	अह्वत्
'आत्मनेपदेष्वन्यतरस्याम्[१०]'	,,	अलिपत, अलिप्त
'पुषादिद्युतादिभ्यः लृदितः परस्मैपदेषु[११]'	,,	अपुषत्, अद्युतत
'सर्तिशास्त्यर्तिभ्यश्च'[१२]	,,	असरत्

१. पा० सू० ३।१।३३
२. पा० सू० ३।१।४३
३. पा० सू० ३।१।४४
४. पा० सू० ३।१।४५
५. पा० सू० ३।१।४८
६. पा० सू० ३।१।४९
७. पा० सू० ३।१।५०
८. पा० सू० ३।१।५१
९. पा० सू० ३।१।५२
१०. पा० सू० ३।१।५३
११. पा० सू० ३।१।५४
१२. पा० सू० ३।१।५५

'इरितो वा'[१]		
'जृस्तन्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च'[२]	,,	अभिदत, अजरत्, अजारीत अस्तभत अस्तम्भीदित्यादि
कृ भृ दृरुहिभ्यश्छन्दसि[३]'	,,	इदंतेभ्योऽकरं नमः
'चिण ते पदः'[४]	,,	प्रण्यपादि
'दीपजनबुधपूरितायिप्यायिभ्यो-ऽन्यतरस्याम्'[५]	,,	अदीपि, अदीपिष्ट
'अचःकर्मकर्त्तरि'[६]	चिण्	अकारि कटः स्वयमेव अकृत कटः स्वयमेव
'दुहश्च'[७]	,,	अदोहि
चिण्भावकर्मणोः'[८]	,,	अशायि भवता, अकारि-कटो देवदत्तेन

एतान्येव विशेषशास्त्राणि सिचोऽपवादकत्वेन प्रसिद्धानि सन्ति। एषां व्याख्यानमत्र नापेक्ष्यते, तत्कार्योदाहरणोपन्यासेनैव सिचोऽपवादकत्व-रूपप्रतीतिसुलभात्।

तदेवमिह धातुविहिततिङ्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि विवेचितानि।

आत्मनेपदपरस्मैपदविधायकशास्त्राणामुत्सर्गापवादत्वम्

आत्मनेपदपरस्मैपदयोः सम्बन्धोऽपि धातुर्विहितलादेशप्रत्ययैः साकमस्ति। अतोऽत्र धातुविहिततिङ्प्रत्ययसम्बन्ध्युत्सर्गापवादविवेचना-नन्तरमात्मनेपदपरस्मैपदविधायकशास्त्राणामुत्सर्गापवादत्वं विमृश्यते। तत्र तावत् परस्मैपदसंज्ञा 'लः परस्मैपदमिति[९]' शास्त्रेण लादेशमात्रस्य भवति। आत्मनेपदसंज्ञा तु पूर्वेण प्राप्तायां परस्मैपदसंज्ञायां 'तङाना-वात्मनेपदम्[१०]' इति शास्त्रेण तङ्प्रयाहारस्य शानच् कानच् प्रत्यययोश्च क्रियते। तत्र सामान्यतः अनुदात्तङित आत्मनेपदम्[११]' 'स्वरितञितः कर्त्रभि-प्राये क्रियाफले[१२]' इति सूत्राभ्यामात्मनेपदं विधीयते। 'शेषात्कर्तरि परस्मै-

१. पा० सू० ३।१।५६
२. पा० सू० ३।१।५७
३. पा० सू० ३।१।५८
४. पा० सू० ३।१।५९
५. पा० सू० ३।१।६०
६. पा० सू० ३।१।६२
७. पा० सू० ३।१।६३
८. पा० सू० ३।१।८७
९. पा० सू० १।१।९९
१०. पा० सू० १।४।१००
११. पा० सू० १।३।१२
१२. पा० सू० १।३।७२

पदम्[1]' इति सूत्रेण तु येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदं विहितं ततोऽन्यावशिष्टेभ्यो धातुभ्यः कर्त्तरि परस्मैपदं विधीयते। अतः पूर्वमत्रानुदात्तङित आत्ममेपदम्' इति सामान्यशास्त्रेण विहितात्मनेपदस्य यानि

'व्याङ्परिभ्यो रमः'[2]

उपाच्च'[3]

विभाषाऽकर्मकात्'[4]

'द्युद्भ्योलुङि'[5]

'वृद्भ्यः स्यसनोः'[6]

लुटि च क्लृपः'[7] इति षडपवादशास्त्राणि सन्ति तानि विविच्यन्ते।

तत्रानुदात्तेतरम्धातोः पूर्वोक्तसामान्यसूत्रेण प्राप्तमात्मनेपदमपवाद्य 'व्याङ्परिभ्योरमः' इति विशेषशास्त्रेण वि आङ् परिरूपोपसर्गविशिष्टाद् रम्धातोः परस्मैपदं विधीयते। तेन विरमति, आरमति, प्रभृतिषु परस्मैपदमेव दृश्यते। एवं देवदत्तमुपरमतीत्यत्रापि 'उपाच्च' इति विशेषशास्त्रेण परस्मैपदविधानं भवति। अत्र रमधातुनाऽन्तर्भावितण्यर्थः प्रतीयते। तेनोपरमतीत्यस्योपरमयतीत्यर्थे प्रयोगात् देवदत्तमित्यत्र कर्मत्वमुपपद्यते। अत एव विभाषाऽकर्मकादित्युत्तरशास्त्रेणोपसर्गविशिष्टादकर्मकादेव रमधातो वैंकल्पिकपरस्मैपदविधानं संघटते। तथा च यावद् भुक्तमुपरमति, यावद्भुक्तमुपरमते इत्यत्रोभयपदं सिध्यति।

'द्युद्भ्योलुङि' इति विशेषशास्त्रेण तु द्युतादिगणपठितेभ्यो धातुभ्यो लुङि परस्मैपदं विधीयते। एतच्च परस्मैपदविधानमनुदात्तेतलक्षणेन प्राप्तमात्मनेपदस्य वैकल्पिकापवादरूपमस्ति। तेन 'अद्युतत्, अद्योतिष्ट, अलुठत्, अलोठिष्ट, प्रभृतिपदेषूभयपदत्वव्यवहारः सिध्यति।

एवं 'वृद्भ्यः स्यसनोः' 'लुटि च क्लृपः' इति विशेषशास्त्राभ्यां तन्निमित्तमाश्रित्यात्मनेपदस्य वैकल्पिकापवादनं भवति। तेन वत्स्यंति, वर्तिष्यते विवृत्सति, विवर्तिषते तथा कल्पिता, कल्पता, कल्पस्यति, चिक्लृप्सति प्रभृतिपदानि व्यवह्रियन्ते।

---

१. पा० सू० १।३।७८
२. पा० सू० १।३।८३
३. पा० सू० १।३।८४
४. पा० सू० १।३।८५
५. पा० सू० १।३।९१
६. पा० सू० १।३।९२
७. पा० सू० १।३।९३

तदेवमनुदात्तङित आत्मनेपदमिति सामान्यशास्त्रस्यापवादभूतानि विशेषशास्त्राणि व्याख्यातानि । परस्मैपदविधानन्तु आत्मनेपदनिमित्त-विरहिताद् धातोः कर्त्तरि भवति। तथा च सूत्रमस्ति 'शेषात्कर्त्तरि परस्मैपदमिति । उक्तादन्यः शेष इति शेषलक्षणात् पूर्वोक्तात्मनेपदनिमित्त-रहितधातव एवात्र शेषपदेन संगृह्यन्ते । अतस्तेभ्यो धातुभ्यः परस्मैपदं सामान्यतो विधीयते । एषाहि महर्षिपाणिनेः शैवी शैली शब्दानुशासने 'शेषेलोपः[१]' 'शेषेप्रथमः[२]' शेषाद्विभाषा[३] प्रभृतिषु बहुत्र दृश्यते । अनया शैल्या च विशेषशास्त्राणां परिचयः पूर्वं भवति । तदनु अवशिष्टानां लक्ष्या-णामनुशासनार्थं शैषी शैली स्वीक्रियते । तथा चात्रापि पूर्वमात्मनेपद-विधायकशास्त्राणि संगृह्य, तदनु 'शेषात्कर्तरि परस्मैपदम्' इति शास्त्रं पूर्वोक्तमाचार्येण । एतेनात्मनेपदनिमित्तहीनेभ्यो धातुभ्यः सामान्यतः परस्मैपदं विधीयते । अस्य परस्मैपदविधायकशास्त्रस्यापवादभूतानि विशेषशास्त्राणि बहूनि सन्ति, तेषां सर्वेषां वर्गीकरणञ्च सोदाहरण-मेवमिह क्रियते—

उत्सर्गशास्त्रम्	कार्यम्	उदाहरणानि
'शेषात्कर्त्तरि परस्मैपदम्'	परस्मैपदम्	भाति, वाति
'एतदपवादशास्त्राणि		
'नेर्विशः'[४]	आत्मनेपदम्	निविशते
'विपराभ्यां जेः'[५]	,,	विजयते, पराजयते
क्रीडोऽनुसंपरिभ्यश्च[६]	,,	अनुक्रीडते, संक्रीडते
समवप्रविभ्यः स्थः[७]	,,	संतिष्ठते, अवतिष्ठते
प्रकाशनस्थेयाख्ययोश्च[८]	,,	कृष्णाय तिष्ठते
उदोऽनूर्ध्वकर्मणि[९]	,,	गेहे उपतिष्ठते
उपान्मन्त्रकरणे[१०]	,,	आग्नेय्या आग्नीध्र-मुपतिष्ठते
अकर्मकाच्च[११]	,,	भोजनकाल उपतिष्ठते
उद्विभ्यां तपः[१२]	,,	उत्तपते, वितपते

१. पा० सू० ७।२।९०
२. पा० सू० १।४।१०८
३. पा० सू० ५।४।१५४
४. पा० सू० १।३।१७
५. पा० सू० १।३।१९
६. पा० सू० १।३।२१
७. पा० सू० १।३।२२
८. पा० सू० १।३।२३
९. पा० सू० १।३।२४
१०. पा० सू० १।३।२५
११. पा० सू० १।३।२६
१२. पा० सू० १।३।२७

आङोयमहनः[१]	,,	आयच्छते, आहते
समोगम्यच्छिभ्याम्[२]	,,	संगच्छते, समृच्छते
निसमुपविभ्यो ह्वः[३]	,,	निह्वयते, संह्वयते
स्पर्द्धायामाङः[४]	,,	मल्लोमल्लमाह्वयते
वृत्तिसर्गायतनेषु क्रमः,[५]	,,	ऋचि क्रमते बुद्धिः
उपपराभ्याम्[६]	,,	उपक्रमते, पराक्रमते
आङ् उद्गमने[७]	,,	आक्रमत आदित्यः
वेः पादविहरणे[८]	,,	साधुविक्रमते,
प्रोपाभ्यां समर्थाभ्याम्[९]	,,	प्रक्रमते भोक्तुम् उपक्रमते भोक्तुम्,
अनुपसर्गाद्वा[१०]	,,	क्रमते, क्रामति ।
अपह्नवे ज्ञः[११]	,,	शतमपजानीते
अकर्मकाच्च[१२]	,,	सर्पिषो जानीते
सम्प्रतिभ्यामनाध्याने[१३]	,,	शतं सञ्जानीते शतं परिजानीते,
भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रेषु वदः[१४]	,,	शास्त्रेवदते, कर्मकारानुपवदते,
	,,	समप्रवन्ते
व्यक्तवाचां समुच्चारणे[१५]	,,	सम्प्रवदन्ते ब्राह्मणाः
अनोरकर्मकात्[१६]	,,	अनुवदते कठः कलापस्य
विभाषा विप्रलापे[१७]	,,	विप्रवदन्ते साम्वत्सराः, विप्रवदन्ति संवत्सराः
अवाद्ग्रः[१८]	,,	अवगिरते

१. पा० सू० १।३।२८
२. पा० सू० १।३।२९
३. पा० सू० १।३।३०
४. पा० सू० १।३।३१
५. पा० सू० १।३।३८
६. पा० सू० १।३।३९
७. पा० सू० १।३।४०
८. पा० सू० १।३।४१
९. पा० सू० १।३।४२
१०. पा० सू० १।३।४३
११. पा० सू० १।३।४४
१२. पा० सू० १।३।४५
१३. पा० सू० १।३।४६
१४. पा० सू० १।३।४७
१५. पा० सू० १।३।४८
१६. पा० सू० १।३।४९
१७. पा० सू० १।३।५०
१८. पा० सू० १।३।५१

समः प्रतिज्ञाने'[१]	,,	संगिरते
उदश्चरः सकर्मकात्'[२]	,,	धर्ममुच्चरते
समस्तृतीयायुक्तात्'[३]	,,	अश्वेन सञ्चरते
दाणश्च साचेच्चतुर्थ्यर्थे'[४]	,,	दास्या सम्प्रयच्छते
उपाद्यमः स्वकरणे[५]	,,	भार्यामुपयच्छते
ज्ञाश्रुस्मृदृशां सनः[६]	,,	आत्मनेपदम् धर्मं जिज्ञासते
शदेः शितः[७]	,,	शीयते
पूर्ववत्सनः[८]	,,	एदिधिषते, आसिसिषते
समः क्ष्णुवः[९]	,,	संक्ष्णुते शस्त्रम्
भुजोऽनवने[१०]	,,	भुङ्क्ते, भुञ्जाते
,स्वरितञितःकर्त्रभिप्राये क्रियाफले[११]	,,	यजते, पचते
'अपाद्वदः[१२]	,,	धनकामोन्यायमपवदते
'णिचश्च[१३]	,,	कटं कारयते
'समुदाङ्भ्योयमोग्रन्थे[१४]	,,	व्रीहीन् संयच्छते, भारमुद्यच्छते

१. पा० सू० १।३।५२

२. पा० सू० १।३।५३

३. पा० सू० १।३।५४

४. पा० सू० १।३।५५

५. पा० सू० १।३।५६

६. पा० सू० १।३।५७—पुत्रमनुजिज्ञासति, प्रतिशुश्रूषति. आशुश्रूषति, इत्यत्र तु 'नानोर्ज्ञः' 'प्रत्याङ्भ्यांश्रुवः' इति सूत्राभ्यां 'ज्ञाश्रुस्मृदृशांसनः, इति सूत्रेण प्राप्तमात्मनेपदं निषेधरूपेणापवाद्यते ।

७. पा० सू० १।३।६०

८. पा० सू० १।३।६२

९. पा० सू० १।३।६५

१०. पा० सू० १।३।६६

११. पा० सू० १।३।७२—अस्य स्वरितञितः कर्त्रभिप्रायेक्रियाफले' इति शास्त्रस्यापवादभूतानि विशेषशास्त्राणि 'अनुपराभ्यां कृञः 'अभिप्रत्यतिभ्यः क्षिपः 'प्राद्वहः 'परेर्मृषः' इत्येतानि विद्यन्ते । एतदुदाहरणानि च यथाक्रमम् अनुकरोति, पराकरोति. अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति, प्रवहति, परिमृष्यति, प्रभृतीनि प्रस्तूयन्ते । एषु सर्वेषु 'कर्त्रभिप्रायेक्रियाफले'गम्यमाने सति पूर्वोक्तसूत्रेण प्राप्तमात्मनेपदमेभिः सूत्रैरपवाद्यते । तत्रापि अनुकरोति, पराकरोतीत्यत्र ञित्वादात्मनेपदं प्राप्तम्, अन्यत्र अभिक्षिपतीत्यारभ्य परिमृष्यतिपदं यावत् तु स्वरितेतमाश्रित्येति विवेकः ।

१२. पा० सू० १।३।७३

१३. पा० सू० १।३।७४

१४. पा० सू० १।३।७५

'अनुपसर्गाज्ज्ञः'[1] ,, गां जानीते,
'वा क्यषः'[2] ,, लोहितायति, लोहितायते

एषु 'णिचश्च' इति सूत्रेण कर्त्रभिप्रायक्रियाफलविवक्षायां परस्मैपदमपवाद्य णिजन्तादात्मनेपदं भवति सामान्यतः। तत्रैतस्यापि विशेषरूपेणापवादभूतानि त्रीणि सूत्राणि समुपलभ्यन्ते। तेषु प्रथमसूत्रमस्ति 'बुधयुधनशजनेङ् प्रद्रुस्रुभ्यो णेः, अनेन हि संगृहीतधातुभ्य· कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदमेव विधीयते। तेन बोधयति योधयति प्रभृतिपरस्मैपदपदानि सिध्यन्ति। 'निगरणचलनार्थेभ्यश्चेति, द्वितीयसूत्रेणापि भोजनार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यः कर्त्रभिप्रायक्रियाफले विवक्षिते परस्मैपदं विधीयते। तस्मान्निगारयति, भोजयति, चलयति, कम्पयती इत्यादौ परस्मैपदं साधु भवति। एवमेव आसयति, शाययति देवदत्तमित्यत्र कर्त्रभिप्रायक्रियाफलविवक्षायां प्राप्तमात्मनेपदमपवाद्य 'अणावकर्मकाच्चित्तवत् कर्तृकादि'ति सूत्रेण परस्मैपदं विधीयते।

तदेवं णिचश्चेति सामान्यशास्त्रस्य त्रीणि विशेषशास्त्राणि निर्दिष्टानि। एषु द्वितीयतृतीयसूत्रयोरपि निषेधरूपापवादशास्त्रं विद्यते— 'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः' इति। अनेन हि 'पाययते' इत्यत्र पिबतेर्निगरणार्थत्वाद्, दमयते, आमयते इत्यादौ दमिप्रभृतिभ्यश्चित्तवत्कर्तृकत्वाच्च प्राप्तं परस्मैपदं प्रतिषिध्यते।

इत्थमिह पूर्वमुत्सर्गशास्त्रं 'शेषात्कर्तरिपरस्मैपदमिति तदपवादभूतश्च णिचश्चेति विशेषशास्त्रम्, अस्याप्यपवादभूतानि ततोऽपि विशेषशास्त्राणि बुधयुधनशजनेति त्रीणि सन्ति। एषु त्रिषु निगरणचलनेत्यादिशास्त्रद्वयस्य निषेधरूपापवादभूतं 'न पादम्याङ्माङ्यसपरिमुहरुचिनृतिवदवसः' इति शास्त्रमित्यपवादप्रवाहो दृष्टः। इतोऽन्यत्र नु तत्सूत्रोदाहरणैरेव शेषात्कर्तरि परस्मैपदमित्युत्सर्गशास्त्रस्यापवादशास्त्राणामभिव्यक्तिः सुतरां सिद्धा।

तदित्थमात्मनेपदपरस्मैपदविधायकशाश्त्राणामुत्सर्गापवादरूपेण परिचयोऽपि जातः।

इति षष्ठो विमर्शः॥

-०-

१. पा० सू० १।३।७६ २. पा० सू० १।३।९०

सप्तमो विमर्शः

प्रातिपदिकविहितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि

धातुविहितकृत्तिङ्सम्बन्ध्युत्सर्गापवादशास्त्रविवेचनानन्तरं प्राप्तक्रमात् प्रातिपादिकविहितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि विमृश्यन्ते। तत्र तावत् 'ङ्याप्प्रातिपदिकात्[१]' इति सूत्राधिकारे 'स्वौजस्मौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्[२]' इति सामान्यशास्त्रेण स्वादयः एकविंशतिः प्रत्ययाः विधीयन्ते। ङ्याप्प्रातिपदिकादित्यस्याधिकारस्तु अष्टाध्याय्याश्चतुर्थाध्यायादारभ्य पञ्चमाध्यायपर्यन्तं प्रवर्त्तते। अस्मिन्नधिकारे ङीप् टाबादिप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वमुपलभ्यते, न तु स्वादिप्रत्ययानाम्। स्वादिप्रत्ययविधायकशास्त्रमेकमेवास्ति. अतः स्वादिप्रत्ययसम्बन्ध्यादेशेषूत्सर्गापवादत्वमुपलभ्यते। तत्र यद्यपि स्वादिप्रत्ययस्थानीयादेशविधायकशास्त्राणां सन्निवेशो वर्त्तेतेऽङ्गाधिकारे, 'पूर्वत्रासिद्धम्[३]' इति सूत्राधिकारे च, तथापि प्रातिपदिकविहितप्रत्ययादेश सम्बन्धात्तेषामुत्सर्गापवादत्वमिहैव प्रातिपदिकाधिकारे निरूपयिष्यते। ततः पूर्वं तु स्त्रीप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वं विमृश्यते।

स्त्र्यधिकारोक्तप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम्

प्रातिपदिकाधिकारान्तर्गत एव 'स्त्रियामिति[४]' सूत्राधिकारः। स च 'समर्थानां प्रथमाद्वा[५]' इति सूत्रं यावत् प्रवर्त्तते। अस्मिन्नधिकारे स्त्रीत्वद्योतकप्रत्ययविधायकशास्त्राणां सन्निवेशो जातः। तत्र 'अजाद्यतष्टाप्[६]' इत्युत्सर्गशास्त्रम् सर्वप्रथमं प्रवर्त्तते। अनेनाजादिगणपठितेभ्यः अकारान्ताच्च-प्रातिपदिकाट्टाप् प्रत्ययो विधीयते। तेन अजा, एडका, कोकिला, बालेत्यादावजादिगणत्वात्, खट्वा देवदत्ता प्रभृतिष्वदन्तत्वाच्च टाप् सिध्यति। अत्र 'अजा' इत्यादौ अजत्वजातिविशिष्टस्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्[७]' इति शास्त्रेण ङीप् प्राप्तः एवं बालेत्यत्र प्रथमवयोवाचिनः स्त्रीत्वद्योत्ये 'वयसि प्रथमे' इति शास्त्रेण च ङीप् प्राप्तः।[८] तदेत-

१. पा० सू० ४।१।१
२. पा० सू० ४।१।२
३. पा० सू० ८।२।१
४. पा० सू० ४।१।३
५. पा० सू० ४।१।८२
६. पा० सू० ४।१।४
७. पा० सू० ४।१।६३
८. पा० सू० ४।१।२०

दुभयमपवाद्य अजादिगणपठितत्वादनेन टाबेव जातः। अस्य अजाद्यतष्टाबिति सामान्यशास्त्रस्यापवादभूतानि विशेषशास्त्राणि बहूनि सन्ति। तेषां परिचयः सोदाहरणमिह प्रस्तूयते—

उत्सर्गशास्त्रम्	कार्यम्	उदाहरणानि
अजाद्यतष्टाप्	टाप्	अजा, बाला
एतदपवादशास्त्राणि		
न षट्स्वस्रादिभ्यः[1]	टापोनिषेधः	पञ्च, सप्त,
टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ् क्वरपः[2]	ङीप्	कुरुचरी, सौपर्णेयी
यञश्च[3]	,,	गार्गी, वात्सी
कौरव्यमण्डूकाभ्याञ्च[4]	ष्फः	कौरव्यायणी
द्विगो[5]	ङीप्	पञ्चपूली, दशपूली
दामहायनान्ताच्च[6]	,,	द्विहायनी, त्रिहायनी
केवलमामकभागधेयपापापरसमानार्थकृत्सुमङ्गभेषजाच्च[7]	,,	केवली ; मामकी,
वर्णादनुदात्तात्तोपधात्तो नः[8]	,,	एनी, एता, श्येनी, श्येती,
अन्यतो ङीष्[9]	,,	सारङ्गी, कल्माषीः नर्तकी, गौरी
षिद्गौरादिभ्यश्च"[10]	ङिप्	नर्तकी, गौरी
जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुकबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु"[11]	,,	जानपदी, कुण्डी
शोणात् प्राचाम्[12]	,,	शोणी, शोणा
पुंयोगादाख्यायाम्[13]	,,	गणकी, महामात्री

१. पा० सू० ४।१।१०
२. पा० सू० ४।१।१५
३. पा० सू० ४।१।१६
४. पा० सू० ४।१।१९
५. पा० सू० ४।१।२१
६. पा० सू० ५।१।२७
७. पा० सू० ४।१।३०
८. पा० सू० ४।१।३९
९. पा० सू० ४।१।४०
१०. पा० सू० ४।१।४१
११. पा० सू० ४।१।४२
१२. पा० सू० ४।१।४३
१३. पा० सू० ४।१।४८

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्य-यवयवनमातुलाचार्याणामानुक्[1]	,,	हिमानी, यवनानी
क्रीतात् करणपूर्वात्[2]	,,	वस्त्रक्रीती, वसनक्रीती
क्तादल्पाख्यायाम्[3]	,,	अभ्रलिप्ती: द्यौः
बहुव्रीहेश्चान्तोदात्तात्[4]	,,	उरुभिन्नी
स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्[5]	ङीष्	अतिकेशी, अतिकेशा
पापकर्णपुष्पफलमूल-बालोत्तरपदाच्च[6]	,,	ओदनपाकी शङ्कुर्णी
यङश्चाप्[7]	आप्	आम्बष्ठ्या कारीषगन्ध्येत्यादि ।

एषामजाद्यतष्टाबित्युत्सर्गशास्त्रस्यापवादशास्त्राणामपि कानिचिद्विशेषरूपाण्यपवादशास्त्राणि दृश्यन्ते। तद्यथा "टिड्ढाणञ् द्वयसज्दघ्नञ्मात्रच्तयप् ठक्ठञ्कञ्क्वरपः" इति शास्त्रस्याप्यपवादशास्त्रमस्ति "कौरव्यमाण्डूकाभ्यां चेति ।" अनेन मण्डूकशब्दाद् "ढक्चमण्डूकात्"[8] इति सूत्रेणाणि प्राप्तं ङीप् प्रत्ययमपवाद्य ष्फप्रत्ययो विधीयते । तत्र षित्वात् "षिद्गौरादिभ्यश्चेति"[9] सूत्रेण ङीषि सति माण्डूकायनीति रूपं सिध्यति । यद्यप्यत्र स्त्रीत्वं ष्फप्रत्ययस्य स्त्रियां विधानेनैवागम्यते, तथापि "ष्फ" इत्यत्र षित्वसामर्थ्याद् ङीष् भवति । तथाचोक्तं "गार्ग्यायणीति प्रयोगमभिलक्ष्य "प्राचां ष्फतद्धितः" इति सूत्रव्याख्याने भटटोजिदीक्षितेन "षित्वसामर्थ्यात् ष्फेणोक्तेऽपि स्त्रीत्वे षिद्गौरादिभ्यश्चेति" वक्ष्यमाणोङीष् इति । एतच्चेतः पूर्वं काशिकावृत्तावपि "प्रत्ययद्वयेनेह स्त्रीत्वं व्यज्यते इत्युक्तम् । अस्तु ! टाप् प्रत्ययमपवाद्याणत्वात् प्रवृत्तस्य ङीप्प्रत्ययस्याप्यत्र ष्फप्रत्ययेनापवादो भवतीति स्पष्टम् ।

एवं यञश्चेत्यपवादशास्त्रस्याप्यपवादशास्त्रद्वयं वर्त्तते "प्राचां ष्फः तद्धितः"[10] "आवट्याच्च"[11]इति। अत एव प्राचां मतें ष्फप्रत्यये सति ङीषि

---

१. पा० सू० ४।१।४६
२. पा० सू० ४।१।५०
३. पा० सू० ४।१।५१
४. पा० सू० ४।१।५२

५. पा० सू० ४।१।५२—उरुभिन्नौ-असंयुक्तौ यस्याः सेति विग्रहे अदन्तत्वात् प्राप्तं टाप्प्रत्ययमपवाद्य "बहुव्रीहेश्चान्तोदात्तादिति सूत्रेण ङीष् विधीयते । तत्र सुरा पीता ययेति विग्रहे तु "अश्वाङ्गपूर्वपदाद्वेति" शास्त्रेण टाप्प्रत्ययवैकल्पिकापवादो भवति । तेन सुरापीती, सुरापीतेत्युभयं रूपं सिध्यति ।

६. पा० सू० ४।१।११६
७. पा० सू० ४।१।४१
८. पा० सू० ४।१।१७
९. पा० सू० ४।१।७५

च गार्ग्याणी अन्येषां मते गार्गीति रूपद्वयं सिध्यति। अवट्या इत्यत्र तु यञन्तत्वात् प्राप्तं ङीप् प्रत्ययमपवाद्य चाप्प्रययो भवतीति भावः।

अपि च अजाद्यतष्टाबित्युत्सर्गशास्त्रस्य विशेषशास्त्रं द्विगोरित्युक्तम्। तेनादन्तत्वात् प्राप्तं टाप् प्रत्ययमपवाद्य पञ्चमूली, दशमूली, इत्यादौ ङीप्प्रत्ययो विधीयते। द्विगोरिति सूत्रं ह्यदन्तत्वात् प्राप्तमेव टाप् प्रत्ययमपवदति न त्वजादित्वात् प्राप्तमपि। अत एव 'त्रिफला" इत्यत्राजादिगणपाठात् टाबेव दृश्यते। तथा चोक्तं काशिकावृत्तौ "कथं त्रिफला? अजादिषु दृश्यते इति। अस्य द्विगोरिति विशेषशास्त्रस्यापि निषेधरूपापरादभूतानि विशेषशास्त्राणि "अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि"[1] "काण्डान्तात् क्षेत्रे"[2] "पुरुषात् प्रमाणेऽन्यतरस्याम्"[3] इति त्रीणि विद्यन्ते। एतत् फलञ्च पञ्चाश्वा, द्विविस्ता, द्वयाचिता, द्विकम्बल्या, द्विकाण्डाक्षेत्रभक्तिः, द्विपुरुषेत्यादावदन्तत्वाट् टाप् सिद्धिः।

किञ्च अजाद्यतष्टाबिति सामान्यशास्त्रस्यापवादशास्त्रमस्ति स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति। अस्यापवादशास्त्रस्यापि "न क्रोडादिबह्वचः"[2] "नखमुखात्संज्ञायाम्"[3] इति शास्त्रद्वयं निषेधरूपापवादत्वेनोपतिष्ठते। अतः कल्याणक्रोडा, सुजघना, शूर्पणखा, गौरमुखा प्रभृतिषु प्रतिप्रसवरूपसामान्यशास्त्रेण टाबेव भवति। तत्र "न क्रोडादि बह्वचः" इति निषेधशास्त्रस्याप्यपवादशास्त्रं वर्त्तते "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्चेति।"[4] अनेन हि तुङ्गनासिकी, तुङ्गनासिका, कुम्भोदरी; कुम्भोदरेत्यत्र बह्वच्लक्षण प्राप्तङीष्निषेधमपवाद्य पाक्षिको ङीष् विधीयते। अत्रैव पाक्षिको ङीष् विधिः "पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति न्यायान् "न क्रोडादिबह्वचः" इति शास्त्रमेवानन्तरत्वाद् बाधते, न तु "सहनञ्विद्यमानपूर्वाच्चेति"[5] तद्व्यवहितशास्त्रम्। अतः सनासिका, अनासिका, विद्यमाननासिकेत्यत्र ङीष् निषेधः सिद्धः, सहोष्ठा, अनोष्ठा, विद्यमानोष्ठा, इत्यत्रापि ङीष्निषेधः सिद्धः, यतोहि "मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्" इति न्यायेन "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्चेति" शास्त्रं "स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति शास्त्रमेव बाधते न तु "सहनञ्विद्यमानपूर्वाच्चेत्युत्तरशास्त्रम् तेन सहोष्ठेत्यादौ टाबेव भवतीति भावः। तदेवमजाद्यतष्टाबिति शास्त्रस्यापवादशास्त्राणामप्यपवादभूतानि शास्त्राणीह निश्चितानि।

१. पा० सू० ४।१।२२
२. पा० सू० ४।१।५६
३. पा० सू० ४।१।५८
४. पा० सू० ४।१।५५
५. पा० सू० ४।१।५७

ऋन्नेभ्योङीबितिशास्त्रस्यापवादशास्त्राणि

अजाद्यतष्टाबिति शास्त्रवद्'ऋन्नेभ्योङीप[1]' इति सायान्यशास्त्रस्याप्यपवादशास्त्राणि दृश्यन्ते । तत्र पचन्, सप्तन, नवन्, दशन्, शब्देभ्यः स्त्रीत्वविवक्षायां पञ्चब्राह्मण्यः इत्यादौ, स्वस्रादिशब्देभ्योऽपि स्वसा दुहितेत्यादौ ऋन्नेभ्यो ङीविति शास्त्रेण प्राप्तङीप् प्रत्ययस्य निषेधरूपापवादो भवति न 'षट्स्वस्रादिभ्यः[2]' इति शास्त्रेण । एवं सीमन् शब्दात् प्राप्तस्य नान्तत्वादङीपो निषेधो भवति सीमा, सीमानावित्यत्र 'मनः[3]' इति शास्त्रेण तथा बह्वो यज्वानो यस्याः सेत्यर्थे बहु यज्वन् शब्दात् प्राप्तनान्तलक्षणङीपः प्रतिषेधश्च 'अनोबहुव्रीहे[4]' इति शास्त्रेण क्रियते । तेन बहुयज्वानाविति रूपाणि । स्त्रीत्वविवक्षायामपि प्रचलति । अत्र 'मनः' अनो बहुव्रीहेरिति शास्त्रद्वयविहितङीपोनिषेधस्थले च' 'डाबुभाभ्यामन्यतरस्याम्'[5] इति शास्त्रेण वैकल्पिकटाब्विधीयते । तत्प्रतीतिश्च, सीमे, सीमानौ, बहुयज्वा, बहुयज्वानावित्यत्र भवति सुलभा । बह्वो राजानो यस्याः सेति विग्रहे प्राप्तनान्तलक्षणङीपः 'अनोबहुव्रीहेरिति शास्त्रेण प्रतिषेधस्थले तु 'अन उपधालोपिनोऽन्यतरस्याम्[6]' इति शास्त्रेण वैकल्पिकोङीप् विधीयते । तेन बहुराज्ञी, बहुराजेत्युभयमपि रूपं सिध्यति । कुण्डमिव ऊधो यस्याः सेत्यर्थे च 'ऊधसोऽनङ्[7]' इति सूत्रेणानङि कृते नान्तत्वात्प्राप्तस्य ङीपः 'अनोबहुव्रीहेरिति सूत्रेण निषेधेप्राप्ते 'बहुव्रीहेरूधसोङीप्[8]' इति विशेषशास्त्रेण ङीप् विधीयते । तेन कुण्डोध्नीति रूपं निष्पद्यते । 'अस्य बहुव्रीहेरुधसोङीबिति शास्त्रस्याप्यपवादशास्त्रमस्ति 'संख्याव्ययादेर्ङीप्[9]' इति । अतएव द्वे उधसी यस्याः अतिशयितमूधसो यस्याश्चेति विग्रहे ङीषमपवाद्यानेन ङीप् विधीयते । यद्यपि ङीषि ङीपि वा कृते द्व्यूध्नी, अत्यूध्नीत्यत्र न कश्चानाकारे भेदः, तथाप्युच्चारणे स्वरविशेषः प्रतीयत एव । यतोहि ङीषिसति 'आद्युदात्तश्च[10]' इति सामान्यशास्त्रेण प्रत्ययस्याद्युदात्तत्वं प्राप्नोति । ङीपि तु पित्वाद् 'अनुदात्तौ सुप्पितौ[11]' इति सूत्रेणानुदात्तस्वरः प्रवर्तत एव इति रहस्यम् ।

---

१. पा० सू० ४।१।५
२. पा० सू० ४।१।१०
३. पा० सू० ४।१।११
४. पा० सू० ४।१।१२
५. पा० सू० ४।१।१३
६. पा० सू० ४।१।२८
७. पा० सू० ५।४।१३१
८. पा० सू० ४।१।२५
९. पा० सू० ४।१।२६
१०. पा० सू० ३।१।३
११. पा० सू० ३।१।४

तदेवं ऋन्नेभ्योङीबिति सामान्यशास्त्रस्य निषेधरूपापवादशास्त्राणि विकल्परूपापवादशास्त्राणि च विवेचितानि ।

स्त्रीप्रत्ययसम्बन्ध्यादेशविधायकशास्त्रयोरुत्सर्गापवादत्वम्

स्त्र्यधिकारोक्तप्रत्ययविधायकशास्त्राणामुत्सर्गापवादविवेचनमनुत्सम्बन्ध्यादेशविधायकशास्त्राणामप्युत्सर्गापवादत्वं विमृश्यते । तत्र तावद् यज्ञाधिकाररूपसंयोगे पतिशब्दावयवस्येकारस्य न कारादेशो भवति पत्युर्नो यज्ञसंयोगे[१]' इति शास्त्रेण । तदनु नान्तत्वाद् ङीपि यञ् मानस्य पत्नी इति रूपं सिध्यति । एषनकारादेशश्च यज्ञसंयोगाभावेऽपि 'विभाषासपूर्वस्य[२]' इति शास्त्रेण भवति विकल्पः । तेन वृद्धपतिः, वृद्धपत्नी इति रूपद्वयं सिध्यति । अस्य वैकल्पिकनत्वविधायकस्याप्यपवादशास्त्रमस्ति 'नित्यं सपत्न्यादिषु[३]' इति । यतोहि यज्ञसंयोगाभावे विभाषासपूर्वस्येति सामान्यशास्त्रस्यावश्यप्राप्तौ नित्यं सपत्न्यादिष्वितिशास्त्रमारभ्यते अतस्तदप्राप्तियोग्येऽचारितार्थ्यमस्य स्पष्टमेव । तेन समानः पतिर्यस्याः सा सपत्नी, एकपत्नी, वीरपत्नी प्रभृतिषु नित्यमेव नत्वमिति तत्फलमवगतम् ।

एवं स्त्रीत्वमभिलक्ष्य 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः[४]' इति शास्त्रेणाकारस्य स्थाने इकारादेशो भवति । तेन सर्विका, कारिका इत्यादि पदानि सिध्यन्ति । अस्येकाररूपादेशविधायकशास्त्रस्य 'न यासयोः[५]' इति निषेधरूपापवादशास्त्रं विद्यते । अत एव यका, सका इत्यत्रेत्वं न श्रूयते । अस्येत्वस्य विकल्पापवादरूपेण तु 'उदीचामातः स्थाने यकपूर्वायाः[६]' भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि[७]' 'अभाषितपुंस्काच्च[८]' इति त्रीणि विशेषशास्त्राणि समुपलभ्यन्ते । एतत्फलञ्च यथाक्रमं 'आर्यका, आर्यिका, निर्भस्त्रका, निर्भस्त्रिका, अज्ञका, गङ्गिकेत्यादौ पाक्षिकेत्वविधेर्दर्शनमेवेति बोध्यम् ।

तदेवं स्त्रीत्वमभिलक्ष्य प्रवर्तमानस्य नकारेकारादेशविधायकशास्त्रद्वयस्यापवादशास्त्राण्यप्यत्र संगृहीतानि ।

सौपस्थानिकादेशैषूत्सर्गापवादत्वम्

प्रातिपदिकादेकविंशतिः स्वादिप्रत्ययाश्च स्वौजसमौडित्यादि-

---

१. पा० सू० ४।१।३३
२. पा० सू० ४।१।३४
३. पा० सू० ४।१।३५
४. पा० सू० ७।३।४४
५. पा० सू० ७।३।४५
६. पा० सू० ७।३।४६
७. पा० सू० ७।३।४७
८. पा० सू० ७।३।४८

शास्त्रद्वारैव विधीयन्ते, अतस्तत्रोत्सर्गापवादत्वस्य सम्भावना नास्ति, किन्तु स्वादिप्रत्ययसम्बन्ध्यादेशविधायकशास्त्रेषूत्सर्गापवादत्वमुपलभ्यत इति प्राक्प्रतिज्ञातमेवात्रविमृश्यते। तत्र तावत् 'स्वमोर्नपुंसकात्[१]' इति सामान्यशास्त्रेण स्वमोर्लुग्रूपादेशो भवति- दधिवर्त्तते, मधुलेढीत्यत्र, किन्तु ज्ञानं वनमित्यत्र 'अतोऽम[२]' इति शास्त्रेण लुग्रूपादेशमपवाद्य स्वमोरमादेशो विधीयते। न पुंसके सर्वत्र स्वमोर्लुकि तु अतोऽमित्यस्यानवकाशः स्यात्। 'अतोऽनवकाशोविधिरपवाद' इति न्यायेनादन्ताङ्गान्नपुंसकाद् विहितस्वमोरमादेशः स्यात्। ततोऽन्यत्र तु सामान्यतो लुग्भवेदित्युभयोः शास्त्रयोः सामान्यविशेषरूपेण सार्थक्यं संघटते। अत्र पुनः पर्यालोचने अतोऽमिति शास्त्रस्याप्यपवादशास्त्रम् 'अदड्डतरादिभ्यपञ्चभ्यः[३]' इत्युपलभ्यते अनेन हि कतराद्यदन्तशब्देभ्यः स्वमोरदडादेशो विधीयते। अदन्तत्वादतोऽमित्यस्यावश्यप्राप्तौ एतदारभ्यत इत्यपवादत्वमस्य सुतरां सिद्धम्। तत्र डतरादिपञ्च शब्देष्वितरशब्दस्यापि पाठो वर्त्तते। तेन इतरदिति प्रयुज्यते लोके, किन्तु 'इतरमितरमण्डमजायत' इति वैदिकप्रयोगे स्वमोरमादेश एव दृश्यते। अतः 'नेतराच्छन्दसि[४]' इति विशेषशास्त्रेणात्र स्वमोरदडादेशं प्रतिषेधति महर्षिपाणिनिः।

एवमग्रे 'अतोभिसऐस्[५]' इति शास्त्रेण भिसः स्थाने विधीयमानैसादेशः 'सुपि च[६]' इति सामान्यशास्त्रेण प्राप्तदीर्घमपवाद्य प्रवर्त्तते। तेन रामैः सर्वैः प्रभृत्यदन्तप्रातिपदिकेभ्योविहितभिसप्रत्ययस्य स्थाने ऐसादेशः सिध्यति। सति दीर्घेऽदन्तत्वाभावात् तन्न स्यादिति भाव। छन्दसि तु अदन्तप्रातिपदिकेभ्योऽपि क्वचिद् 'भद्रंकर्णेभिः' देवेभिः सर्वेभिः प्रोक्तमित्यत्रैसादेशो न दृश्यते। अतस्तत्र छन्दसि दृष्टानुविधित्वाद् 'बहुलं छन्दसि[७]' इति शास्त्रेण समाधीयते। अस्यातो भिस् ऐसिति शास्त्रस्यापवादशास्त्रं तु वर्त्तते 'नेदमदसोरकोरिति[२]' तेन एभिः, अमीभिरित्यत्र भिसः ऐसादेशो निषिध्यते। भिसः ऐसादेशप्रसङ्गे 'बहुवचने झल्येत्[८]' 'अतोभिस्ऐसिति[९]' शास्त्रयोरप्युत्सर्गापवादभावो मन्तव्यः। यतोह्यदन्तत्वमाश्रित्योभयोः शास्त्रयोः प्रवृत्तिर्भवति। तत्र यदि सामान्यतः एत्व भवेत्तदाऽदन्तत्वाभावाद् 'अतोभिस्-

---

१. पा० सू० ७।१।२३
२. पा० सू० ७।१।२४
३. पा० सू० ७।१।२५
४. पा० सू० ७।१।२६
५. पा० सू० ७।१।९
६. पा० सू० ७।१।१०२
७. पा० सू० ७।१।१०
८. पा० सू० ७।३।१०३
९. पा० सू० ७।३।१०४

ऐसिति शास्त्रस्य प्रवृति र्न स्यादिति भावः। अत्र आचार्यकात्यायनेन तु एत्वे जातेऽपि साम्प्रतिका भावे भूतपूर्वगतिरिति न्यायेन भूतपूर्वादन्तत्वमाश्रित्य अतोभिस ऐसिति शास्त्रेण बहुवचने झल्येदित्यस्य नित्यत्वाद् बाधः स्वीकृतः। तथा च श्लोकवार्तिकमस्ति—

'एत्वं भिसिपरत्वाच्चेदत ऐस् क्व भविष्यति,
कृते एत्वें भौतपूर्व्यादैस्तु नित्यः. तथा सति[४]॥

एतावता यत्र भूतपूर्व गत्याश्रयणं भवति तत्र नित्यत्वादेव बाधो नत्वपवादत्वादिति वार्तिककारमतं सिध्यति। भूतपूर्वगत्याश्रयणाभावे मुख्यशब्दार्थाश्रयणे तु अनवकाशत्वादेवात्र बाधः इति सिद्धान्तः। तथा च नागेशभट्टेन वार्त्तिकस्थतथासतीति प्रतीकमादाय—तथासतीत्येनानवकाशत्वमेव दृढं कृतम्। कृते चारितार्थ्यमङ्गीकृत्य परत्वादेत्वमित्यङ्गीकारे इति हि तदर्थः। अङ्गीकार इत्यनेनाऽनवकाशत्वं सूचितमिति प्रदीपोद्योते व्याख्यातम्। तस्मदत्र सुपि चेति शास्त्रमिव बहुवचने झल्येदिति शास्त्रमपवाद्य 'अतोभिसऐस्' इति शास्त्रं प्रवर्त्ततेति निश्चयः। अस्तु।

तदनु 'ङेर्यः[१]' सामान्यशास्त्रस्यापवादशास्त्रमस्ति 'सर्वनाम्नः स्मै[२]' इति। अत एव सर्वाद्यदन्तसर्वनामसंज्ञकशब्देभ्यः परस्य ङेप्रत्ययस्य स्मा आदेशो निष्पद्यते। ततश्च सर्वस्मै, विश्वस्मै, इत्यादावदन्तसर्वनामसंज्ञकशब्देभ्यो विहितङेप्रत्ययस्थाने स्मा आदेश एव भवति न तु यादेश इति फलति।

एवमग्रे ङसि प्रत्ययस्य स्थाने जायमानादेशेऽप्युत्सर्गापवादो दृश्यते। तद्यथा अदन्ताद्विहितस्वादिप्रत्ययेषु टाङसिङसामपि इन, आत्, स्य इत्यादेशाः यथाक्रमं भवन्ति। तथा च सूत्रमस्ति 'टाङसिङसामिनात्स्याः[३]' इति। तेन रामेण, रामात् रामस्येति सिध्यति। तत्र सर्वादिगणपठितादन्तप्रातिपदिकेभ्योजायमानस्य ङसि प्रत्ययस्य स्थाने तु आद्रूपादेशमपवाद्य ङसिङ्योः स्मात्स्मिनौ[४]' इति विशेषशास्त्रेण ङसेः स्मादादेशो भवति। तेन सर्वस्मादितिरूपं भवति साधु, न तु सर्वादिति। एवमदन्तप्रातिपदिकविषयकसौपस्थानिकादेशानामुत्सर्गापवादत्वं निरूपितम्।

---

१. पा० सु० ७।१।१३
१. पा० सू० ७।१।१४
३. पा० सू० ७।१।१२
४. पा० सू० ७।१।१५ पूर्वस्मात् पूर्वादित्यादौ तु 'पूर्वादिभ्योनवभ्यो वेति शास्त्रेण विकल्पापवादो भवति।

तदनु हलन्त प्रातिपदिकेभ्यो विधीयमानसौपस्थानिकादेशेषु तावद् 'ङे प्रथमयोरम्[१]' इति शास्त्रेण युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमा द्वितीया विभक्त्योश्चामादेशो भवति। तत्र प्रथमाविभक्त्येकवचने सु-प्रत्ययस्य स्थाने जायमानोऽमादेशः 'हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्[२]' इति सूत्रेण हलन्तपरत्वात् प्राप्तं सुलोपमपवाद्य प्रवर्त्तते। तेन त्वम, अहमिति च निष्पद्यते। अस्यामादेशस्यापि 'शसो नः[३]' इति विशेषशास्त्रेण बाधो भवति। अत एव युष्मद् अस्' अस्मद् अस्' इत्यवस्थायां 'द्वितीयायाञ्चेति[४]' सूत्रेण दकारस्यात्वेकृते अनेन 'शसो' न इति शास्त्रेण शस्घटकाकारस्य नकारादेशे जाते 'संयोगान्तस्य लोपः[५]' इति सूत्रेण सकारस्य लोपे सति युस्मान्, अस्मानिति निष्पद्यते।

अत्र सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयताम् तक्रं कौडिन्यायेति न्यायमनुसृत्य वासुदेवदीक्षितमहोदयेन स्वबालमनोरमायामेवं व्याख्यातम् 'यद्यपि शसः अमि कृतेऽपि अकारस्य नकारे मकारस्य संयोगान्तलोपे युष्मान्, अस्मानिति सिध्यति, तथापि सत्यपि सम्भवे बाधनं भवति इति न्यायान्नत्वस्य अमपवा-दत्वमाश्रितमिति[६]'। एतावतापि 'शसो' न इति शास्त्रेण 'ङे प्रथमयोरमिति' शास्त्रमपवाद्यत प्रति सिद्धमेव। एवं 'भ्यसोभ्यमिति[७]' शास्त्रस्यापवादशास्त्रं विद्यते 'पञ्चम्या अदिति[८]'। तथाहि युष्मदस्मच्छब्दाभ्यां परस्य भ्यसो-भ्यमित्यादेशेनोभयोरपि चतुर्थीपञ्चमीविभक्त्योर्भ्यसः स्थाने सामान्यतो भ्यमादेशे प्राप्ते 'पञ्चम्या अत्, इति विशेषशास्त्रमारभ्यते। तस्मात् पञ्चमी विभक्तिसम्बन्धिभ्यसः स्थाने भ्यमादेशमपवाद्य अत् भवति। तेन तत्र युष्मद् अस्मद् इति रूपं निष्पद्यते। एवं पञ्चम्याः भ्यसः 'अत्' चतुर्थ्या-श्च भ्यसोभ्यमित्युत्सर्गापवादनिर्णयो जातः।

प्रातिपदिकस्थानीयादेशेषूत्सर्गापवादत्वम्

प्रातिपदिकाद्विहितस्वादिप्रत्ययस्थानीयादेशसम्बन्धिशास्त्राणामुत्स र्गापवादनिरूपणानन्तरं प्रसङ्गतः प्रातिपदिकस्थानीयादेशविधायकशास्त्राणा-मप्युत्सर्गापवादत्वमिह चिन्त्यते। तत्राजन्तपातिदिकस्थानीयादेशेषु प्रध्यौ,

१. पा० सू० ७।१।२८
२. पा० सू० ६।१।६८
३. पा० सू० ७।१।२९
४. पा० सू० ७।२।८७
५. पा० सू० ८।१।२३
६. सिद्धान्तकौमुद्याः हलन्तप्रकरणे।
७. पा० सू० ७।१।३०
८. पा० सू० ७।१।३१

प्रध्यः इत्यत्र 'अचिश्नुधातुभ्रुवांय्वोरियङुवङौ[१]' इत्युत्सर्गशास्त्रमपवाद्य यण्विधायकविशेषशास्त्रं प्रवर्त्तते 'एरनेकाचोऽसंयोगपूर्वस्येति[२]'। एवं खल्प्वौ खल्प्वः इत्यत्र 'ओः सुपि[३]' इति शास्त्रेणेयङोऽपवादो दृश्यते। एनयोः 'एरनेकाचोऽसंयोगपूर्वस्य' 'ओःसुपि' इति शास्त्रयोर्निषेधरूपापवादस्तु 'न भूसुधियो[४]' इति शास्त्रेण क्रियते। तेन सुधियौ, सुधियः, प्रतिभुवौ, प्रतिभुवः इत्यत्र प्रतिप्रसवरूपेण इयङुवङौ भवतः। वर्षाभ्वौ, वर्षाभ्वः' इत्यत्र तु न भूसुधियोः इति निषेधशास्त्रस्याप्यपवादो भवति 'वर्षाभ्वश्चेति[५]' विशेषशास्त्रेण। तस्मादत्रोकारस्थाने यणादेशो दृश्यते न तूवङिति दिक्।

एवं स्त्रियौ, स्त्रियः इत्यत्र इको यणचीति सामान्यशास्त्रेण प्राप्तयणादेशमवाद्य 'स्त्रियाः[६]' इति विशेषशास्त्रेणेयङादेशो विधीयते। अमि शसि स्त्रियम् पश्य, स्त्रियः पश्य, इत्यत्र तु 'अमिपूर्वः[७]' 'प्रथमयोः पूर्वसवर्णः[८]' इति शास्त्रद्वयेन क्रमात् प्राप्तस्य पूर्वरूपस्य पूर्वसवर्णदीर्घस्य च वैकल्पिकापवादो 'वाऽम्शसोरिति[९]' विशेषशास्त्रेण भवति। अतः स्त्रीम् पश्य, स्त्रीः पश्व इतिवाक्यमपि सिद्धम्। एवम् अस्थना, दध्ना, प्रभृतिष्वपि 'इको यणचि' इति शास्त्रेण प्राप्तयणादेशमपवाद्य 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्त[१०]' इति विशेषशास्त्रेणानङादेशो विधीयते।

एवमेव हरिणा, भानुना, इत्यत्रापि हरि आ, भानु आ इत्यवस्थायामिको यणचीति शास्त्रस्यावश्यप्राप्तौ 'आङोनाऽस्त्रियाम्[११]' इति विशेषशास्त्रारम्भान्नादेशेन तदपवादो भवति। एवं रमया, रमयोरित्यत्र रमा टा, रमा ओस् इत्यवस्थायां क्रमशः 'अकः सवर्णे दीर्घः' वृद्धिरेचीति सामान्यशास्त्रद्वयस्यावश्यप्राप्तौ 'आङि चापः' इति विशेषशास्त्रमारभ्यते। अतोऽनेन तदपवाद्य आकारस्यैकारादेशे रूपद्वयमेतत् सिध्यति। गामित्यत्र तु गोशब्दादमिविभक्तौ 'गोतोणित्[१२]'इति सूत्रेण णिद्वद्भावे सति 'अचोञ्णिति[१३]'इति सामान्यशास्त्रेण प्राप्तां वृद्धिमपवाद्य 'औतोऽम्शसोः[१४]' इति विशेषशास्त्रेण ओकारादम्शसोरचिपरे आकार एकादेशो विधीयते। एवं प्रियतिस्रः,

१. पा० सू० ६।४।७७
२. पा० सू० ६।४।८२
३. पा० सू० ६।४।८३
४. पा० सू० ६।४।८५
५. पा० सू० ६।४।८४
६. पा० सू० ६।४।७९
७. पा० सू० ६।१।१०७
८. पा० सू० ६।१।१०२
९. पा० सू० ६।४।८०
१०. पा० सू० ७।१।७५
११. पा० सू० ७।३।१२०
१२. पा० सू० ७।१।९०
१३. पा० सू० ७।२।११५
१४. पा० सू० ६।१।९३

प्रियचतस्रः इत्यत्र प्रियतिसृ, प्रियचतसृ, शब्दाद्ङसि विभक्तौ 'ऋत-उत्[1]' इति सामान्यशास्त्रेण उदादेशः प्राप्नोति, तमपवाद्य 'अचिरऋतः[2]' इति विशेषशास्त्रेण ऋतः स्थाने रेफादेशो जायते इत्यजन्तप्रातिपदिक-स्थानीयादेशविषयकोत्सर्गापवादनिर्णयोऽवगतः।

हलन्तप्रातिपदिकस्थानीयादेशेषु तावल्लिट्लिड्भ्यामित्यादौ 'होढः' इति सामान्यशास्त्रेण हस्य ढो भवति, किन्तु धुक्, धुग्भ्यामित्यादौ दुहप्रातिपदिकात् सौ भ्यामि च प्रत्यये हस्य ढादेशमपवाद्य 'दादेर्धातोर्घ[3]' इति विशेषशास्त्रेण घादेशो विधीयते। ध्रुक् ध्रुडित्यत्र तु 'दादेर्धातोर्घः' इत्यपवादशास्त्रस्यापि 'वाद्रुहमुहष्णुहष्णिहाम[4]' इति ततोऽपि विशेष-शास्त्रेण भवति बाधः, अन्यत्र मुक्मुडित्यादौ च 'होढः[5]' इति सामान्यशास्त्र-स्यैवानेन वैकल्पिकोबाध इति विवेकः। एवमुपानत् इत्यत्रापि उपानह्, सु इत्यवस्थायां 'होढः' इति शास्त्रस्यावश्यप्राप्तौ 'नहो ध[6]' इति विशेषशास्त्रेण तद्बाधो दृश्यते।

त्यदादिगणपठितेषु प्रातिपदिकशब्देषु च 'त्यदादीनामः[7]' इति सामान्यशास्त्रं प्रवर्त्तते। तेनान्तस्याकारादेशे सति स्यः, सः, यः, एषः, एतौ एते प्रभृतिपदानि सिध्यन्ति। अस्य त्यदादीनामः' इति शास्त्रस्यापवाद-भूतानि—

'इदमो मः[8]'	अयम्
'अदस औ सुलोपश्च[9]'	असौ
प्रथमायाश्च द्विवचने भाषायाम्[10]'	युवाम्, आवाम्
'द्वितीयायाञ्च[11]'	त्वाम्, माम्,
'योऽचि[12]'	त्वया, मया,
'शेषे लोपः[13]'	त्वम्, अहम्
'किमः कः[14]'	कः कौ, के

१. पा० सू० ६।१।१११
२. पा० सू० ७।२।१००
३. पा० सू० ८।२।३२
४. पा० सू० ८।२।३३
५. पा० सू० ८।२।३१
६. पा० सू० ८।२।३४
७. पा० सू० ७।२।१०२
८. पा० सू० ७।२।१०८
९. पा० सू० ७।२।१०७
१०. पा० सू० ७।२।८८
११. पा० सू० ७।२।८७
१२. पा० सू० ७।२।८९
१३. पा० सू० ७।२।९०
१४. पा० सू० ७।२।१०३

इत्येतानि विशेषशास्त्राणि दरीदृश्यन्ते। एषामुदाहरणपदैश्च स्पष्टमवगम्यते यद् एतद् विषयातिरिक्तस्थलेष्वेव "त्यदादीनामः" इति सामान्यशास्त्रस्य प्रवृत्ति र्भवति। अत एव सिद्धान्तकौमुद्यां "त्यदादीनामः" इत्यत्र द्विपर्यन्तानामेवेष्टिः" इत्यस्य प्रयोजनजिज्ञासायां भवान् भवन्तौ, भवन्तः इत्युदाहृतम्, न तु युवाम् आवामित्यादि। तथाचात्र द्विपर्यन्तानां किमिति प्रतीकमादाय श्रीज्ञानेन्द्रसरस्वतीमहाभागैः स्वतत्त्वबोधिन्यां युष्मदस्मच्छब्दयोरिष्ट्यभावेऽपि दोषो नास्ति, आत्वयत्वलोपै र्विशेषविहितैरत्वस्य बाधनात्। तथा किं शब्देऽपि न दोषः किमः कादेशस्य विशिष्य विधानादिति प्रश्नाशयो व्याख्यातः। यद्यत्र द्विपर्यन्तानामेवेष्टिरिति न स्यात्तदा भवत् सु इति स्थिते तकारस्याप्यत्वे कृते "अतो गुणे" इतिपररूपे "उगिदचां सर्वनामस्थानेऽधातोः" इत्यनेन नुमि "सर्वनामस्थाने चाऽसंबुद्धौ" इत्यनेन च दीर्घे सुलोपे न लोपे च भवा इत्यनिष्टं रूपं प्रसज्येत। एतावता युष्मदादिविषये "त्यदादीनामः" इति सामान्यशास्त्रस्यात्वयत्वविधायकविशेषशास्त्रैरपि निरोधो भवितुमर्हतीति शक्यते वक्तुम्।

इदम् शब्दस्य स्त्रीलिङ्गे तु सु विभक्तौ इयम् इत्यत्र इदम् सु इत्यवस्थायाम् "इदमो दस्य मः स्याद्विभक्तावित्यर्थकेन "दश्च[1]" इति शास्त्रेण प्राप्तं दकारस्य मकारादेशमपवाद्य 'यः सौ[2]' इति विशेषशास्त्रेणेदमो दकारस्य यकारादेशो विधीयते। अस्य यकारादेशविधायकस्य यः साविति विशेषशास्त्रस्यापि 'इदोऽयपुंसि[3]' इति विशेषशास्त्रेण भवति बाधः। अतः इदम् शब्दस्य स्त्रीलिङ्गे सौ इयम्, पुलिङ्गे चायमिति रूपभेदः सिद्धः।

एवं युष्मद् अस्मद्रूपप्रातिपदिकविषयेऽपि यत्र "युष्मदस्मदोः षष्ठीचतुर्थी द्वितीयास्थयोर्वान्नावौ[4]' इति शास्त्रेण युष्मदस्मदोः वाम् नौ आदेशौ सामान्यतो विहितौ। तत्र 'बहुवचनस्य वस्नसौ[5]' 'तेमयावेकवचनस्य[6]' इति विशेषशास्त्राभ्यां तदपवादोऽपि दृश्यते। तथा चोक्तविभक्तीनां बहुवचने वस्नसावादेशौ, एकवचने च परित्यज्य द्वितीयां विभक्तिं ते, मे,

---

१. पा० सू० ७।३।१०९
२. पा० सू० ७।३।११०
३. पा० सू० ७।३।१११
४. पा० सू० ८।१।२०
५. पा० सू० ८।।२१
६. पा० सू० ८।१।११

इत्येतावादेशौ भवतः। द्वितीयाविभक्त्येकवचने तु 'त्वामौ द्वितीयायाः[१]' इति विशेषशास्त्रेण 'तेमयावेकवचनस्येति शास्त्रस्याप्यपवादो जातः।

तदेवं प्रातिपदिकस्थानीयादेशविषयकशास्त्राणामुत्सर्गावादपद्धतिः सुलभा।

"सुबन्ताद्विहिततद्धितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि"

पूर्वमिह पञ्चमविमर्शे प्रत्ययसम्बन्धिप्रकृतयोधातुप्रातियदिकसुबन्तभेदेन त्रिधा कथिताः। तत्र धातुप्रातिपदिकाभ्यां विहितप्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादत्वमुपपादितम्। इदानीं सुबन्ताद्विहिततद्धितप्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादत्वं विमृश्यते। तत्र तावत्तद्धितप्रत्ययाः प्रायः समर्थानां प्रथमाद्वे[२]त्यधिकारसूत्रमाधारीकृत्य प्रवर्तन्ते। अस्याधिकारश्च "प्राग्दिशोविभक्तिः[३]" इति सूत्रात् प्रागेव स्वीक्रियते। यतोहि प्राग्दिशोविभक्तिरिति सूत्रादारभ्य विधीयमानतद्धितप्रत्यया स्वार्थिका एव दृश्यन्ते। स्वार्थिकेषु प्रत्ययेषु च समर्थानां प्रथमाद्वा" इत्याधिकास्य प्रयोजनं न संघटते। यतः समर्थानां प्रथमाद्वेत्यत्र सामर्थ्यं परिनिष्ठितत्वमर्थात् कृतसन्धिकार्यत्वमिति भट्टोजिदीक्षितैर्व्याख्यातम्। तेन सोत्थितिरित्यत्र शोभनः उत्थितः सूत्थितः सूत्थितस्यापत्यं सौत्थितिरित्यत्र पूर्वं प्रादिसमासे सवर्णदीर्घरूपसन्धिकार्ये च जाते तद्धितप्रत्ययोत्पत्तिर्भवति यद्यत्रैवं भूतं सामर्थ्यं न स्वीक्रियेत तदा सु उत्थितस्यापत्यमित्यवस्थायामेव तद्धितोत्पत्तौ साबुत्थितिरित्यापतेत्। एतावता सुबन्तात्तद्धितोत्पत्तिरपि निश्चीयते। तथा च भाष्ये "किं पुनः समर्थम्? अर्थाभिधाने यत् समर्थम्। किं पुनरस्तत्। कृतवर्णानुपूर्वीकं पदम्। सौत्थितिः वक्ष्यमाणिरित्युक्तम्। अस्य प्रदीपोद्योते च "अर्थाभिधाने यत् समर्थमिति अर्थबोधने यच्छक्तमित्यर्थः, कृतवर्णानुपूर्वीकं पदमिति। अनेनार्थबोधनसामर्थ्यं विशिष्टपदे एव न तु सत्यपि शास्त्रात् प्रकृतिप्रत्ययशक्तिज्ञाने

---

१. पा० सू० ८।१।२३ युष्मदस्मदोस्त्वामाद्यादेशानामुदाहरणानि च:—

श्रीशस्त्वावतु मापीह दत्ता ते मेऽपि शर्म सः।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः॥१॥
सुखं वा नौ ददात्वीशः पतिर्वामापि नौ हरिः।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः॥१॥

इत्याभ्यां श्लोकाभ्यां भट्टोजिदीक्षितैः साधु संगृहीतानि।

२. पा० सू० ४।१।८२

३. पा० सू० ५।३।१

तस्य लोकेबोधकत्वमिति, एवञ्च वर्णस्फोटः शास्त्रव्यवहारमात्रोपयोगीति सूचितम्, तथा च समर्थपदेनापि सुबन्तादुत्पत्तिः सूचितेति नागेशभट्टेनापि समर्थितम्[१]। किञ्च "घकालतनेषु कालनाम्नः[२]" इति शास्त्रेण पूर्वाह्णतरे, पूर्वाह्णतमे, इत्यत्र सप्तम्याः अलुग्विधानमपि सुबन्तात्तद्धितोत्पत्ति प्रमाणयति। अतः येषां तद्धितप्रत्ययानां सुबन्तप्रातिपदिकपदैः सहः सम्बन्धः सिद्धः, तत्रैव समर्थानां प्रथमाद्वेत्यधिकारो ज्ञेयः।[३] स्वार्थिकतद्धितप्रत्ययाः केवलप्रातिपादिकादेव विधीयन्ते। यतः ङ्याप्प्रातिपतिकादिति सूत्रस्याधिकार अष्टाध्याय्याश्चतुर्थाध्यायादारभ्य पञ्चमाध्यायं यावत् प्रवर्त्तते। तत्रैव च निखिलतद्धितप्रत्ययानां समावेशः सञ्जातः।

अपत्यार्थकप्रत्ययेषूत्सर्गापवादत्वम्

तत्र तावत् सामान्यतोऽण् प्रत्ययस्याधिकारः अष्टाध्याय्याश्चतुर्थाध्यायस्थप्रथमपादस्य त्र्यशीतितमसूत्रादारभ्य (४।१।८३) चतुर्थाध्यायस्य तृतीयपादं यावत् प्रवर्त्तते। तथा च सूत्रमस्ति प्राग्दीव्यतोऽण् इति। अर्थादित आरभ्य "तेन दीव्यति खनति जयति जितम्[३]" इति सूत्रं यावदण् प्रत्ययोऽधिक्रियते। अतोऽस्याण् प्रत्ययाधिकारान्तर्भूताः ये किल तत्तद्विशेषप्रवृत्तिनिमित्तमादाय इञादिप्रत्यया विहिताः, ते खलु अण् प्रत्ययमपवाद्य जाता इति सुतरां सिध्यति। यथा उपगोरपत्यमौपगवः इत्यत्र "तस्यापत्यम्[४]" इति समान्यशास्त्रेणाण् प्रत्ययो भवति' किन्तु दक्षस्यापत्यम् दाक्षिरित्यत्र "अत इञ्" इति तद्विशेषशास्त्रेणाण् प्रत्ययमपवाद्य इञ्विधीयते। अस्य अत इञ्" इति विशेषशास्त्रस्यापि विशेषभूतानि शास्त्राणि सन्ति बहूनि, तद्विवेचनमिहाग्रे करिष्यते। पूर्वं तावत् सर्वतः सामान्यभूतस्य तस्यापत्यमिति शास्त्रस्यापवादशास्त्राणां परिचयः सोदाहरणं प्रस्तूयते—

उत्सर्गशास्त्रम्	कार्यम्	उदाहरणानि
तस्यापत्यम्	अण्	औपगवः
एतदपवादशास्त्राणि		
'अत इञ्[५]"	इञ्	दाक्षिः

---

१. ५।३।१ महाभाष्ये
२. पा० सू० ६।३।१७
३. पा० सू० ४।४।२
४. पा० सू० ४।१।९२
५. पा० सू० ४।१।९५

अपवाद शास्त्राणि	कार्यम्	उदाहरणानि
दित्यदित्यादित्यप्रच्युत्तरपदाण्यः[1]	ण्य	दैत्यः, आदित्यः, प्राजापत्यः
बाह्वादिभ्यश्च[2]	इञ्	बाह्विः
सुधातुरकङ्च[3]	,,	सौधातकिः
मधुबभ्र्वोर्ब्राह्मणकौशिकयोः[4]	यञ्	माधव्यः
स्त्रीभ्यो ढक्[5]	ढक्	वैनतेयः
इतश्चानिञः[6]	,,	दौलेयः, नैधेयः
भ्रुवोवुक्च[7]	,,	भ्रौवेयः
कल्याण्यादीनामिनङ्[8]	,,	काल्याणिनेयः बान्धकिनेयः
कुलटाया वा[9]	,,	कौलटिनेयः, कौलटेयः
पितृष्वसुश्छण्[10]	छण्	पैतृष्वस्रीयः
मातृष्वसुश्च[11]	,,	मातृष्वस्रीयः
चतुष्पादभ्यो ढञ्[12]	म्	कामण्डलेयः
गृष्टयादिभ्यश्च[13]	,,	गार्ष्टेयः
स्वसुश्छः[14]	छः	स्वस्त्रीयः
भ्रातुर्व्यच्च[15]	व्यत्	भ्रातृव्यः
कुर्वादिभ्योण्यः[16]	ण्यः	कौरव्या ब्राह्मणाः
जनपदशब्दात्क्षत्रियादञ्[17]	अञ्	ऐक्ष्वाकः
कुरुनादिभ्यो ण्यः[18]	ण्यः	कौरव्यः

१. पा० सू० ४।१।८५ आदित्यस्यापत्यमित्यत्र तु "अत इञ्" इति शास्त्रमपवाद्यानेन ण्य प्रत्ययो भवति । अस्य ण्यप्रत्ययविधाकस्य शास्त्रस्यापि पत्युत्तरपदे अण् प्रत्ययविधायकेन अश्वपत्यादिभ्यश्चेति ततोऽपि विशेषशास्त्रेण बाधो भवति । तेन आश्वपतमिति सिध्यति ।

२. पा० सू० ४।१।९६
३. पा० सू० ४।१।९७
४. पा० सू० ४।१।१०६
५. पा० सू० ४।१।१२०
६. पा० सू० ४।१।१२२
७. पा० सू० ४।१।१२५
८. पा० सू० ४।१।१२६
९. पा० सू० ४।१।१२७
१०. पा० सू० ४।१।१३२
११. पा० सू० ४।१।१३४
१२. पा० सू० ४।१।१३५
१३. पा० सू० ४।१।१३६
१४. पा० सू० ४।१।१४३
१५. पा० सू० ४।१।१४४
१६. पा० सू० ४।१।१५१
१७. पा० सू० ४।१।१६८
१८. पा० सू० ४।१।१७२

एषु तस्यापत्यमिति सामान्यशास्त्रस्यापवादभूतेषु स्त्रीभ्योढगिति विशेषशास्त्रस्यापि विशेषशास्त्राणि—

'अवृद्धाभ्योनदीमानुषीभ्यस्तन्नामिकाभ्यः[१]'	अण्	यामुनः, नार्मदः, चैन्तितः,
कन्यायाः कनीन च[२]'	अण्	कानीनः
चटकाया ऐरग्[३]'	ऐरक्	चाटकैरः
गोधाया ढ्रक्[४]'	ढ्रक्	गौधेरः
क्षुद्राभ्यो वा[५]'	ढ्रक्	काणेरः, काणेयः दासेरः, दासेयः
रेवत्यादिभ्यष्ठक्[६]'	ठक्	रैवतिकः

इत्येतानि सोदाहरणानि षट् सन्ति। एतद्विषये सामान्यतः स्त्रीप्रत्ययान्तत्वात् स्त्रीभ्यो ढगिति शास्त्रस्यावश्यप्राप्तावेषां विशेष-शास्त्राणामारम्भो जातः। अतस्तदपवादभूतान्येतानीतिमतम्। तत्रापि स्त्रीभ्योऽपत्यार्थे विहितढक्प्रत्ययमपवाद्य यमुनायाः अपत्यम् यामुनः, नर्मदायाः अपत्यम् नार्मदः इत्यत्र प्रवर्त्तमानस्य अण्प्रत्ययविधायकस्य 'अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्य' इति शास्त्रस्य 'द्व्यचः[७]' इति विशेषशास्त्रेण बाधो भवति। तेन द्व्यचः स्त्रीप्रत्ययान्ताद् अपत्येऽर्थे–दत्तायाः अपत्यम् दात्तेयः, गोपायाः अपत्यम् गौपेयः इत्यादौ ढगेव दृश्यते न त्वणिति भाव :

एवं तस्यापत्यमिति सामान्यशास्त्रापेक्षया 'जनपदशब्दात्क्षत्रियादञ्' इति विशेषशास्त्रस्याप्यपवादभूतानि चत्वारि विशेषशास्त्राणि विद्यन्ते। तद्यथा—

'द्वञ्मगधकलिङ्गसूरमासादण्[८]'	अण्	आङ्गः, मागधः, कालिङ्गः, सौरमसः
वृद्धेत्कोसलाजादाञ्ञ्यङ्'	ञ्यङ्	आम्बष्ठ्यः, आवन्त्यः, कौशल्यः, आजाद्यः
कुरुनादिभ्योण्यः[१०]'	ण्यः	कौरव्यः, नैषध्यः,
साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्[११]'	इञ्	औदुम्बरिः, प्रात्यग्रथिः'

१. पा० सू० ४।१।११३
२. पा० सू० ४।१।११६
३. पा० सू० ४।१।१२८
४. पा० सू० ४।१।१२९
५. पा० सू० ४।१।१३१
६. पा० सू० ४।१ १३२
७. पा० सू० ४।१।१२१
८. पा० सू० ४।१।१७०
९. पा० सू० ४।१।१७१
१०. पा० सू० ४।१।१७२
११. पा० सू० ४।१।१७३

एतानि हि जनपदशब्दात् क्षत्रियादञिति शास्त्रमपवाद्य प्रवर्त्तन्ते। अत एव आङ्गः, वाङ्गः, मागधः, कालिङ्गः, सौरमसः इत्यत्र सामान्यतः जनपदशब्दात्क्षत्रियादञिति शास्त्रविहिताञ्प्रत्ययमपवाद्य 'द्व्यञ्मगधकलिङ्ग-सूरमासादणिति विशेषशास्त्रेणाण् विधीयते। यद्यप्यत्र अञा अणाच पदसिद्धौ न कश्चिद् भेदः प्रतीयते, तथापि स्वरकृतविशेषमादायैवात्राण् प्रत्ययेनाञ् प्रत्ययस्यापवादः स्वीक्रियते। यतो हि अञि सति प्रत्ययस्य 'ञ्नित्यादेर्नित्यम्[1]' इति विशेषशास्त्रेण नित्यमाद्युदात्तो भवति, अणि प्रत्ययेतु 'आद्युदात्तश्च' इति सामान्यशास्त्रेण प्रत्ययः आद्युदात्तः क्रियते।

आम्बष्ठ्यः, आवन्त्य इत्यादौ तु अञ् प्रत्ययमपवाद्य 'वृद्धेत्कोसलाजा-दाञ्यङिति विशेषशास्त्रेण ञ्यङ विधीयते। एवं कौरव्यः नैषध्यः इत्यत्र 'कुरुनादिभ्योण्यः' इति विशेषशास्त्रस्य प्रवृतिः तत्सामान्यशास्त्रविहिताञ्-प्रत्ययमपवाद्यैव भवति। औदुम्बरिः तैलखलि इत्यादौ च तस्याञ् प्रत्ययस्य साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञिति विशेषशास्त्रविहितेनेञ् प्रत्ययेन बाधो दृश्यते।

तदेवं तस्यापत्यमिति सामान्यशास्त्रापवादभूतस्य 'स्त्रीभ्यो ढक्' जनपद-शब्दात्क्षत्रियादञिति शास्त्रद्वयस्याप्यपवादभूतानि विशेषशास्त्राणि विवेचितानि।

अत इञिति शास्त्रस्यापवाद शास्त्राणि

अतञितिशास्त्रं सामान्यतः तस्यापत्यमिति शास्त्रस्यापवादभूत-मस्तीति प्रागुक्तम्। अत्र तु अतञिति विशेषशास्त्रस्यापवादभूतविशेष-शास्त्राणि तत्तत्कार्योदाहरणपूर्वकं परिचीयन्ते। तद्यथाः —

उत्सर्गशास्त्रम्	कार्यम्	उदाहरणानि
अत इञ्	इञ्	दाक्षिः
एतदपवादशास्त्राणि		
उत्सादिभ्योऽञ्[1]'	अञ्	औत्सः
गोत्रेकुञ्जादिभ्यश्च्फञ्[2]'	च्फञ्	कौञ्जायन्यः
नडादिभ्यः फक्[3]'	फक्	नाडायनः
शरद्वच्छुनकदर्भाभृगुवत्साग्रायणेषु[4]'	,,	दार्भायणः

१. पा० सू० ४।१।८६
२. पा० सू० ४।१।९८
३. पा० सू० ४।१।९९
४. पा० सू० ४।१।१०२

द्रोणपर्वतजीवन्तादन्यतरस्याम्[१]	,,	द्रौणायनः
अनृष्यानन्तर्ये विदादिभ्योऽञ्[२]	अञ्	वैदः, पौत्रः
गर्गादिभ्यो यञ्[३]	यञ्	गार्ग्यः,
कपिबोधादाङ्गिरसे[४]	,,	बौध्यः
वतण्डाच्च[५]	,,	वातण्ड्यः
अश्वादिभ्यः फञ्[६]	फञ्	आश्वायनः
भर्गात्त्रैगर्ते[७]	,,	भार्गायनः
शिवादिभ्योऽण्[८]	अण्	शैवः, गाङ्गः
ऋष्यन्धकवृष्णिकुरुभ्यश्च[९]	,,	वासिष्ठः, श्वाफलकः, नाकुलः
विकर्णशुङ्गछगलाद्वत्सभरद्वाजात्रिषु[१०]	,,	वैकर्णः, शौङ्गः, छागलः
शुभ्रादिभ्यश्च[११]	ढक्	शौभ्रेयः
विकर्णकुषीतकात्काश्यपे[१२]	,,	वैकर्णेयः, कौषीतकेयः
कुलात् खः[१३]	खः	कुलीनः
अपूर्वपदादन्यतरस्यां यड्ढकञौ[१४]	यत्ढकञ्	कुल्यः, कौलेयकः
महाकुलादञ्खञौ[१५]	अञ्, खञ्	महाकुलः, महाकुलीनः
सेनान्तलक्षणकारिभ्यश्च[१६]	ण्यः	हारिषेण्यः, लाक्षण्यः, तान्तुवाय्यः,

१. पा० सू० ४।१।१०३
२. पा० सू० ४।१।१०४
३. पा० सू० ४।१।१०७
४. पा० सू० ४।१।१०८
५. पा० सू० ४।१।११०
६. पा० सू० ४।१।१११
७. पा० सू० ४।१।११२
८. पा० सू० ४।१।११४
९. पा० सू० ४।१।११७
१०. पा० सू० ४।१।१२३
११. पा० सू० ४।३।१२४
१२. पा० सू० ४।१।१३९
१३. पा० सू० ४।१।१४०
१४. पा० सू० ४।१।१४१
१५. पा० सू० ४।३।१४२
१६. पा० सू० ४।१।१५२

उदीचां मते तु 'सेनान्तलक्षणकारिभ्यः इञेव भवति। तथा चात्र शास्त्रमस्ति उदीचामिञिति। तेन हारिषेणिः, लाक्षणिः, तान्तुवायिरीति इञन्तपदमपि शिष्टव्यवहारे प्रसिद्धमिति ज्ञायते।

तिकादिभ्यः फिञ्[1]	फिञ्	तैकायनिः
कौशल्य कार्मार्याभ्यां च[2]	,,	कौशल्यायनि ,कार्मार्यायणिः
अणोद्व्यचः[3]	,,	कार्त्रायणिः
उदीचां वृद्धादगोत्रात्[4]	,,	आम्रगुप्तायनिः
वाकिनादीनां कुक्च[5]	,,	वाकिनकायनिः
पुत्रान्तादन्यतरस्याम्[6]	,,	गार्गीपुत्रिकायणिः
प्राचां वृद्धात्फिन्बहुलम्[7]	फिन्	ग्लुचुकायनिः

अत्रैभिर्विशेषशास्त्रविहितकार्योदाहरणैश्चात इञिति सामान्यशास्त्रस्यापवादशास्त्राणां परिचयो जातः। तत्रैषविशेषोऽपि वर्त्तते यत् पुत्रस्यापत्यं पौत्रः इत्यत्र इञ् प्रत्ययमपवाद्य अनृष्यानन्तर्ये विदादिभ्योऽञित्यनेन विधीयमानाञ्प्रत्ययेन विदस्य ऋषेर्गोत्रापत्यम् वैद इत्यत्र 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति शास्त्रेण प्राप्तस्याणोऽप्यपवाद्यते। तत्फलञ्च पूर्वोक्तस्वरविशेष एव प्रसिद्धः। विदादिगणे ऋषयोऽनृषयश्चेत्युभयविधाः शब्दाः पठिताः। तत्र ये अनृषयः तेभ्योऽनन्तरापत्ये अत इञित्यस्यावश्यप्राप्तिः ये चर्षयः तेभ्यस्तु गोत्रापत्ये ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यूभयप्राप्तौ च अनृष्यानन्तर्ये विदादिभ्योऽञिति शास्त्रारम्भो जातः। अतस्तयोरपवाद इति निष्कर्षः

रक्ताद्यर्थेषूत्सर्गापवादत्वम्

प्रवर्त्तमानप्राग्दीव्यतोऽणित्यधिकारस्थं 'तस्यापत्यम' अत इञ्' शास्त्रद्वयस्यापवादशास्त्राणि विवेचितानि। इदानीमेतदधिकारस्थरक्ताद्यर्थप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वं चिन्त्यते। तत्र तावत् 'तेन रक्तं रागात्[8]' इति सामान्यशास्त्रेण अण् प्रत्यये सति कषायेण रक्तं वस्त्रं काषायम्, मञ्जिष्ठया च रक्तं वस्त्रमित्यर्थे माञ्जिष्ठमिति रूपद्वयं सिध्यति किन्तु लाक्षया रोचनया वा रक्तेऽर्थे 'लाक्षारोचनाट्ठक्[9]' इति विशेषशास्त्रेण तदपवाद्य ठकि सति लाक्षिकं माञ्जिष्ठं वस्त्रमिति प्रयुज्यते।

---

१. पा० सू० ४।१।१५४
२. पा० सू० ४।१।१५५
३. पा० सू० ४।१।१५६
४. पा० सू० ४।१।१५७
५. पा० सू० ४।१।१५८
६. पा० सू० ४।१।१५९
७. पा० सू० ४।१।१६०
८. पा० सू० ४।२।१
९. पा० सू० ४।२।२

एवं पुष्येण युक्तमित्यथ 'नक्षत्रेग युक्तः कालः[१]' इति सामान्यशास्त्रेण अण् प्रत्यये सति पौषमहः, इति व्यवह्रियते। किन्तु तिष्यश्च पुनर्वसू च' तिष्यपुनवसू ताभ्यां युक्तमहः इत्यर्थे "द्वन्द्वाच्छः[२] इति विशेषशास्त्रेण तदपवाद छप्रत्यये कृते सति तिष्यपुनर्वसवीयमिति पदं सिध्यति। एवमेव राधानुराधीया रात्रिरित्यत्रापि छप्रत्ययो दृश्यते। एष छप्रत्ययोऽविशेषे अर्थात् षष्ठिदण्डात्मककालस्यावान्तरविशेषाभावे "अद्य राधानुराधीयमित्यत्रापि प्रवर्त्तति। यतो हि मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्" इति न्यायरीत्या "लुबविशेषे[३]" इति शास्त्रेण अद्य पुण्य इत्यत्र पूर्वोक्ताण् प्रत्ययस्यैव लुब् भवति न तु तदुत्तरविधीयमानस्य छप्रत्ययस्यापीति भावः।

एवं वसिष्ठेन 'दृष्टं साम' वासिष्ठमित्यत्र 'दृष्टं साम[४]' इति सामान्यशास्त्रेण प्रवर्त्तमानाण् प्रत्ययस्य 'कलेर्ढक्'[५] 'वामदेवाड्ड्यड्ड्यौ[६]' इति विशेषशास्त्रद्वयेन बाधो भवति। तेन कलिना ऋषिविशेषेण दृष्टं साम इत्यर्थे "कालेयमिति" पदं निष्पद्यते। तथा वामदेवेन दृष्टं साम" वामदेव्यम् इत्यत्र ड्यड्ड्यौ च भवतः।

एवमेव परिवृत्ताद्यर्थेषु तत्तत्सामान्यशास्त्रैः विहिताण्प्रत्ययस्य तत्तद्विशेसशास्त्रैः बाधो भवति। तद्विज्ञानञ्च तत्कार्योदाहरणैरेव स्पष्टं भवतीति हेतोर्यथाक्रममिह प्रस्तूयते। तद्यथाः—

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	कार्यम्	उदाहरणानि
तेन रक्तं रागात्		अण्	काषायम्
	लाक्षारोचनाट्ठक्	ढक्	लक्षिकम्, रौचनिकम्
"नक्षत्रेण युक्तकालः"		अण्	पौषीरात्रिः पौषमहः
	द्वन्द्वाच्छः	छः	तिष्यपुनर्वसवीयमहः राधानुराधीयारात्रिः
दृष्टंसाम		अण्	वाशिष्ठं साम
	कालेर्ढक्	ढक्	कालेयम्
	वामदेवाड्ड्यड्ड्यौ"	ड्यत्ड्यः	वामदेव्यं साम
परिवृतोरथः[७]		अण्	काम्बलः

१. पा० सू० ४।२।३
२. पा० सू० ४।२।६
३. पा० सू० ४।२।४
४. पा० सू० ४।२।७
५. पा० सू० ४।२।८
६. पा० सू० ४।२।६
७. पा० सू० ४।२।१०

	पाण्डुकम्बलादिनिः[१]	इनिः	पाण्डुकम्बली
	द्वैपवैयाघ्रादञ्[२]"	अञ्	द्वैपः, वैयाघ्रः
संस्कृतं भक्षाः[३]		अण्	भ्राष्टाः यवाः
	शूलोखाद्यत्[४]	यत्	शूल्यं मासम्
	'दघ्नष्ठक्'[५]	ठक्	दाधिकम्
	उदश्वितोऽन्यतर-स्याम्[६]'	,,	औदश्वित्कः
	क्षीराड्ढञ्[७]'	ढञ्	क्षैरेयी यवागूः
सास्मिन्पौर्णमासीति[८]'		अण्	पौषोमासः
	आग्रहायण्यश्व-त्थाट्ठक्[९]'	ठक्	आग्रहायणिकोमासः
	विभाषाफाल्गुनी-श्रवणाकार्तिकी-चैत्रीभ्यः[१०]'	ठक्	फाल्गुनिकः
सास्यदेवता[११]'		अण्	ऐन्द्रं हविः
	शुक्राद्धन्[१२]	धन्	शुक्रियं हविः
	अपोनप्त्रपान्नप्तृ-भ्यां घः[१३]	,,	अपोनप्त्रियम्, अपानप्त्रियम्
	सोमाट् ट्यण्[१४]	ट्यण्	सौमी ऋक्
	वाय्वृतुपित्रुषसो-यत्[१५]	यत्	वायव्यम्, ऋतव्यम्
	द्यावापृथ्वीशुना-सीरमरुत्वदग्नी-	छ यत्	द्यावापृथिव्यम् द्यावापृथिवीमम्

१. पा० सू० ४।२।११
२. पा० सू० ४।२।१२
३. पा० सू० ४।२।१६
४. पा० सू० ४।२।१७
५. पा० सू० ४।२।१८
६. पा० सू० ४।२।१९
७. पा० सू० ४।२।२०
८. पा० सू० ४।२।२१
९. पा० सू० ४।२।२२
१०. पा० सू० ४।२।२३
११. पा० सू० ४।२।२४
१२. पा० सू० ४।२।२६
१३. पा० सू० ४।२।२७
१४. पा० सू० ४।२।२८
१५. पा० सू० ४।२।३०

षोमवास्तोषपति-गृहमेधाच्छ च[1]		
अग्नेर्ढक्[2]	ढक्	आग्नेयोऽष्टाकपालः
महाराजप्रोष्ठपदाट्ठञ्[3]	ठञ्	माहाराजिकम्
तस्य समूहः[4]	अण्	काकम्, वाकम्
गोत्रोक्षोष्ट्रोरभ्रराजन्यवत्स-मनुष्याजाद्वुञ्[5]	वुञ्	ग्लौचुकायनकम्
केदाराद्यञ् च[6]	यञ् वुञ्	कैदार्यम्,कैदारकम्
ठञ् कवचिनश्च[7]	ठञ्	कावचिकम्
ब्राह्मणमाणववाडवाद्यत्[8]	यत्	ब्राह्मण्यम्
ग्रामजनबन्धुभ्यस्तल्[9]	तल्	ग्रामता, जनता
अनुदात्तादेरञ्[10]	अञ्	कापोतम्,मायूरम
खण्डिकादिभ्यश्च[11]	,,	खाण्डिकम्
अचित्तहस्तिधेनोष्ठक्[12]	ठक्	साक्तुकम्, हास्तकम्, धैनुकम्
केशाश्वाभ्यां यञ्छावन्यतरस्याम्[13]	यञ् छ	कैश्यम्,कैशिकम्
पाशादिभ्यो यः[14]	यः	पाश्या, तृण्या
खल गोरथात्[15]	,,	खल्या, रथ्या
इनित्रकट्यचश्च[16]		इनि, त्र कट्य च खलिनी गोत्रम्, रथकट्या

१. पा० सू० ४।२।३१
२. पा० सू० ४।२।३२
३. पा० सू० ४।२।३३
४. पा० सू० ४।२।३५
५. पा० सू० ४।२।३९
६. पा० सू० ४।२।४०
७. पा० सू० ४।२।४१
८. पा० सू० ४।२।४२
९. पा० सू० ४।२।४३
१०. पा० सू० ४।२।४४
११. पा० सू० ४।२।४५
१२. पा० सू० ४।२।४७
१३. पा० सू० ४।२।४८
१४. पा० सू० ४।२।४९
१५. पा० सू० ४।२।५०
१६. पा० सू० ४।२।५१

उत्सर्गशास्त्रम्	अपवादशास्त्रम्	कार्यम्	उदाहरणानि
विषयोदेशे[13]		अण	
	रांजन्यादिभ्योवुञ्[14]	वुञ्	राजन्यकः
	भौरिक्याद्यैषुकार्यादिभ्यो-विधल्भक्तलौ[15]	विधलभक्तल्	भौरिकिविधम् ऐषुकारिभक्तम्
तदधीते तद्वेद[16]		अण्	छान्दसः, वैयाकरणः
	क्रतूक्थादिसूत्रान्ताद्ठक्[17]	ठक्	आग्निष्टोमिकः औक्थिकः
	क्रमादिभ्यो वुन्[18]	वुन्	क्रमकः, पदकः
	अनुब्राह्मणादिनिः[19]	इन्	अनुब्राह्मणी
	वसन्तादिभ्यष्टक्[1]	ठक्	वासन्तिकः, वार्षिकः

एभिरुदाहरणैः स्पष्टं प्रतिभाति यत् सामान्यतो रक्ताद्यर्थाण् प्रत्ययस्यापवादभूता एते प्रत्ययाः सन्ति । तत्र काकानां बकानां वा समूह इत्यर्थे 'तस्य समूह' इति सामान्यशास्त्रेणाण् प्रत्ययो भवति । तेन काकम्, बाकम् वेति रूपं सिध्यति । एतस्य 'तस्य समूह' इति सामान्यशास्त्रस्यापवादशास्त्रमस्ति 'अचित्तहस्तिधेनोष्ठगिति । अतः सक्तूनां समूहः, हस्तिनां समूहः तथा धेनूनां समूहः इत्यर्थे ठकि सति साक्तुकम्, हास्तिकम् धैनुकमिति रूपत्रयं सिध्यति । किन्तु भिक्षाणां समूह इत्यर्थे अचित्त्वाद् अर्थादप्राणित्वात् प्राप्तं ठक्प्रत्ययं ततोऽपि विशेषेण भिक्षादिभ्योऽणिति[2] शास्त्रेणापवाद्याण् विधीयते । तेन भैक्षमितिपदं निष्पद्यते ।

तदेवं रक्ताद्यर्थप्रत्ययानामुत्सर्गापवादत्वं विवेचितम् ।

चातुरर्थिकप्रत्ययानामुत्सर्गापवादत्वम्

चतुर्णामर्थानां समाहारश्चतुरर्थी तत्र चतुरर्थ्यां भव इत्यर्थे 'अध्यात्मादेष्ठञिष्यते[3] इति वार्तिकेन ठञ् प्रत्यये जाते चातुरर्थिकपदस्य सिद्धिर्भवति । अतश्चातुरर्थिकपदेन 'तदस्मिन्नस्तीतिदेशे तन्नाम्नि[4]' 'तेन निर्वृत्तम्[5]' 'तस्य निवासः[6]' 'अदूरभवश्च[7]' इति चत्वारोऽर्थाः संगृह्यन्ते

१. पा० सू० ४।२।५२
२. पा० सू० ४।२।५३
३. पा० सू० ४।२।५४
४. पा० सू० ४।२।५६
५. पा० सू० ४।२।६०
६. पा० सू० ४।२।६१
७. पा० सू० ४।२।६२
८. पा० सू० ४।२।६३
९. पा० सू० ४।२।३८
१०. पा० सू० ४।२।६०
११. पा० सू० ४।२।६७
१२. पा० सू० ४।२।६८
१३. पा० सू० ४।२।६९
१४. पा० सू० ४।२।७०

एष्वर्थेषु सामान्यतोऽण् प्रत्ययो विधीयते। तेन उदुम्बराः सन्ति अस्मिन् देशे औदुम्बरः, कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी, शिबीनां निवासी देशः शैवः, विदिशाया अदूरभवं नगरं वैदिशमित्यत्र चतुर्णामर्थानां यथाक्रममुदाहरणं संघटते। अत्राण्प्रत्ययश्च पूर्वोक्तप्राग्दीव्यतोऽणित्यधिकारात् प्रवर्त्तत एव। अतः एषु चातुरर्थिकेष्वप्यस्याण्प्रत्ययस्य तत्तद्विशेषशास्त्रैरपवादो दृश्यते। एतदपवादभूतानि शास्त्राणि च चतुर्दश विद्यन्ते। तान्यपीह सोदाहरणं परिचीयन्ते—

चातुरर्थिकाणपवादशास्त्राणि	कार्यम्	उदाहरणानि
ओरञ्[1]	अञ्	काक्षतवम्
मतोश्च बह्वजङ्गात्[2]	अञ्	ऐषुकावतम्
बह्वचः कूपेषु[3]	अञ्	दैर्घवस्त्रः कूपः
उदक्च विपाशः[4]	अञ्	दान्तः कूपः
सङ्कलादिभ्यश्च[5]	अञ्	शाङ्कलम्, पौष्कलम्
स्त्रीषु सौवीरसाल्वप्राक्षु[6]	अञ्	दातामित्री
वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्कशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः[7]	वुञ्, छण्	आरीहणकम्, कार्शाश्वीयः
ढक्छौ च[8]	ढक्, छ	शार्करिकम्, शार्करीयम्
नद्यां मतुप्[9]	मतुप्	उदुम्बरावती
मध्वादिभ्यश्च[10]	,,	मधुमान्
कुमुदनडवेतसेभ्यो ड्मतुप्[11]	ड्मतुप्	कुमुद्वान्, नड्वान्
नडशादाड् ड्वलच्[12]	ड्वलच्	नड्वलः, शाद्वलः
उत्करादिभ्यश्छः[13]	छः	उत्करीयः
नडादीनां कुक्च[14]	छः	नडकीयम्

---

१. पा० सू० ४।२।७१
२. पा० सू० ४।२।७२
३. पा० सू० ४।२।७३
४. पा० सू० ४।२।७४
५. पा० सू० ४।२।७५
६. पा० सू० ४।२।७६
७. पा० सू० ४।२।८०
८. पा० सू० ४।२।८४
९. पा० सू० ४।२।८५
१०. पा० सू० ४।२।८६
११. पा० सू० ४।२।८७
१२. पा० सू० ४।२।८८
१३. पा० सू० ४।२।९०
१४. पा० सू० ४।२।९१

एषु चातुर्थिकाण् प्रत्ययापवादभूतशास्त्रेषु 'ओरञ्' इत्यादि षड्भिः सूत्रैरञ् प्रत्ययो विधीयते । तत्र यद्यपि अञि, अणि च न स्वरूप भेदः, तथापि स्वरभेदेनोच्चारणभेदस्तु जायत एव । अतोऽणोऽपवादोऽञिति भावः । वुञ् छण्कठजादिसप्तदशप्रत्ययानान्तु स्वरूपतोऽपि भेदः स्पष्टः । एवं ढक्, छ, मतुप्, ड्वलच 'प्रत्ययैरणप्रत्ययस्वरूपभेदश्चोदाहरणद्वारा प्रतीयत एव । तस्मादेभिरणप्रत्ययोऽपवाद्यत इति निर्णयः ।

अत्र पुनः ओरञिति शास्त्रस्याप्यपवादशास्त्रं विद्यते 'सुवास्त्वादिभ्योऽण्[1]' इति । तेन सुवास्तोरदरभवं नगरं सौवास्तवमित्यत्राञ् प्रत्ययमपवाद्य अण् प्रत्यय एव भवति । एव बह्वचःकूपेषु' इति शास्त्रस्याप्यपवादभूतं 'रोणी[2]' 'कोपधाच्चेति[3]' शास्त्रद्वयमस्ति । तेन रोण्यानिर्वृत्तः कूपः रौणः, कर्णच्छिद्रकेण निर्वृतः कूपः कार्णच्छिद्रकः इत्यत्राप्यण् प्रत्ययः प्रतिप्रसवरूपेण भवति । अतः सुवास्त्वादिभ्योऽण् 'रोणी' कोपधाच्चेति शास्त्रत्रयम् 'ओरञ्' बह्वचः कूपेषु इति विशेषशास्त्रयोरप्यपवादभूतं वर्त्तते इति निश्चयः ।

तदित्थं चातुर्थिक प्रत्ययानामुत्सर्गापवादक्रमो विचारितः ।

शैषिकप्रत्ययानामुत्सर्गापवादतत्त्वम्

चातुर्थिकप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणां विवेचनानन्तरं शैषिकप्रत्ययसम्बध्युत्सर्गापवादशास्त्राणि विविच्यन्ते । तत्र तावदुक्तादन्यः-शेषः इति शेष शब्दार्थः सामान्यतः प्रसिद्धः । अत्र तद्धितप्रकरणे च अपत्यादि चतुर्थ्यन्तादन्योऽर्थः शेषपदेन गृह्यते । तथाचोक्तं महाभाष्ये 'शेष इत्युच्यते कः शेषोनाम १॥ अपत्यादिभ्यश्चातुरर्थपर्यन्तेभ्यो येऽन्येऽर्थाः स शेषः[4]' इति । ततश्च 'शेषे[5]' इति सूत्रात् प्राग् अपत्यादिचतुर्थ्यन्तानामेवोक्तत्वं निश्चितम् । अत उक्तार्थभिन्नेष्वर्थेषु शेष इति सामान्यशास्त्रेण अण् प्रत्ययो विधीयते । एष अण् प्रत्ययश्च प्राग्दीव्यतोऽण् इति पूर्वोक्ताधिकारसूत्रादनुवर्त्तमान एवास्ति । अतः स्वावधि यावत् सामान्यतः सर्वत्राण् प्रत्ययः प्रवर्त्तते विशेषशास्त्रैश्च तदपाद्यते इति पद्धतिरेषा सर्वत्र दृश्यते । शेषे इत्यत्र विध्यधिकारशास्त्रत्वमपि वर्त्तते । तथाचोक्तं काशिकायां कौमुद्याञ्च 'शेष इति लक्षणं चाधिकारश्चेति । अतः शास्त्रेणानेनाण् विधिः 'तस्य विकारः[6]' इति सूत्रतः प्राक् शेषाधिकारश्च शाब्दिकैर्व्या-

१. पा० सू० ४।२।७७
२. पा० सू० ४।२।७८
३. पा० सू० ४।२।७९
४. पा० सू० ४।२।९२ भाष्ये
५. पा० सू० ४।२।९२
६. पा० सू ४।२।१३४

ख्यातः । चक्षुषा गृह्यते चाक्षुषं रूपं, दृषदि पिष्टा दार्षदाः सक्तवः, उल्लूखले क्षुण्णः औलूखलो यावकः, अश्वैरुह्यते आश्वो रथः, इत्यादौ "शेषे' इति सामान्यशास्त्रेण अण् प्रत्ययो विधीयते । शेषाधिकारफलञ्च शालीये भवः इत्यत्र स्वरूपप्रत्ययस्य निवारणम, यतो हि शालायां भवः शालीया घटः इत्यत्र 'वृद्धाच्छः[1]' इति शास्त्रेण छप्रत्यये जाते पुनस्तत्र भवमुदकमित्यर्थे छप्रत्ययो नेष्यते । विरूपप्रत्ययस्तु इष्यत एव—यथा 'अहिच्छत्रे भवः आहिच्छत्रः इत्यत्र 'तत्रभव[2]' इत्यनेनाणि कृते पुनः आहिच्छत्रे भव इत्यर्थे 'आहिच्छत्रीयः' इत्यत्र छप्रत्ययो दृश्यते । तथाचोक्तं महाभाष्ये—

'शैषिकान्मतुबथर्थीयाच्छैषिकोमतुबर्थिकः ।
सरूपः प्रत्ययो नेष्टः सन्नन्तान्नसनिष्यते[3]' ।। इति ।

यद्यत्र शेषाधिकारो न स्यात्तदा वृद्धाच्छः इत्यस्य शेषत्वाभावात् भाष्योक्तं कथं संगच्छेत । तस्माच्छेषे लक्षणञ्चाधिकारश्चेत्युभयं सिध्यति । शेषाधिकारे हि शेषे इति सामान्यशास्त्रस्य विशेषभूतानि बहूनि शास्त्राणि सन्ति । तानि चानेकविधप्रत्ययविधायकानि विशेषशास्त्राणि 'शेषे' इत्यधिकारस्थसामान्यशास्त्रविहिताण्प्रत्ययं प्रबाध्य प्रवर्त्तन्ते । अतस्तत्-परिचयः सोदाहरणमिह प्रस्तूयते—

विशेषशास्त्राणि	कार्यम्	उदाहरणानि
राष्ट्रावारपराद्घखौ[4]'	घ ख	राष्ट्रियः, अवारपारीणः
ग्रामाद्यखञौ[5]'	य खञ्	ग्राम्यः, ग्रामीणः
कल्यादिभ्योढकञ्[6]'	ढकञ्	कालेयकः, नागरेयकः
कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु[7]'	ढक्	कौलेयकः, कौक्षेयकः
नक्षत्रादिभ्योढक्[8]'	ढक्	नादेयम्, माहेयम्
दक्षिणापश्चात्पुरसस्त्यक्[9]'	त्यक्	दाक्षिणात्यकः
कापिश्याः ष्फक्[10]'	ष्फक्	कापिश्यायनं मधु
रङ्कोरमनुष्येऽण्च[11]'	अण्ष्फक्	राङ्कवो गौः, राङ्कावायणः

१. पा० सू० ४।२।११४
२. पा० सू० ४।३।५३
३. पा० सू० ३।१।७–४।२।९४
४. पा० सू० ४।२।९३
५. पा० सू० ४।२।९४
६. पा० सू० ४।२।९५
७. पा० सू० ४।२।९६
८. पा० सू० ४।२।९७
९. पा० सू० ४।२।९८
१०. पा० सू० ४।२।९९
११. पा० सू० ४।२।१००

द्युप्रागपागुदक्प्रतीचोयत्[1]	यत्	दिव्यम्, प्राच्यम् अपाच्यम्
कन्थायाष्ठक्[2]	ठक्	कान्थिक
अव्ययात्त्यप्[3]	त्यप्	अमात्यः, यत्रत्यः
ऐषमोह्यःश्वसोऽन्यतरस्याम्[4]	त्यप्	ऐषमस्त्यम्, ह्यस्त्यम्
तीररूप्योत्तरपदादञ्ञौ[5]	अञ्, ञ	काकतीरम्, पाल्लल्तीरम्
दिक्पूर्वपदादसंज्ञायां ञः[6]	ञः	पौर्वशालः
मद्रेभ्योऽञ्[7]	अञ्	पौर्वमद्रः, आपरमद्रः
उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्[8]	अञ्,धः	शैवपुरम्, माण्डवपुरम्
वृद्धाच्छः[9]	,,	शालीयः, मालीयः
काश्यादिभ्यष्ठञ्ञिठौ[10]	ठञ्ञिठ	काशिकी, काशिका
ओर्देशेठञ्[11]	ठञ्	नैषादकर्षुकः, शाबरजम्बुकः
धूमादिभ्यश्च[12]	वुञ्	धौमक
नगरात्कुत्सनप्रावीण्ययोः[13]	वुञ्	नागरकः चौरः शिल्पी वा
गर्तोत्तरपदाच्छः[14]	छः	वृकगर्तीयम्
गहादिभ्यश्च[15]	छः	गहीयः
प्राचां कटादेः[16]	छः	कटनगरीयम्, कटघोषीयम्
पर्वताच्च[17] छः	छः	पर्वतीयः
कृकणपर्णाद्भारद्वाजे[18]	छः	कृकणीयम्, पर्णीयम्
युष्मदस्मदोरन्यतरस्याम्[19]	खञ् छः	यौष्माकीणः, युष्मदीयः
अर्धाद्यत्[20]	यत्	अर्ध्यम्

---

१. पा० सू० ४।२।१०१
२. पा० सू० ३।२।१०२
३. पा० सू० ४।२।१०४
४. पा० सू० ४।२।१०५
५. पा० सू० ४।२।१०६
६. पा० सू० ४।२।१०७
७. पा०सू० ४।२।१०८
८. पा० सू० ३।२।१०९
९. पा० सू० ४।२।११४
१०. पा० सू० ४।२।११६
११. पा ० सू० ४।२।११९
१२. पा० सू० ४।२।१२७
१३. पा० सू० ४।२।१२८
१४. पा० सू० ४।२।१३७
१५ पा० सू० ४।२।१३८
१६. पा० सू० ४।२।१३९
१७. पा० सू० ४।२।१४३
१८. पा० सू० ४।२ १४५
१९. पा० सू० ४।३।१
२०. पा० सू० ४।३ ४

विशेषशास्त्राणि	कार्यम्	उदाहरणानि
परावराद्यमोत्तमपूर्वाच्च[1]	यत्	परार्द्धयम्, अवरार्द्धयम्
दिक्पूर्वपदाद्ठञ्[2]	ठञ्	पूर्वार्द्धयम्, पौर्वार्द्धिकम्
मध्यान्मः[3]	मः	मध्यमः
कालाठ्ठञ्[4]	ठञ्	मासिकः, आर्द्धमासिकः
सायञ्चिरम्प्राह्णे प्रगेऽव्ययेभ्य-ष्ट्युट्युलौतुट्च[5]	ट्युट्युल्	सायन्तनम्, चिरन्तनम्
पथः पन्थ च[6]	वुन्	पन्थकः
उपजानूपकर्णोपनीवेष्ठक्[7]	ठक्	औपजानुकः, औपकर्णिकः
कोशाड्ढञ्[8]	ठञ्	कौशेयम् वस्त्रम्
कलाप्यश्वत्थयववुशाद्वुन्[9]	वुन्	कलापकम्, अश्वत्थकम्
दिगादिभ्यो यत्[10]	यत्	दिश्यम्, वर्ग्यम्
शरीरावयवाच्च[11]	यत्	दन्त्यम्, कर्ण्यम्
दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्[12]	ठञ्	दार्तेयम्, कौक्षेयम्, कालशेयम्
गम्भीराञ्ञ्यः[13]	ञ्यः	गाम्भीर्यम्,
अव्ययीभावाच्च[14]	ञ्यः	पारिमुख्यम्
अन्तःपूर्वपदाट्ठञ्[15]	ठञ्	आन्तर्वेश्मिकम्
ग्रामात्पर्यनुपूर्वात्[16]	ठञ्	पारिग्रामिकः
वर्गान्ताच्च[17]	छः	कवर्गीयम्, चवर्गीयम्
अशब्दे यत्खावन्यतरस्याम्[18]	यत् ख	वासुदेववर्ग्यः, वासुदेववर्गीण,

१. पा० सू० ४।३।५
२. पा० सू० ३।३।६
३. पा० सू० ४।३।८
४, पा० सू० ४।३।११
५. पा० सू० ४।१।२३
६. पा० सू० ४।३।२९
७. पा० सू० ४।३।४०
८. पा० सू० ४।३।४२
९. पा० सू० ४।३।४८
१०. पा० सू० ४।३।५४
११. पा० सू० ४।३।५५
१२. पा० सू० ४।३।५६
१३. पा० सू० ४।३।५८
१४. पा० सू० ४।२।५९
१५. पा० सू० ४।३।६०
१६. पा० सू० ५।३।६१
१७. पा० सू० ४।३।६३
१८. पा० सू० ४।३।६४

विशेषशास्त्रम्	कार्यम्	उदाहरणानि
वह्वचोऽन्तोदात्ताट्ठञ्[१]	ठञ्	षात्वणात्विकम्
क्रतुयज्ञेभ्यश्च[२]	ठञ्	आग्निष्टोमिकः,वाजपेयिकः
अध्यायेष्वेवर्षेः[३]	ठञ्	वासिष्ठिकोऽध्यायः
पौरोडाशपुराडाशात्ष्ठन्[४]	ष्ठन्	पौरोडाशिकः, पौरोडाशिकी
द्वयजब्राह्मणर्क्प्रथमाध्वरपुरश्चरण-नामाख्याताट्ठक्[५]		चातुर्होतृकः ब्राह्मणिकः, आर्चिक
ढगायस्थाने भ्यः[६]	ठक्	शौल्कशालिकः
विद्यायोनिसम्बन्धेभ्योवुञ्[७]	वुञ्	औपाध्यायकम्, शैष्यकम्
हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः[८]	रूप्यः	समरूप्यम् विषमरूप्यम्
मयट्च[९]	मयट्	सममयम् देवदत्तमयम्
विदूराञ्ञ्यः[१०]	ञ्यः	वैदूर्योमणिः
शिशुक्रन्दयमसमद्वन्द्वेन्द्रजननादिभ्यश्छः[११]	छः	शिशुक्रन्दीय ;यमसभीयः
आयुधजीविभ्यश्छः पर्वते[१२]	छः	हृदगोलीयाः, अन्धकवर्तीयः
शण्डिकादिभ्योञ्यः[१३]	ञ्यः	शाण्डिक्यः, सार्वसोम्यः
तूदीशालातुरवर्मतीकूचवाराड्ढक्-छण्ढञ्यकः[१४]	ठक्, छण् ठञ् यक्,	तौदेयः, शोलातुरीयः, वार्मतेयः,
अचित्ताद्देशकालाट्ठक्[१५]	ठक्	आपूपिकः, शाष्कुलिकः
महाराजाट्ठञ्[१६]	ठञ्	माहाराजिकः
वासुदेवार्जुनाभ्यां वुन्[१७]	वुन्	वासुदेवकः, आर्जुनकः
गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्[१८]	वुञ्	ग्लौचुकायनकः

१. पा० सू० ४।३।६७
२. पा० सू० ६।३।६८
३. पा० सू० ४।३।६९
४. पा० सू० ४।३।७०
५. पा० सू ४।३।७२
६. पा० सू ४।३।७५
७. पा० सू० ४।३।७७
८. पा० सू० ४।३।८१
९. पा० सू० ४।३।८२
१०. पा० सू० ४।३।८४
११. पा० सू० ४।३।८८
१२. पा० सू० ४।३।९१
१३. पा० सू० ४।३।९२
१४. पा० सू० ४।३।९४
१५. पा० सू० ४।३।९६
१६. पा० सू० ४।३।९७
१७. पा० सू० ४।३।९८
१८. पा० सू० ४।३।९९

विशेषशास्त्राणि	कार्यम्	उदाहरणानि
तित्तिरिवरतन्तुखण्डिकोखाच्छण्[१७]	छण्	तैत्तिरीया, वारतन्तवीयाः
कलापिवैशम्पायनान्तेवासिभ्यश्च[१८]	णिनिः	हारिद्रविणः, आलम्बिनः
पुराणप्रोक्तेषु ब्राह्मणकल्पेषु[१]	णिनिः	मालविनः, शाट्यायनिनः
कर्मन्दकृशाश्वादिनिः[२]	इनिः	कर्मन्दिनो भिक्षकः कृशाश्विनो नटाः
उरसोयच्च[३]	यत्, तसि	उरस्यः, उरस्तः
कुलालादिभ्यो वुञ्	वुञ्	कौलालकम्, वारुडकम्
क्षुद्राभ्रमरवटरपादञ्[४]	अञ्	क्षौद्रम्, भ्रामरम्, वाटरम्
रथाद्यत्[६]	यत्	रथ्यम्,
पत्राध्वर्युपरिषदश्च[७]	अञ्	आश्वम, औष्ट्रम्, आध्वर्यवम्, पारिषदम्
हलसीराट्ठक्[८]	ठक्	हालिकम् सैरिकम्
द्वन्द्वाद्वुन्वैरमैथुनिकयोः[९]	वुन्	काकोलुकिका, कुत्सकुशिकिका
गोत्रचरणाद्वुञ्[१०]	वुञ्	औपगवकम्, काठकम्
छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः[११]	ञ्यः	छन्दोग्यम्, औक्थिक्यम्

इत्येवमिह "शेषे" इत्यधिकारस्थजाताद्यर्थकसामान्यशास्त्रविहिताण् प्रत्ययस्यापवादभूतानि शास्त्राण्येतानि संगृहीतानि। एषामपवादभूतविशेषशास्त्राणां मध्ये कानिचिदेवं भूतान्यपि शास्त्राणि सन्ति यानि ततोऽपि विशेषभूतैः शास्त्रैः प्रबाध्यन्ते। तद्यथाकन्थायां जातः कान्थिकः इत्यत्र सामान्यतः प्राप्ताण्प्रत्ययमपवाद्य "कन्ठायाश्ठक्" इति विशेषशास्त्रेण ठक् प्रत्ययो विधीयते। अस्य कन्ठायाष्ठक्" इतिशास्त्रस्यापि विशेषशास्त्रमस्ति "वर्णौवुक्[१२] इति। तेन वर्णुर्नाम सिन्धुनदः तस्यादूरभवो देशोऽपि वर्णुः तस्मिन् या कन्था तस्यां जातः इत्यर्थे 'वर्णौ वुक्' इत्यनेन वुकि सति कान्थकः इति प्रयोगः सिध्यति।

१. पा० सू० ४।३।१०२
२. पा० सू० ४।३।१०४
३. पा० सू० ४।३।१०५
४. पा० सू० ४।५।१११
५. पा० सू० ४।३।११४
६. पा० सू० ४।३।११८
७. पा० सू० ४।३।११९
८. पा० सू० ४।३।१२१
९. पा० सू० ४।३।१२३
१०. पा० सू० ४।३।१२४
११. पा० सू० ४।३।१२५
१२. पा० सू० ४।३।१२६
१३. पा० सू० ४।३।१२९
१४. पा० सू० ४।३।१३०

एवं शिवपुरे भवं शैवपुरमित्यत्र 'उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्[१]' इति विशेषशास्त्रेण अण् प्रत्ययमपवाद्य अञ् प्रत्ययो विधीयते। शिवपुरं-नाम ग्रामविशेष उत्तरप्रदेशे प्रसिद्धः। अतः उदीच्यग्रामपदेन तद्ग्रहणमिह जातम्। किन्तु माहिकिप्रस्थः, पालदः, नैलीनकः इत्यादौ 'प्रस्थोत्तरपदपल-धादिकोपधादण्[२]' इति ततोऽपि विशेषशास्त्रेण तस्मिन्नर्थे अण् एव विधीयते। महिकप्रस्थादिग्रामाणामपि उदीच्यग्रामान्तर्गतत्वादञ् प्रत्यय-स्यावश्यप्राप्तौ एतत् सूत्रमारभ्यते। अतः तस्यायमपवाद इति सुतरां सिद्धम्।

अमात्यः इत्यत्र अमा-समीपे भव इत्यर्थे अण् प्रत्ययमपवाद्य अव्यया-त्त्यप् इति विशेषशास्त्रेण त्यब्विधीते। अत्र 'अरण्याण्णः' इति वार्त्तिकमपि वर्त्तते। अनेन वार्तिकेनाप्यण् प्रत्ययमपवाद्य णप्रत्ययो विधीयते। एतत् फलञ्च अरण्ये भवाः आरण्याः सुमनसः इत्यत्र ङीपोऽभाव एव दृश्यते। अणि सति तु ङीप् प्रसज्येत इति विशेषः। अस्य 'अरण्याण्णः' इति वार्त्तिक-स्यापि विशेशशास्त्रमस्ति 'अरण्यामनुष्ये[३]' इति। अनेन च अरण्ये जातः आरण्यको मनुष्यः इत्यत्र णप्रत्ययमपवाद्य वुञ् प्रत्ययो विधीयते। एष वुञ् प्रत्ययश्च 'पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम्[४]' इति वार्त्तिक-कारवचनात् न केवलं मनुष्यविशेषे एव भवति, अपि तु पथ्यध्यायादि विशेष-वाच्ये-आरण्यकः पन्थाः, आरण्यकोऽध्यायः, आरण्यको न्यायः इत्यादावपि दृश्यते। एवं चात्र पर्वं भवाद्यर्थे सामान्यतः प्राप्तमण् प्रत्ययं प्रबाध्य आर-ण्याः सुमनसश्चेत्यत्राण् प्रत्ययो जातः। तदनु णप्रत्ययमपवाद्य 'आरण्यको मनुष्यः' इत्यादौ वुञ् प्रत्ययस्य विधानमित्यपवादक्रमो दृश्यते। शालीयः, मालीयः इत्यत्र च जाताद्यर्थे प्राप्तमण् प्रत्ययमपवाद्य वृद्धाच्छः इति विशेषशास्त्रेण छप्रत्ययो विधीयते। अस्य छप्रत्ययविधायकस्य 'वृद्धाच्छः' इति शास्त्रस्यापवादशास्त्राणि प्रायः प्रसिद्धान्येव सन्ति। अतस्तेषां परिचयः कार्योदाहरणाभ्यामिह प्रस्तूयते—

"वृद्धाच्छः" इत्यस्यापवादशास्त्राणि —

'काण्वादिभ्यो गोत्रे[५]'	अण्	काण्व्यस्य छात्राः काण्वाः
'इञश्च[६]'	अण्	दाक्षेः छात्राः दाक्षाः

१. पा० सू० ४।२।११०
२. पा० सू० ४।२।१०४
३. पा० सू० ४।१।१२८
४. पा० सू० ४।२।१२९
५. पा० सू० ४।२।१११
६. पा० सू० ४।२।११२

'भवतष्ठक्छसौ[1]'	ठक्-छस्	भावत्कः, भवदीयः
'वाहीकग्रामेभ्यश्च'[2]	ठञ्-ञिठ्	कास्तीरिकी-कास्तीरिका
'धन्वयोपधाद्वुञ्'[3]	वुञ्	ऐरावतकः
'प्रस्थपुरवाहन्ताच्च'[4]	,,	मालाप्रस्थकः, नान्दीपुरकः
'रोपधेतोः प्राचाम्[5]'	,,	पाटलिपुत्रकाः, ऐकचक्रकाः
'जनपदतदवध्योश्च[6]'	,,	आदर्शकः, त्रैगर्तकः
'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः[7]'	णिनिः	काश्यपिनः
'शौनकादिभ्यश्छन्दसि'[8]	,,	शौनकिनः, वाजसनेयिनः
अवृद्धादणि बहुवचनविषयात्[9]' |अण्छयोरपवादः|	वुञ्	आङ्गकः, वाङ्गकः
'कच्छाग्निवक्त्रगर्तोत्तरपदात्[10]' [छाणोरपवादः]	,,	दारुकच्छकः, काण्डाग्नकः

'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः[11]' णिनिः पाराशरिणो भिक्षवः इति।
[छाणोरपवादः]

एष्वपि 'इञश्च' इति शास्त्रस्य निषेधरुपापवादशास्त्रं वर्तते, 'न द्व्यचः प्राच्यभरतेषु[12]' इति। तेन प्रोष्ठेः छात्राः प्रौष्ठीयाः इत्यत्र छप्रत्यय एव जातः।

एवमेव छप्रत्ययमपवाद्य प्रवर्तमानस्य वुञ्विधायकस्य 'जनपदतदवध्योश्चेति' विशेषशास्त्रस्यात्यपवादभूतं शास्त्रद्वयमुपतिष्ठते, 'मद्रवृज्योः कन्[13]' 'कोपधादण्[14]' इति। तेन मद्रेषु जातः मद्रकः ऋषिकेषु जातः आर्षिकः इत्यादौ कनणौ भवतः।

तदित्थं शैषिकेषु 'वृद्धाच्छः, इति शास्त्रस्यापवादशास्त्राण्यपि विवेचितानि।

---

१. पा० सू० ४।२।११५
२. पा० सू० ४।२।११७
३. पा० सू० ४।२।१२१
४. पा० सू० ४।२।१२२
५. पा० सू० ४।२।१२३
६. पा० सू० ४।२।१२४
७. पा० सू० ४।२।१०३
८. पा० सू० ४।३।१०६
९. पा० सू० ४।२।१२५
१०. पा० सू० ४।२।१२६
११. पा० सू० ४।३।११०
१२. पा० सू० ४।२।११३
१३. पा०सू० ४।२।१३१
१४. पा० सू० ४।२।१३२

एवमग्रे अर्घेजातः अर्घ्यः इत्यत्र 'अर्धाद्यत्' इति सूत्रेण प्रवर्त्तमानस्य यत् प्रत्ययस्य "ग्रामजनपदैकदेशादञ्ठञौ[१]" इति विशेषशास्त्रेण भवति बाधः। तेन ग्रामस्य पूर्वस्मिन्नर्धे जनपदस्य वा पूर्वस्मिन्नर्धे भवाः इत्यर्थे अञि ठञि च पौवर्ार्धाः पौर्वार्धिकाः इति रूपद्वयं सिध्यति।

एवं मध्यमः इत्यत्र मध्ये जातः इत्यर्थे 'मध्यान्मः' इति विशेषशास्त्रेण अण् प्रत्ययमपवाद्य म प्रत्ययो विधीयते। अस्य 'मध्यान्मः' इति शास्त्रस्यापि अपवादशास्त्रमस्ति 'असाम्प्रतिके[२]' इति। अनेन साम्प्रतिके अर्थाद् उत्कर्षापकर्षहीनत्वात्मकसाम्ये वाच्ये म प्रत्ययमपवाद्य अकारप्रत्ययो विधीयते। तेन नातिदीर्घेनातिह्रस्वे काष्ठे 'मध्यं' काष्ठं, तथा नात्युत्कृष्टो नात्यवकृष्ट· वैयाकरणो मध्यो वैयाकरण इत्यत्र मध्यशब्दाद् अप्रत्यय एव विधीयते न तु मप्रत्यय इति भावः।

एवमग्रे 'कालाट्ठञ्' इति विशेषशास्त्रस्यापवादशास्त्रमस्ति 'संधिवेलाद्यृतुनक्षत्रेभ्योऽण्[३]' इति। अनेन संधिवेलायां भवं संधिवेलम्, सन्ध्यायां भवं सान्ध्यम, शिशिरे भव शैशरम्, पुष्ये भवं पौषमित्यत्र ठञ् प्रत्ययमपवाद्य अण् प्रत्ययो विधीयते।

अस्य पुन· "संधिवेलाद्यृतुनक्षत्रेभ्योऽण्" इत्यापवादशास्त्रस्यापवादशास्त्राणि द्वादश मिलन्ति। तेषां परिचयश्च सोदाहरणमेवं विद्यते—

श्राद्धे शरदः"[४]	ठञ्	शारदिकम्
विभाषारोगातपयोः"[५]	ठञ्	शारदिको रोगः
प्रावृष एण्यः"[६]	एण्य	प्रावृषेण्यः
वर्षाभ्यष्ठक्"[७]	ठक्	वार्षिकं वासः
वसन्ताच्च"[८]	ठञ्	वासन्तिकम्
हेमन्ताच्च"[९]	ठञ्	हैमन्तिकम्
संज्ञायां शरदो वुञ्"[१०]	वुञ्	शारदकाः दर्भविशेषाः
ग्रीष्मवसन्तादन्यतरस्याम्"[११]	वुञ्	ग्रैष्मकम् ग्रैष्मम्
ग्रीष्मावरसमाद्वुञ्"[१२]	वुञ्	ग्रैष्मकम्, आवरसमकम्

१. पा० सू० ४।२।७
२. पा० सू० ४।३।९
३. पा० सू० ४।३।१६
४. पा० सू० ४।३।१२
५. पा० सू० ४।३।१३
६. पा० सू० ४।३।१७
७. पा० सू० ४।३।१८
८. पा० सू० ४।३।२०
९. पा० सू० ४।३।२१
१०. पा० सू० ४।३।२७
११. पा० सू० ४।३।४६
१२. पा० सू० ४।३।४९

अमावास्याया वा"[1]	वुन्	अमावास्यकः, अमावास्यः
अच"[2]	अ	अमावास्यः
संवत्सराग्रहायणीभ्यां ठञ्च"[3]	ठञ्, वुञ्,	साम्वत्सरिकम्, साम्वत्सरकम्

अत्र "श्राद्धे शरदः' इति सूत्रादारभ्य ग्रीष्मवसन्तादन्यतरस्यमिति नव विशेषसूत्राणां प्रवृतिस्तावद् ऋतुत्वात् सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" इति शास्त्रविहताण् प्रत्ययमपवाद्य भवतीति तत्तद् विशेषशास्त्रोदाहरणैः स्पष्टमवगम्यते। "अमावस्याया वा" "अच" "संवत्सराग्रहायणीभ्यां ठञ्चेति शास्त्रत्रयस्य प्रवृत्तिश्च संधिवेलादिगणपाठात् प्राप्तपूर्वोक्ताण् प्रत्ययं प्रबाध्य भवतीत्येवं "कालाट्ठञ्" इति शास्त्रापवादभूतस्य "संधिवेलाद्यृतुनक्षत्रेभ्योऽण्" इति शास्त्रस्यापि द्वादशापवादशास्त्राणां परिचयो जातः।

एष्वपि 'प्रावृषएण्यः' इत्यस्यापवादशास्त्रं वर्त्तते 'प्रावृषष्ठप्[4]' इति। तेन प्रावृषि जातः इत्यर्थे ठपि 'प्रावृषिक' इति रूपं सिध्यति। एतावता प्रावृषि भवः प्रावृषेण्यः, प्रावृषि जातः प्रावृषिक इति विषयभेदोऽप्यत्र दर्शितः।

तदेवं 'कालाट्ठञ्' इति विशेषशास्त्रापवादभूतस्य 'सन्धिवेलाद्दतुनक्षत्रेभ्योऽण्' इति शास्त्रस्यापवादभूतानि शास्त्राण्युपवर्णितानि।

इतोऽन्यदपि 'कालाट्ठञ्' इति शास्त्रस्यापवादभूतं शास्त्रद्वयं दृश्यते। तत्र तावद् 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इति शास्त्रेण ठञ्-प्रत्ययस्य पाक्षिकोऽपवादः पूर्वाह्णेतनम्, अपराह्णेतनम् इत्यत्र ट्युट्युलाभ्यां भवति। तेन प्राह्णे जातः अपराह्णे जातः इत्याद्यर्थे ट्युट्युलौ भवतस्तयोस्तुडागमे च एतद् रूपद्वयं सिद्ध्यति। पक्षे पौर्वाह्णिकम्, आपराह्णिकम् इत्यपि भवति।

एवम् आश्वयुज्यामुप्ताः इत्यर्थे 'उप्ते च[5]' इति सामान्यशास्त्रप्राप्ताण्प्रत्ययापवादभूतस्य 'कालाट्ठञ्' इति विशेषशास्त्रविहितठञ्-प्रत्ययस्यापवादकं ततोऽपि विशेषशास्त्रमस्ति 'आश्वयुज्या वुञ्[6]' इति। अतोऽत्र वुञि सति आश्वयुजका माषा इति सिद्ध्यति।

---

१. पा० सू० ४।३।३०
२. पा० सू० ४।३।३१
३. पा० सू० ४।३।३५०
४. पा० सू० ४।३।२६
५. पा० सू० ४।३।४४
६. पा० सू० ४।३।४५

इत्थञ्च जाताद्यर्थे सामान्यशास्त्रविहितशैषिकाण्प्रत्ययापवादभूतस्य 'कालाट्ठञ्' इति विशेषशास्त्रस्यापवादभूतानि 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' 'विभाषा पूर्वाह्णापराह्णाभ्याम्' 'आश्वयुज्या वुञ्' इति त्रीणि शास्त्राणि विवेचितानि ।

अपि च शेषाधिकारस्थविशेषशास्त्रसंगृहीतेषु 'शरीरावयवाच्च' इति यद् विधायकविशेषशास्त्रेण 'तत्रभवः' इति सामान्यशास्त्रविहिताण् प्रत्ययस्य बाधो भवति । तेन दन्तेषु भवं दन्त्यम्, कण्ठे भवं कण्ठ्यम्, इत्यत्र यत् प्रत्यय एव दृश्यते नत्वण् प्रत्ययः । किन्त्वस्य 'शरीरावयवाच्च' इति विशेषशास्त्रस्याप्यपवादभूतानि 'ग्रीवाभ्योऽण् च[१]' 'जीह्वामूलाङ्गुलेश्छ[२]' 'कर्णललाटात्कनलंकारे[३]' इति त्रीणि विशेषशास्त्राणि वर्त्तन्ते । तेन ग्रीवासु भवं ग्रैवम् इत्यत्र अण्, जीह्वामूले भवं जीह्वामूलीयम् इत्यत्र छः, कर्णयोः ललाटे च भवः अलङ्कार इत्यर्थे कनि च कर्णिका, ललाटिका इत्येवं यत्प्रत्ययस्यापि अण् छकन् प्रत्ययैरपवादो दृश्यते । कर्णिका ललाटिकेत्यत्र स्त्रीत्वव्यवहारस्तु लोकादेव सिद्धः । तथा च लिङ्गानुशासनविषये 'स्त्रियाम्' इति सूत्रे भाष्ये प्रोक्तवान् महर्षिः पतञ्जलिः 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति[४]' । अस्तु !

शेषाधिकारस्थस्य 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः[५]' 'तत्रभवः' इति सामान्यसूत्राभ्यां प्राप्तस्य अण्प्रत्यस्यस्य च बह्वचोऽन्तोदात्ताट्ठञ्' इति विशेषशास्त्रविहितठञ् प्रत्ययेन बाधो भवति । तेन षत्वणत्वस्य व्याख्यानः षत्वणत्वे भवइत्यर्थे ठञि सति 'षात्वणत्विकः इति प्रयोगः सिध्यति । अस्य ठञ् प्रत्ययविधायकविशेषशास्त्रस्याप्यपवादशास्त्रं विद्यते–'अणृगयनादिभ्य[६]' इति । तेन ऋगयनस्य व्याख्यानः, तत्रभवो वा इत्यर्थे अणि आर्गयणः इति रूपं निष्पद्यते ।

एवं स्रुघ्नादागतः 'स्रौघनः' इत्यत्र 'तत्र आगतः' इति शेषाधिकारस्थ सामान्यशास्त्रेण अण्प्रत्ययो विधीयते । एषोऽण प्रत्ययश्च शुल्कशालाया आगतः शौल्कशालिकः इत्यत्र ठक्प्रत्ययविधायकेन 'ठगायस्थानेभ्यः' इति विशेषशास्त्रेणापवाद्यते । किन्तु शुण्डिकादागतः शौण्डिकः इत्यत्र ततोऽपि

१. पा० सू० ४।३।५७
२. पा० सू० ४।३।६२
३. पा० सू० ४।३।६५
४. पा० सू० ४।१।३ म भा.
५. पा० सू० ४।३।६६
६. पा० सू० ४।३ ७३

विशेषशास्त्रेण 'शुण्डिकादिभ्योऽण्'[1] इत्यनेन ठक् प्रत्ययमपवाद्य अण्प्रत्ययो विधीयते । एषोऽण्प्रत्ययश्च न केवलं ठक्प्रत्ययस्यापवादकः, अपितु कृकणादागतः कार्कण इत्यत्र 'कृकणपर्णाद्भारद्वाजे'[2] इति विशेषशास्त्र-विहितछप्रत्ययस्याप्यपवादकः यतोहि भारद्वाजदेशविशेषवाच्ये 'कृकणपर्णाद्-भारद्वाजे' इतिसूत्रेण छप्रत्ययो भवति । शुण्डादिगणपठितकृकणशब्दस्तु भारद्वाजदेशविशेषबोधकत्वे सति आयस्थानवाचकोऽप्यस्ति, अतस्ततोऽपि विशेषेण 'शुण्डिकादिभ्योऽण्' इत्यनेन छप्रत्ययस्य बाधः स्वीक्रियते । तथा धूमादिगणपठितदेशवाचितीर्थशब्दात् भवार्थे 'धूमादिभ्यश्चे' तिशास्त्रेण वुञि सति तैर्थिक इति रूपं निष्पद्यते, किन्तु 'शुण्डिकादिगणतीर्थशब्दात्तु आयस्थानस्यापि बोधकत्वात् आगतार्थे 'शुण्डिकादिभ्योऽण्' इति शास्त्रेण अण एव भवति वुञ् प्रत्ययमपवाद्य । अत एव सिद्धान्तकौमुद्यां 'शुण्डि-कादिभ्योऽण्' इति सूत्रव्याख्याने आयस्थानठकश्छादीनां चापवाद इत्युक्तं भट्टोजिदीक्षितमहाभागैरपि ।

एवमग्रे उपाध्यायात् पितामहाच्चागतमित्यर्थे 'तत आगत' इति सामान्यशास्त्रेण प्राप्ताणप्रत्ययमपवाद्य 'विद्यायोनिसम्बन्धेभ्यो वुञ्' इति विशेषशास्त्रेण वुञि सति औपाध्यायकम्, पैतामहकमित्यादि पदानि सिध्यन्ति । होतुरागतम्, भ्रातुरागतमित्यर्थे हौतृकम्, भ्रातृकमित्यत्र तु विद्यायोनिसम्बन्धात् प्राप्तवुञ्प्रत्ययस्यापि 'ऋतष्ठञ्'[3] इति विशेष-शास्त्रेण बाधो भवतीति शास्त्रत्रयस्यापवादक्रमो दृश्यते ।

किञ्च आपिशलिनाप्रोक्तम् आपिशलिकम् व्याकरणमित्यादौ शेषाधि-कारस्थेन "तेन प्रोक्तमिति" सामान्यशास्त्रविहिताण्प्रत्ययस्य सार्थक्यं समुपलभ्यते । अतः "कलापि वैशम्पायनान्तेवासिभ्यश्चेति विशेषशास्त्रेण तदपवाद्येत । तेन हरिद्रुणाप्रोक्तमधीयते हारिद्रविण, आलम्बिना प्रोक्तम-धीयते इत्यर्थे च आलम्बिन इत्यादौ णिनिरेव भवति । एते चोदाहरणे यथाक्रमं कलाप्यन्तेवासिनां वैशम्पायनान्तेवासिनांस्तः । अनयोः कलापि वैशम्पायनान्तेवासिनः पूर्णपरिचयस्तु काशिकावृतावेवमुक्तः—

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरु ।
उलपेन चतुर्थेन कालापकमिहोच्यते ॥
आलम्बिश्चरकः प्राचां पलङ्गकमलावुभौ ।
ऋचाभारुणिताण्डयाश्च मध्यमीयास्त्रयोऽपरे ॥
श्यामायन उदीच्येषु उक्तः कण्ठकलापिनोः ।

१. पा० सू० ४।३।७६ २. पा० सू० ४।३।१४५ ३. पा० सू० ४।३।७८

एभ्यः प्रोक्तार्थे सामान्यशास्त्रप्राप्तमण् प्रत्ययमपवाद्यानेन विशेषशास्त्रेण णिनि विधीयते। अस्य णिनेर्विधायकस्य "कलापि वैशम्पायनान्तेवासिभ्यश्चेति विशेषशास्त्रस्याप्यपवादशास्त्रे द्वे स्तः। तत्र कलापिना प्रोक्तमधीयते इत्यर्थे कलापिनो वैशम्पायनान्तेवासित्वात् प्राप्तणिनिप्रत्ययमपवाद्य "कलापिनोऽण्"[1] इतिविशेषशास्त्रेण अण्विधीयते। ततश्च कालापाः इतिपदं साधु भवति। छगलिना प्रोक्तमधीयते इत्यर्थे तु छगलिनः कलाप्यन्ते वासित्वात् प्राप्तस्य णिनेः "छगलिनो ढिनुक्"[2] इति विशेषशास्त्रेण भवति बाधः। छागलेयिनः इति रूपं सिध्यति।

एवं तस्येदमिति सामान्यशास्त्रविहिताण्प्रत्ययस्य 'गोत्रचरणाद्वुञ्' इति विशेषशास्त्रेण बाधो भवति। तेन ग्लुचुकायनेरिदमित्यर्थे वुञि सति 'ग्लौचुकायनकम्' इति प्रयुज्यते। किन्तु रैवतिकस्येदमिति विग्रहे 'रैवतिकादिभ्यश्छः[3]' इति विशेषशास्त्रेण 'गोत्र रणाद्वुञ्' इति शास्त्रं प्रबाध्यते। अतः छप्रत्यये सति रैवतिकीयमितिव्यवह्रियते।

अपि चास्य वुञ्विधायकस्य 'गोत्रचरणाद्वुञ्' इति शास्त्रस्य 'कौपिञ्जलहस्तिपदादण्[4]' 'आथर्वणिकस्येकलोपश्च[5]' इति विशेषशास्त्रद्वयं पठ्यते। तेन तावत् कौपिञ्जलस्यायमित्यर्थे हास्तिपदस्यायमित्यर्थे गोत्रत्वात् प्राप्तवुञ्प्रत्ययमपवाद्य अणि सति कौपिञ्जलः हास्तिपदः इति रूपद्वयं साध्यते। आथर्वणिकस्यायमाथर्वणो धर्मः इत्यत्र तु चरणत्वात् प्राप्तस्य वुञ् प्रत्ययस्यापवाद इति सेनं गोत्रचरणाद्वुञ् इति विशेषशास्त्रस्यापि विशेषभूतानि 'रैवतिकादिभ्यश्छ[6]' कापिञ्जलहस्तिपदादण्' आथर्वणिकस्येकलोपश्चेति त्रीणि शास्त्राणि व्याख्यातानि।

तदित्थं 'शेषे' इति सामान्यविधिशास्त्रेण ग्रहणक्षुणाद्यर्थेषु शेषाधिकारेषु—'तत्र जातः[7]' 'प्रायभवः[8]' 'सम्भूते[9]' 'उप्ते[10]' देयमृणे[11]' 'तदस्य सोढम्[12]' 'तत्रभवः[13]' 'तस्य च व्याख्यन इति चव्याख्यातव्य-

१. पा० सू० ४।३।१०८
२. पा० सू० ४।३।१०९
३. पा० सू० ४।३।१३१
४. पा० सू० ४।३।१३२
५. पा० सू० ४।३।१३३
६. पा० सू० ४।३।१३१
७. पा० सू० ४।३।२५
८. पा० सू० ४।३।३९
९. पा० सू० ४।३।४१
१०. पा० सू० ४।३।४४
११. पा० सू० ४।३।४७
१२. पा० सू० ४।३।५२
१३. पा० सू० ४।३।५३

नाम्नः[१]' 'तत आगत[२]' 'प्रभवति[३]' 'अधिकृत्यकृतेग्रन्थे[४]' सोऽस्य निवासः[५]' 'अभिजनश्च[६]' 'भक्तिः[७]' 'तेन प्रोक्तम्[८]' 'तेनैकदिक[९]' 'उपज्ञाते[१०]' कृते ग्रन्थे[११]' तस्येदमित्येकोनविंशतिजाताद्यर्थेषु च सान्यशास्त्रैर्विधीयमानाण् प्रत्ययस्य तत्तद्विशेषशास्त्रै र्यथापवादो भवति। स विशेषापवादक्रमश्चात्र विवेचितः।

विकारार्थकप्रत्ययेषूत्सर्गापवादत्वम्

शैषिकप्रत्ययसम्बन्धितसामान्यविशेषशास्त्राणां विवेचनान्तरं विकारार्थकप्रत्ययसम्बन्धिसामान्यविशेषशास्त्रक्रमनिरूपणं पुरस्सरति। "प्राग्दीव्यतोऽण्" इति सूत्रस्थाण् प्रत्ययस्याधिकारश्च प्राग् व्याख्यातः। स च विकारार्थकप्रत्ययेष्वपि सामान्यतो वर्त्तत एव। अतो विशेषशास्त्रैः तदपवादोऽपि भवति। महर्षिपाणिने शब्दानुशासनस्योत्सर्गापवादरूपैषा राजपद्धतिश्च सति पर्यालोचने सर्वत्र सुगमा भवति। अत्रतावत "तस्य विकारः[१२]" इति सामान्यशास्त्रेण अस्मनो विकार आश्मः, भस्मनो विकारः भास्मनः, मृत्तिकाया विकारः मार्तिकः प्रभृतिष्वणि सति रूपाण्येतानि सिध्यन्ति। तत्र आश्म इत्यत्र अस्मनो विकारे टिलोपो वक्तव्य[१३]' इति विशेषवार्तिकेन टिलोपो जायते। सामान्यतस्तु असति विशेषानुशासनेऽणि प्रत्यये परे "अन्[१४]" इति शास्त्रेण भास्मनः इत्यादौ प्रकृतिभाव एव दृश्यते। प्रकृते च विकारार्थकप्रत्ययेन सह कुत्रचिदवयवार्थकप्रत्ययानां सम्बन्धोऽपि विद्यते। अत एव' अवयवे च 'प्राण्योषधिवृक्षेभ्यः[१५]' इत्यनेन मयूरस्यावयवो विकारो वा, मुर्वाया अवयवो विकारो वा, तथा पिप्लस्यावयवो विकारो वेत्युभयार्थे औत्सर्गिकाण् प्रत्यये सति मायूरः, मौर्वः, पैप्लश्चेत्यादीनि पदानि सिध्यन्ति।

अनयोः 'तस्य विकारः' 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति सामान्यशास्त्रयो विशेषभूतानि विभिन्नप्रत्ययविधायकानि शास्त्राणि चाधोलिखितानि सन्ति—

---

१. पा० सू० ४।३।६६
२. पा० सू० ४।३।७४
३. पा० सू० ४।३।८४
४. पा० सू० ४।३।८७
५. पा० सू० ४।३।८९
६. पा० सू० ४।३।९०
७. पा० सू० ४।३।९५
८. पा० सू० ४।३।१०१
९. पा० सू० ४।३।११२
१०. पा० सू० ४।३।११५
११. पा० सू० ४।३।११६
१२. पा० सू० ४।३।१३४
१३. पा० सू० ४।३।१३४
१४. पा० सू० ६।४।१६७
१५. पा० सू० ४।३।१३५

'गोश्च पुरीषे[१]'	मयट्	गोमयम्
'पिष्टाच्च[२]'	मयट्	पिष्टमयग्भस्म
'असंज्ञायां तिलयवाभ्याम्[३]'	मयट	तिलमयम्, यवमयम्
'क्रीतवत् परिमाणात[४]'	ठञ्	नैष्कक
'ओरञ्[५]'	अञ्	दवदारवम माद्रदारवम्
'अनुदात्तादेश्च[६]'	अञ्	दाधित्थम् कापित्थम्
'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः[७]'	मयट्	आश्मयम्, आश्मनम्
'नित्यं वृद्धशरादिभ्यः[८]'	मयट्	आम्रमयम् शरमयम
'उमोर्णयोर्वा[९]'	वुञ्	औमकम्, औमम् और्णकम्, और्णम्
'कंसीयपरशव्ययो यञ् ञौलुक् च[१०]'	अञ्	कांस्यम् पारशवः
प्राणिरजतादिभ्योऽञ्[११]	अञ्	शौकम् बाकम्

एषामौत्सर्गिकप्रत्ययापवादकशास्त्राणामप्यपवादभूतानि शास्त्राणि कानिचित् समुपलभ्यन्ते । तत्र तावत् 'तस्य विकारः' इति शास्त्रस्यापवादभूतं विशेषशास्त्रमस्ति 'पिष्टाच्च' इति। अनेन हि पिष्टस्य विकारः पिष्टमयं भस्म इत्यत्र मयट् प्रत्ययो दृश्यते । अस्य विकारार्थकमयट् प्रत्ययस्यापि 'संज्ञायां कन्[१२]' इति विशेषशास्त्रेण बाधो भवति। अतः पिष्टस्य विकारः पिष्टकः इत्यत्र कन् प्रत्ययो जातः। पिष्टको हि अपूपार्थे प्रसिद्धः । तथाचोक्तं 'अमरकोषे' 'पूपोऽपूप पिष्टकः स्यादिति[१३]' ।

विकारावयवार्थयोश्च 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति सामान्यशास्त्रेण प्राप्तस्याण् प्रत्ययस्य 'अनुदात्तादेश्च' इति शास्त्रेण बाधो भवति। तेन दधित्थस्य, कपित्थस्य च अवयवो विकारो वेत्यर्थे दाधित्थम्, कापित्थम् इत्यत्र अञ् प्रत्ययो विहितः । यद्यपि अणि अञि च कृते नास्ति पदस्वरूपभेदः, तथापि स्वरभेदमभिलक्ष्य भवति अणञोः परस्परं बाध्यबाधकभाव इति सिद्धान्तः ।

---

१. पा० सू० ४।३।१४५
२. पा० सू० ४।३।१४६
३. पा० सू० ४।३।१४६
४. पा० सू० ४।३।१५६
५. पा० सू० ४।३।१३९
६. पा० सू० ४।३।१४५
७. पा० सू० ४।३।१४५
८. पा० सू० ४।३।१४५
९. पा० सू० ४।३।१५८
१०. पा० सू० ४।३।१६८
११. पा० सू० ४।३।५४
१२. द्वि० का० व० ४८
१३. पा० सू० ४।३।१५५

पुनः दाधित्थस्य कापित्थस्य विकारोऽवयवो वेत्यर्थे तु 'नित्यं वृद्धशरादिभ्य' इत्यनेन वृद्धत्वात् प्राप्तस्य मयटः 'ञितश्च तत्प्रत्ययात्[१]' इति विशेषशास्त्रविहिताञा बाधो भवति। तेन दाधित्थम्, कापित्थम् इति रूपमेव तदर्थेऽपि निष्पद्यते। अस्तु !

अस्याञविधायकस्य अनुदात्तादेश्च' इति विशेषशास्त्रस्य च 'शम्या ष्लञ्[२] 'तालादिभ्योऽण्' विल्वादिभ्योऽण्' इति त्रीण्यपवादशास्त्राणि विद्यन्ते। अतः शम्याः विकार[३]' शामीली स्रुक् इत्यत्र ष्लञ्प्रत्ययः श्रूयते। अत्रापि पुनः शामीलस्य विकारोऽवयवो वेवृद्धत्वात् प्राप्तस्य मयटः' ञितश्च तत्प्रत्ययात्' इत्यनेन बाधो भवत्येव। प्रकृते – ऐन्द्रायुधम् इत्यत्र 'तालादिभ्योऽण्' इति विशेषशास्त्रेण 'अनुदात्तादेश्च' इतिशास्त्रस्यापवादो भवति। तालं धनुः दत्यत्र तु 'नित्यं वृद्धशरादिभ्य.' इति शास्त्रविहितस्य मयट्प्रत्ययस्यापवाद इति विवेकः। ततश्चाञ् मयटोरुभयोर्बाध-'स्तालादिभ्योऽण्' इति योगेन दृष्टः।

एवमेव विल्वस्यावयवो विकारो वेत्यर्थे 'विल्वादिभ्योऽण्' इति विशेषशास्त्रविहिताण्प्रत्ययेन वृक्षत्वात् प्राप्ताञ् प्रत्ययस्य स्वरार्थं बाधो भवति। तत्र विल्वादिगणपठितगवेधुक् शब्दस्य विषये चैष प्रश्नो जागर्ति यद् गवेधुक इत्यत्र तु 'कोपधाच्च' इति शास्त्रेणाप्यण् प्रत्ययः सेत्स्यति, पुनरस्य विल्वादिगणे पाठः किमर्थ इति ? विकारार्थेऽवयवार्थे वा प्राप्तस्य मयट् प्रत्ययस्य बाधनार्थमत्र गणे पाठ इति तत्समाधानं क्रियते। तथाचोक्तं वासुदेव दीक्षितमहाभागैः सिद्धान्तकौमुद्याः बालमनोरमायाम्—तत्र गवेधुकस्य 'कोपधाच्च' इत्यणिसिद्धे मयटो बाधनार्थमिहपाठ इति'। गवेधुक् पदेन मुन्यन्न विशेष एव बोध्यते। अतः ओषधित्वात् प्राप्तस्य मयटो बाध इति मतम्।

पुनरत्र 'नित्यं वृद्धशरादिभ्यः' इति शास्त्रविहितमयट्प्रत्ययस्य 'जातरूपेभ्यः परिमाणे[४]' इति ततोऽपि विशेषशास्त्रबिहिताण्प्रत्ययेनापवादो भवति। तेन जातरूपवाचिभ्यः परिमाणे हाटकस्य, तापनीयस्य वा निष्कपरिमाणको विकार इत्यर्थे हाटकः, तापनीयो वा'निष्कः' इत्यत्र वृद्धत्वात् प्राप्तस्य मयटो बाधो जातः। सुवर्णस्य निष्कपरिमाणको विकारः सौवर्णोनिष्कः इत्यत्र तु 'अनुदात्तादेश्च' इति शास्त्रविहिताञ्प्रत्ययोऽप्यो नेनापवाद्यते इत्यञ् मयटोरुभयोरप्यपवादकमिदं शास्त्रमिति मन्तव्यम्।

१. पा० सू० ४।३।१४२
२. पा० सू० ४।३।१५०
३. पा० सू० ४।२।१३६
४. पा० सू० ४।३।१५३

अपि च उवर्णान्तात् प्रातिपदिकाद् विकारावयवार्थकयोः अञ्प्रत्ययस्य-विधानम् 'ओरञ्' इति शास्त्रेण भवति। तेन देवदारोः मद्रदारोश्चावयवो विकारो वेत्यर्थे 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इतिशास्त्रेण प्राप्तमण्प्रत्ययमपवाद्य स्वरार्थमञ्प्रत्ययो जातः। अस्य 'ओरञ्' इतिविशेषशास्त्रस्यापि—

'कोपधाच्च[१]'	अण्	तार्कवम्, तैतिडीकम्
'त्रपुजतुनोः षुक्[२]'	अण्	त्रापुषम् जातुषम्
'प्लक्षादिभ्योऽण्[३]'	अण्[४]	कार्कन्धवम्
'द्रोश्च[५]'	यत्	द्रव्यम्

इति चत्वारि अपवादशास्त्राणि वर्त्तन्ते। एषु 'द्रोश्च' इति सूत्रं विहाय कोपधाच्चेत्यादित्रिभिः शास्त्रैरञ्प्रत्ययमपवाद्य अण्प्रत्ययो विधीयते। 'द्रोश्च' इति विशेषशास्त्रेग तु द्रुर्वृक्षः तस्य विकारोऽवयवो वेत्यर्थे यत् प्रत्ययो विधीयते। तेन द्रव्यमिति रूपं सिध्यति।

अनेन हि 'ओरञ्' इति शास्त्रविहिताञ्प्रत्ययस्य 'एकाचोऽनित्यम्[६]' इति वार्त्तिकविहितमयट्प्रत्यस्य चापवादः क्रियते। अस्य 'द्रोश्च' इति विशेषशास्त्रस्याप्यपवादशास्त्रं विद्यते 'माने वयः[७]' इति। तेन द्रुवयमित्यत्र तु द्रुशब्दान्माने विकारे गम्ये वयप्रत्यय एव दृश्यते। एवमग्रे 'अवयवेच प्राण्योषधिवृक्षेभ्यः' इत्यनेन प्राणित्वात् शौकम्, बाकम्, इत्यत्रापि अण् प्रत्ययस्य प्राप्तिरासीत्, किन्तु तदपवाद्य 'प्राणिरजतादिभ्योऽञ्' इति विशेषशास्त्रेण स्वरार्थमञ् प्रत्ययो विहितः। उष्ट्रस्यावयवो विकारो वेत्यर्थे तु प्राणित्वात् प्राप्तस्य अस्याञ्प्रत्ययस्यापि 'उष्ट्राद्वुञ्[८]' इतिततोऽपि विशेषशास्त्रेण बाधो भवति। तेन 'औष्ट्रक इति पदं निष्पद्यते।

किञ्च 'एण्याढञ्[९]' इति शास्त्रेणाप्येष प्राण्यञ् प्रत्ययोऽपवाद्यते। तेन एण्याः विकारो अवयवो वेत्यर्थे ऐणेयं मांसमिति प्रयुज्यते। राजतम् इत्यत्र तु रजतस्य विकारो अवयवो वेत्यर्थे 'अनुदात्तादेश्च' इत्यनेनापि

१. पा० सू० ४।३।१३७
२. पा० सू० ४।३।१३८
३. पा० सू० ४।३।१६४
४. पा० सू० प्लाक्षमित्यत्र तु अनुदात्तत्वाद्, अनुदात्तादेश्च इति प्राप्तस्या ञोऽपवादोबोध्यः
५. पा० सू० ४।३।१६१
६. पा० सू० ४।३।१४४
७. पा० सू० ४।३।१६२
८. पा० सू० ४।३।१५७
९. पा० सू० ४।३।१५९

अञि सिद्धे पुनरत्राञ् विधानं तु मयट् बाधनार्थमेव व्याख्यातम् । तथा च काशिकावृत्तावुक्तम् - रजतादिषु येऽनुदात्तादयः पठ्यन्ते-रजतकण्टकारप्रभृतयस्तेभ्योऽञि सिद्धे पुनर्वचनं मयड् बाधनार्थमिति । एतावता प्राणिरजतादिभ्योऽञ् इति शास्त्रेण अण् मयटोरपवादः संसिद्धः :

तदित्थमिह विकारार्थकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादक्रमश्चिन्तितः ।

प्राग्वहतीय प्रत्ययानामुत्सर्गापवादत्वम्

इतः पूर्वं तद्धितप्रत्ययेषु 'प्राग्दीव्यतोऽण्' इत्यधिकारस्थ प्रत्ययानामुत्सर्गापवादक्रमोविचारितः । तत्र च सामान्यतोऽण्प्रत्ययविधायकशास्त्राणामौत्सर्गिकत्वम् अन्येषाञ्चापवादकत्वमित्यवगतम् । अत्र ठक्प्रत्ययाधिकारस्थप्रत्ययानामुत्सर्गापवादत्वं विविच्यते ।

ठक्प्रत्ययाधिकारश्च 'तेन दीव्यति खनति जयति जितम्"[1] इति सूत्रमादाय 'तद्वहति रथयुगप्रासङ्गम्"[2] इति सूत्रात् प्रागस्तीति "प्राग्वहतेष्ठक्"[3] इति शास्त्रेण सूच्यते। अत एवास्य ठक् प्रत्ययाधिकारस्य नाम प्राग्वहतीयप्रकरणमिति सिद्धान्तकौमुद्यां जातम् । अत्र ठक् प्रत्ययाधिकारोऽपि पूर्वोक्ताण्प्रत्ययाधिकारवत् ठक्प्रत्यय एव दीव्यति संस्कृताद्यर्थेषु विधीयते। क्वचिच्चैष ठक् प्रत्ययः तत्तद्विशेषभूतप्रत्ययविधायकशास्त्रैश्चापवाद्यते । प्रकरणेऽस्मिन् प्रत्यय विधायकशास्त्राणां प्रवृत्तिश्चानेकार्थेषु दृश्यते । तस्मादतोऽत्र विभिन्नेष्वर्थेषु ठक् प्रत्ययस्यौत्सर्गिकत्वम्, अन्येषां चापवादकत्वं प्रति फलति । अतस्तेषां समेषां विवरणमिहसोदाहरणम् प्रस्तूयते ।

"संस्कृतम्"[4]	दध्ना संस्कृतम् ठक्	दाधिकम्
"कुलत्थकोपधादण्"[5]	कुलत्थैः संस्कृतम् अण्	कौलत्थम्
"तरति"[6]	उडुपेन तरति ठक्	औडुपिकः
"गोपुच्छाट्ठञ्"[7]	गोपुच्छेन तरति ठञ्	गौपुच्छिकः
"नौद्व्यचष्ठन"[8]	नावा चरति ठन्	नाविकः

१. पा० सू० ४।४।२
२. पा० सू० ४।४।७६
३. पा० सू० ४।४।१
४. पा० सू० ४।४।३
५. पा० सू० ४।४।४
६. पा० सू० ४।४।५
७. पा० सू० ४।४।६
८. पा० सू० ४।४।७

"चरति"[१]	दध्ना चरति भुक्ते ठक्	दाधिक:
"आकर्षात्ष्ठल्"[२]	आकर्षेण चरति ष्ठल्	आकर्षिक:
"पर्पादिभ्यष्ठन्"[३]	पर्पेण चरति	पर्पिकी
"स्वगणाट्ठञ् च"[४]	स्वगणेन चरति ठञ् ष्ठन्	स्वागणिक:, स्वागणिकी

'वेतनादिभ्योजीवति[५]' वैतनेन जीवति ठक् वैतनिक: "वस्नक्रय-विक्रयाट्ठन्"[६] वस्नेन मूल्येन जीवति ठन् वास्निक:, आयुधाच्छच"[७] आयुधेन जीवति छ, ठन् आयुधीय:, आयुधिक:, हरत्युत्सङ्गादिभ्य:"[८] उत्सङ्गेन हरति ठक् औत्सङ्गिक:, भस्त्रादिभ्य: ष्ठन्"[९] भस्त्रया हरति ष्ठन् भस्त्रिक:, भास्त्रिकी, विभाषा विवधवीवधात्"[१०] विवधेन हरति ष्ठन् वैवधिक:, वैवधिकी, अणकुटिलिकाया:"[११] कुटिलिकया हरति अण् कौटिलिको व्याध:, निर्वृत्तेऽक्षद्यूतादिभ्य:"[१२] अक्षद्यूतेन निर्वृत्तम् ठक् आक्षद्यूतिकम्. क्त्रेर्भम्नित्यम्"[१३] कृत्या निर्वृतम् मप् कृतिमम् अपमित्य याचिताभ्यां कक्कनौ"[१४] अपमित्यनेन निर्वृतम् कक्,कन् आपमित्यकम् । संसृष्टे"[१५] दध्ना संसृष्टम् ठक् दाधिकम्, चूर्णादिनि"[१६] चूर्णै: संसृष्टा: इनि: चूर्णिनोऽपूपा:, मुद्गादण्"[१७] मुद्गेन संसृष्ट: अण् मौद्गो ओदन:, प्रयच्छति गर्ह्यम्'[१८] द्विगुणं प्रयच्छति ठक् द्वैगुण्कि:, कुसीददशैकादशात्ष्ठ-न्ष्ठचौ"[१९] कुसीदं प्रच्छति ष्ठन्ष्ठच् कुसीदिक: कुसीदिकी, समवायान-समवैति"[२०] समवायान् समवैति मेलयति ठक् सामवायिक: परिषदोण्य:"[२१] परिषदं समवैति ण्य: पारिषद्य:, सेनाया वा"[२२] सेनां समवैति ण्य: सैन्या:, तस्य धर्म्यम्"[२३] आपणस्य धर्म्यम् ठक् आपणिकम, अण् महिष्यादिभ्य:"[२४]

---

१. पा० सू० ४।४।८
२. पा० सू० ४।४।९
३. पा० सू० ४।४।१०
४. पा० सू० ४।४।११
५. पा० सू० ४।४।१२
६. पा० सू० ४।४।१३
७. पा० सू० ४।४।१४
८. पा० सू० ४।४।१५
९. पा० सू० ४।४।१६
१०. पा० सू० ४।४।१७
११. पा० सू० ४।४।१८
१२. पा० सू० ४।४।१९
१३. पा० सू० ४।४।२०
१४. पा० सू० ४।४।२१
१५. पा० सू० ४।४।२२
१६. पा० सू० ४।४।२३
१७. पा० सू० ४।४।२५
१८. पा० सू० ४।४।३०
१९. पा० सू० ४।४।३१
२०. पा० सू० ४।४।४३
२१. पा० सू० ४।४।४४
२२. पा० सू० ४।४।४५
२३. पा० सू० ४।४।४७
२४. पा० सू० ४।४।४८

महिष्या धर्म्यम् अण् माहिषम, ऋतोऽञ्[१] यातु धर्म्यम् अञ् यात्रम् तदस्यपण्यम्[२] तपूपाःपण्यमस्य ठक् आपूपिकः, लवणाठ्ठञ्[३] लवणमस्य पण्यम् ठञ् लावणिकः, किसरादिभ्यष्ठन[४] किसरं पण्यमस्य ष्ठन् किसरिकः, शलालुनोऽन्यतरस्याम्[५] शलालुः पण्यमस्यष्ठन् शलालुकः शलालुकी शिल्पम्[६] मृदङ्गवादनं शिल्पमस्य ठक् मार्दङ्गिकः मण्डुकझर्झरादणन्यतरस्याम्[७] मण्डुकवादनं शिल्पमस्य अण् माण्डुकः, प्रहरणम्[८] असिः प्रहरणमस्य ठञ् आसिकः, परस्वधाठञ्च[९] परस्वधः प्रहरणमस्य ठञ् पारश्वधिकः, शक्तियष्ठ्योरीकक्[१०] शक्तिः प्रहरणमस्य ईकक् शाक्तीकः, शीलम्[११] अपूपभक्षणं शीलमस्य ठक् आपूपिकः, छत्रादिभ्योण्यः[१२] छत्रस्य शीलमस्य णः छात्रः, कर्माध्ययने वृतम्[१३] एकमन्यद वृतमस्य ठक् ऐकान्यिकः, बह्वच्पूर्वपदाठ्ठञ्[१४] द्वादशान्यानि कर्मण्यध्ययने वृतान्यस्य ठञ् द्वादशान्यिकः, तदस्मै दीयते नियुक्तम्[१५] अग्रभोजनं नियुक्तं दीयतेऽस्मै ठक् आग्रभोजनिकः श्राणामांसौदनाट्ठिठन्[१६] श्राणानियुक्तंदीयतेऽस्यै टिठन् श्राणिकः श्राणिकी भक्तादणन्यतरस्याम्[१७] भक्तमस्मै नियतं दीयते अण् भाक्तः, तत्र नियुक्त[१८] आकरे नियुक्तः ठक् आकरिकः अगारान्ताठ्ठन्[१९] देवागारे नियुक्तः ठन् देवागारिकः, एषु विभिन्नार्थेषु विधीयमानौत्सर्गिक ठक्प्रत्ययविधायकापवादशास्त्राणां विवेचनञ्च तत्तत् सामान्यविशेषशास्त्रनिर्देशेन सह तत्कार्योदाहरणैरेव जातम्। अत्र प्राग्वहतीयशास्त्राणामुत्सर्गापवादक्रमे च केवल ठक् प्रत्ययविधायकशास्त्रस्य विशेषशास्त्राण्येव दृष्टानि, नतु विशेषशास्त्रस्य पुनर्विशेषशास्त्राणीतिपूर्वप्रकारणापेक्षयात्र विशेष इति बोध्यम्।

---

१. पा० सू० ४।४।४९
२. पा० सू० ४।४।५१
३. पा० सू० ४।४।५२
४. पा० सू० ४।४।५३
५. पा० सू० ४।४।५४
६. पा० सू० ४।४।५५
७. पा० सू० ४।४।५६
८. पा० सू० ४।४।५७
९. पा० सू० ४।४।५८
१०. पा० सू० ४।४।५९
११. पा० सू० ४।४।६१
१२. पा० सू० ४।४।६२
१३. पा० सू० ४।४।६३
१४. पा० सू० ४।४।६४
१५. पा० सू० ४।४।६६
१६. पा० सू० ४।४।६७
१७. पा० सू० ४।४।६८
१८. पा० सू० ४।४।६९
१९. पा० सू० ४।४।७०

प्राग्घितीय प्रत्ययानामुत्सर्गापवादत्वम्

प्राग्घितीयेषु तावत् यत्प्रत्ययस्यौत्सर्गिकत्वं भाति, यतो हि 'प्राग्घिताद्यत्[१]' इत्यधिकारशास्त्रेण 'तस्मै हितम्[२]' इतिसूत्रात् प्राग् यत्प्रत्ययस्याधिकारोऽवगम्यते। अतोऽस्य यत्प्रत्ययस्याप्यपवादभूतानि विशेषशास्त्राणि समुपलभ्यन्त एव। यतोहि विशेषशास्त्रमन्तरा सामान्यशास्त्रस्य सामान्यत्वं कुत्रापि संघटत इति सिद्धान्तः। तस्मादत्र वहत्याद्यर्थकयत् प्रत्ययविधायकसामान्यशास्त्राणि पुरस्कृत्य तदपवादभूतविशेषशास्त्राणां विवेचनञ्च कार्योदाहरणैः क्रियते। तत्र तावत् 'तद्वहति रथयुगप्रासङ्गम्[३]' इति विशेषशास्त्रेण रथं वहति रथ्यः, युगं वहति युग्यः तथा प्रासङ्गं वहति प्रासङ्ग्य, इत्यत्र वहत्यर्थे यत्प्रत्ययो विधीयते। अस्मिन् वहत्यर्थे च विशेषभूतानि शास्त्राणि 'खः सर्वधुरात्[४]' सर्वधुरां वहति-खः सर्वधुरीण, 'शकटादण्[५]' शकटं वहति अण् शाकटः, 'हलसीराट्ठक्[६]' हलं वहति ठक् हालिकः। इति त्रीणि सन्ति। एतानि च यत् प्रत्ययमपवाद्य प्रवर्तन्ते।

एवमन्येष्वर्थेषु चाधोलिखितविशेषशास्त्रविहितानेकविधप्रययैयत् प्रत्ययस्यापवादो दृश्यते। तद्यथा—

अन्नाण्णः[७]	अन्नं लब्धा	णः	आन्नः
गृहपतिना संयुक्तेभ्यः[८]	गृहपतिना संयुक्तः ञ्यः		गार्हपत्योऽग्निः
प्रतिजनादिभ्यः खञ्[९]	प्रति जनं साधुः	खञ्	प्रातिजनीनः
भक्ताण्णः[१०]	भक्ते साधवः	णः	भाक्ताः शालयः
परिषदोण्यः[११]	परिषदि साधुः	ण्यः	पारिषद्यः
कथादिभ्यष्ठक्	कथायां साधुः	ठक्	काथिकः।
'गुडादिभ्यष्ठञ्[१३]'	गुडे साधुः	ठञ्	गौडिकः इक्षुः
'पथ्यतिथिवसतिस्वपतेठञ्[१४]'	पथिः साधु	ठञ्	पाथेयम्
'सभाया यः[१५]'	सभासु साधुः	यः	सभ्यः
'सोदराद्यः[१६]'	समानमुदरं	यः	सोदर्यः

१. पा० सू० ४।४।७५
२. पा० सू० ५।१।४५
३. पा० सू० ४।४।७६
४. पा० सू० ४।४।७८
५. पा० सू० ४।४।८०
६. पा० सू० ४।४।८१
७. पा० सू० ४।४।८५
८. पा० सू० ४।४।९०
९. पा० सू० ४।४।९९
१०. पा० सू० ४।४।१००
११. पा० सू० ४।४।१०१
१२. पा० सू० ४।४।११०
१३. प० सू० ४।८।१११
१४. पा० सू० ४।४।११२
१५. पा० सू० ४।४।११३
१६. पा० सू० ४।४।११४

एवं सर्वत्र यत्प्रत्ययापवादो दृष्टः। अस्य यत्प्रत्ययस्याधिकारे च वैदिकसाधुत्वोपपवादकानि 'भवे छन्दसि'[1] 'पाथोनदीभ्यांड्यण्[2]' प्रभृति सामान्यविशेषशास्त्राण्यपि समायान्ति। तत्र तावत् मेध्याय च विद्युताय च, इत्यत्र 'तत्रभवः' इति सामान्यशास्त्रप्राप्तं शैषिकाण्प्रत्ययमपवाद्य 'भवे छन्दसि' इति शास्त्रेण यत्प्रत्ययो विधीयते। अस्य भवार्थक यत्प्रत्यय-विधायकस्य 'भवे छन्दसि' इति शास्त्रस्याप्यपवादभूतानि शास्त्राणि चैतानि विद्यन्ते—

'पाथोनदीभ्यां ड्यण्[3]'	ड्यण्	तमुत्वापाथ्योवृषा
'वेशन्तहिमवद्भ्यामण्[4]'	अण्	वैशन्तीभ्यः स्वाहा
'स्त्रोतसोविभाषाडयड्ड्यौ[5]'	ड्यत्ड्य	स्त्रोत्यः, स्त्रोतस्यः
'सगर्भसयूथसनुताद्यन्[6]'	यन्	अनुभ्राता सगर्भ्यः
'तुग्राद्घन्[7]'	घन्आवः	शमंवृषभं तुग्रयासु
'समुद्राभ्राद्घः[8]'	घः	नानदतो अभ्रियस्येव घोषः

यद्यपि छन्दसि सर्वविधीनां वैकल्पिकत्वाद् औत्सर्गिकप्रत्यया अपि पक्षेभवन्त्येव, तथाप्यत्र प्रसङ्गात्तदुत्सर्गापवादभावोऽपि दर्शितः।

तदित्थमिह यत्प्रत्ययाधिकारान्तर्गततद्विशेषप्रत्ययविधायकशास्त्राणि विवेचितानि।

छप्रत्ययविधेरपवाद सूत्राणि

प्राग्घितीयविधायकशास्त्राणामुत्सर्गापवादकत्वनिरूपणान्तरं छप्रत्यय-विधायकसामान्यशास्त्रस्यापवादशास्त्राण्युपक्रमन्ते। यतोहि 'प्राक् क्रीताच्छः'[9] इत्याधिकारशास्त्रेण 'तेन क्रीतम्[10]' इति सूत्रात् प्राक् सामान्यतः छप्रत्ययस्याधिकारः स्वीकृतः। अत्राधिकारे चावधित्वेनार्थ एव गृह्यते। तस्मादेनयोरन्तराले येषु सूत्रेष्वर्था निर्दिष्टाः सन्ति तेषु सर्वेष्वर्थेषु छप्रत्ययस्य सामान्यरूपेण सम्बन्धोमन्तव्यः। तत्र सत्सु विशेषशास्त्रेषु च तैर्विशेषशास्त्रैरौत्सर्गिकस्य छप्रत्ययस्य भवति बाध इति पूर्ववद् एषक्रमः

१. पा० सू० ४।४।११५
२. पा० सू० ४।४।११८
३. पा० सू० ४।४।१०२
४. पा० सू० ४।४।१०३
५. पा० सू० ४।४।१०४
६. पा० सू० ४।४।१०५
७. पा० सू० ४।४।१०६
८. पा० सू० ४।४।११०
९. पा० सू० ५।१।१
१०. सू० पा० ५।१।३७

पदसाधुत्वोपपत्तये सर्वत्र महर्षिपाणिनेः शब्दानुशासने जागर्ति । अत्र तावद् वत्सेभ्योहितः' 'वत्सीयोगोधुक्' इत्यत्र 'तस्मै हितम्' इति सामान्यशास्त्रेण छप्रत्ययो जातः, किन्तु शङ्कवे हितं दारू शङ्कव्यमित्यत्र गवेहितं गव्यमित्यत्र च उगवादिभ्यो यत्'[1] इति विशेषशास्त्रेण उवर्णान्ताद् गवादिगणपठितेभ्यश्च यत् प्रत्ययो विहितः छप्रत्ययमपवाद्य । एवमन्यविशेषशास्त्रविहितयत्प्रत्ययेन वृयनादिप्रत्ययैश्चास्यौत्सर्गिकत्वादवश्यप्राप्तस्य छप्रत्ययस्य यथा बाधो भवति तत्सर्वमिह सोदाहरणमुपस्थाप्यते—

छप्रत्ययस्यापवाद शास्त्राणि-	कार्यम्	उदाहरणानि-
'कम्बलाच्चसंज्ञायाम्'[2]	यत्	कम्बल्यमुर्णापलशतम्
शरीरावयवाद्य'त्[3]	यत्	दन्त्यम्, कण्ठ्यम्,
खलयवमाषतिलवृषब्रह्मणश्च'[4]	यत्	खल्यम्, यव्यम्
'अजाविभ्यांश्यन्'[5]	श्यन्	अयश्या यूथिः
आत्मनविश्वजनभोगोत्तरपदात्खः'[6]	ख	आत्मनीनम
सर्वपुरुषाभ्यां णढञौ'[7]	णढञ्	सार्वम्, पौरुषेयम्
माणवचरकाभ्यां खञ्'[8]	खञ्	माणवीनम्, चारकीणम्
छदिरूपधिबले ढञ्'[9]	ठञ्	छदिषेमाणि तृणानि
'ऋषभोपानहोर्न्यः'[10]	ञ्य.	आर्षभ्यो वत्सः
चर्मणोऽञ्'[11]	अञ्	वारन्ध्रं चर्म
परिखाया ढञ्[12]	ढञ्	पारिखेयी भूमिः

अत्रापवादशास्त्राणां पुनरपवादशास्त्राणि नोपलभ्यन्ते । तदेवमेभिः सूत्रैः तत्कार्योदाहरणैश्च छप्रत्ययविधेरपवादशास्त्राणां परिचयोऽत्र सम्पन्नः ।

ठक्ठञ् प्रत्ययाधिकारान्तर्गत सामान्यविशेषशास्त्राणि

तत्र तावत् ठक्ठञ्प्रत्ययोरधिकारनिर्णये 'प्राग्वतेष्ठञ्'[13] 'आर्हाद्गोपुच्छसंख्यापरिमाणाट्ठक्'[14] इति सूत्रद्वयमुपात्तं वर्तते । एनयोस्तात्पर्य-

१. पा० सू० ५।१।२
२. पा० सू० ५।१।३
३. पा० सू० ५।१।६
४. पा० सू० ५।१।७
५. पा० सू० ५।१।८
६. पा० सू० ५।१।९
७. पा० सू० ५।१।१०
८. पा० सू० ५।१।११
९. पा० सू० ५।१।१३
१०. पा० सू० ५।१।१४
११. पा० सू० ५।१।१५
१२. पा० सू० ५।१।१७
१३. पा० सू० ५।१।१८
१४. पा० सू० ५।१।१९

मिदमस्ति यद् वतिघटितात् "तेनतुल्यं क्रियाचेद्वतिः"[१] इति सूत्रात् प्राक् ठञ् प्रत्त्रयस्याधिकारः 'तर्दहति'[२] इत्येतत् सूत्रमभिव्याप्य च ठक् प्रत्ययस्याधिकारो ज्ञेयः। आर्हाद् आर्हादित्यत्र आङ् शब्दः अभिविध्यर्थकः ख्यातः। तथा च अधिकारोऽयम् आर्हयिप्रकरणनाम्ना सिद्धान्तकौमुद्यां व्यवहृतः एष आर्हीय ठक् प्रत्ययस्याधिकारश्च ठञ् प्रत्ययाधिकारमध्य एव जातः। अत ठक् प्रत्ययाधिकारपठितैर्विशेषशास्त्रैः औत्सर्किस्य ठञ्-प्रत्ययस्य बाधो येनन प्राप्तिरिति न्यायेन भवति। तेषां ठञ्प्रत्ययापवाद-भूतविशेषशास्त्राणांविवेचनमिह कार्योदाहरणैः प्रस्तूयते—

शास्त्राणि	कार्यम्	उदाहरणानि
'आहार्दगोपुच्छसंख्यापरिमाणाट्ठक्'	ठक्	नैष्किकम्
'असमासे निष्कादिभ्यः[३]'	ठक्	पदिकम् माषिकम्
'संख्यायाः अतिशदन्ताया कन्[४]'	कन्	पञ्चकः, बहुकः
'कंसाट्टिठन्[५]'	टिठन्	कंसिकः कंसिकी
'शतमानविंशतिकसहस्त्रवसनादण्[६]'	अण्	शातमानम्, वैंशतिकम्
'गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्[७]'	यत्	गव्यः
'सर्वभूमिपृथिवीभ्यामणञौ[८]'	अण् अञ्	सार्वभौमः, पार्शिवः
'तस्येश्वर[९]'	अण् अञ्	,,
'तत्र विदित इति च[१०]'	,, ,,	,,
'पात्रात्ष्ठन्[११]'	ष्ठन्	पात्रिकम्क्षेत्रम्

एतानि किल दशविशेषशास्त्राणि तेनक्रीतम्, तस्य निमित्तम्, तस्य-ईश्वरः, तत्रविदित, तस्यवाप इत्याद्यर्थेषु प्राप्तं ठञ् प्रत्ययमपवाद्य प्रवर्त्तन्ते। तेन निष्केण क्रीतम् नैष्किकम् इत्यत्र स्वरार्थं ठक् प्रत्ययो जातः। गोर्निमित्तं संयोग उत्पातो वा गव्यः इत्यत्र च ठञपवादकोयत् प्रत्ययः। तथा सर्वभूमेरीश्वरः सर्वभूमौ विदित वेत्यर्थे सार्वभौम इत्यत्र अण्प्रत्ययेन ठञ् प्रत्ययस्य बाधो दृश्यते। एवं पात्रस्य वापः क्षेत्रंपात्रिकमित्यत्र ठञपवादकः ष्ठन प्रत्ययश्चेत्युपरिनिर्दिष्टोदाहरणेषु व्युत्पत्तिभेदादर्शभेदोऽपि बोध्यः।

१. पा० सू० ५।१।११५
२. पा० सू० ५।१।६२
३. पा० सू० ५।१।४।२०
४. पा० सू० ५।१।२२
५. पा० सू० ५।१।२५
६. पा० सू० ५।१।२७
७. पा० सू० ५।१।२९
८. पा० सू० ५।१।४१
९. पा० सू० ५।१।४२
१०. पा० सू० ५।१।४३
११. पा० सू० ५।१।४६

एषु ठञ् प्रत्ययापवादभूतविशेषशास्त्रेष्वपिच 'आर्हादगोपुच्छ संख्यापरिमाणाट्ठक्' इति शास्त्रस्य अपवादभूतानि सप्तशास्त्राणि अधो निर्दिष्टानि सन्ति—

'पूरणार्धाट्ठन्[१]'	ठन्	द्वितीयोऽस्मिन् वृद्धि र्दीयते-द्वितीयिकः
'भागाद्यच्च[२]'	यत्, ठन्	भागो वृद्धयादिरस्मिन् दीयते-भाग्यं भागिकम्
'दण्डादिभ्यः[३]'	यत्	दण्डमर्हति दण्ड्यः
'पात्राद् घंश्च[४]'	धन्, यत्	पात्रमर्हति पात्रियः, पात्र्यः
'कडङ्करदक्षिणाच्छच[५]'	छ यत्	कडङ्करमर्हति-कडङ्करीयोगौ, कडङ्कर्यम्
'स्थाली बिलात्[६]'	छ, यत्	स्थालिबिलमर्हन्ति-स्थालीबिलीयास्तण्डुलाः स्थालीबिल्याः
'यज्ञर्त्विग्भ्यां घखञौ[७]'	घ, खञ्	यज्ञमृत्विजं वार्हति-यज्ञियः आर्त्विजीनो यजमानः

तदेवमेभिः ठन्, यद्, धन्, छ, खञ् प्रत्ययविधायकशास्त्रैः ठञपवादभूतठक् प्रत्ययविधायकस्य 'आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' इत्यस्यापि बाधो भवतीति निश्चीयते ।

एवं पञ्चभिः क्रीतः पञ्चकः, बहुभिः क्रीतः बहुक इत्यत्र ठञ् प्रत्ययमपवाद्य 'संख्याया अतिशदन्तायाः कन्', इति विशेषशास्त्रेण कन् प्रत्ययो जातः । अस्य कन् प्रत्ययविधायकस्य विशेषशास्त्रस्यापि बाधकं विशेषशास्त्रं वर्त्तते 'शताच्चठन्यतावशते[८]' इति । तेन शतेन क्रीतम् शत्यम्, शतिकम् इत्यत्र ठन् यत् प्रत्ययौ विहितौ स्तः ।

इत्थमत्र ठक् प्रत्ययाधिकारान्तर्गतसामान्यविशेषशास्त्राणा मुत्सर्गापवादक्रमो विवेचितः ।

ठञ्प्रत्ययाधिकारस्तु "तेन तुल्यं क्रियाचेद्वतिरिति सूत्रं यावत् प्रवर्त्तत इति "प्रागवतेष्ठञ्" इति सूत्रव्याख्याने प्रोक्तम् । अतो यानि ठक्प्रत्याधिकारबहिर्भुतानि ठञ् प्रत्ययापवादशास्त्राणि विद्यन्ते, तान्यपि पूर्ववत् कार्योदाहरणैरिह परिचीयन्ते—

१. पा० सू० ५।१।४८
२. पा० सू० ५।१।४९
३. पा० सू० ५।१।६६
४. पा० सू० ५।१।६८
५. पा० सू० ५।१।६९
६. पा० सू० ५।१।७०
७. पा० सू० ५।१।७१
८. पा० सू० ५।१।२१

ठञोऽपवाद शास्त्राणि	कार्यम्	उदाहरणानि
'पथः ष्कन्[१]'	ष्कन्	पथिकः पथिकी
'पन्थोणनित्यम्'[२]	ण	पान्थो भिक्षांयाचते
'मासाद्वयसियत्खञौ[३]	यत् खञ्	मास्यः मासीनः
'अवयसि ठश्च'[४]	ठन्, ण्य	षाण्मासिको रोगः षाण्मास्यः
'सामायाः खः'[५]	खः	समीनः
'वत्सरान्ताच्छन्दसि[६]	छः	इद्वत्सरीयः
'संपरिपूर्वात्खच'[७]	ख, छ,	परिवत्सरीणः सम्वत्सरीयः
'व्युष्टादिभ्योऽण्'[८]	अण	वैयुष्टम्
'तेन वशाकथा च हस्ताभ्यां णयतौ[९]	ण, यत्	याथाकथाचम्, हस्त्यम्
'कर्मवेषाद्यत्'[१०]	यत्	कर्मण्यं शरीरम्
'कर्मण उकञ्'[११]	उकञ्	कार्मुकं धनुः
'ऋतोरण्'[१२]	अण्	आर्तव पुष्पम्
कालाद्यत्'[१३]	यत्	काल्यस्तापः
'विशाखाषाढादण्मन्थदण्डयोः[१४]'	अण्	वैशाखोमन्थः, आषाढोदण्डः
'अनुप्रवचनादिभ्यश्छः[१५]'	छः	अनुप्रवचनीयम्
'समापनात्सपूर्वपदात्[१६]'	छः	छन्दः समापनीयम्

अत्र गच्छत्यधीष्ठाद्यर्थेषु औत्सर्गिकठञ् प्रत्ययस्यापवादकाः ष्कनादि-प्रत्यया दृश्यन्ते। तद्यथा—पन्थानं गच्छति पथिकः इत्यत्र ठञ् प्रत्ययमपवाद्य ष्कन्प्रत्ययो जातः। पन्थानं नित्यं गच्छति पान्थः इत्यत्र तु णप्रत्ययेन ठञ् प्रत्ययस्य बाधः।

एवं मासं भूतः मास्यः, मासीनः इत्यत्र 'मासाद्वयसियत्खञौ' इति विशेषशास्त्रविहित यत्खञ्प्रत्ययाभ्याम् ठञो बाधः उपरिनिर्दिष्टः। किन्त्वस्य

१. पा० सू० ५।१।७५
२. पा० सू० ५।१।७६
३. पा० सू० ५।१।८१
४. पा० सू० ५।१।८४
५. पा० सू० ५।१।८५
६. पा० सू ५।१।९१
७. पा० सू० ५।१।९२
८. पा० सू० ५।१।९७
९. पा० सू० ५।१।९८
१०. पा० सू० ५।१।१००
११. पा० सू० ५।१।१०३
१२. पा० सू० ५।१।१०५
१३. पा० सू० ५।१।१०७
१४. पा० सू० ५।१।११०
१५. पा० सू० ५।१।१११
१६. पा० सू० ५।१।११२

यत्खञ् विधायकविशेषशास्त्रस्यस्यापि द्वौ मासौ भूतो द्विमास्यः इत्यत्र 'द्विगोर्यप्[१]' इति ततोऽपि विशेषशास्त्रविहितयप्प्रत्ययेनापवादो दृश्यते ।

एवम् ऋतुः प्राप्तोऽस्य आर्तवं पुष्पम् इत्यत्र 'ऋतोरण्' इति विशेषशास्त्रविहिताणप्रत्ययेन ठञ्प्रत्ययस्य बाधो भवति । अस्मिन्नेवार्थे 'अयंतेयोनिऋत्वियः' इति वैदिकप्रयोगे तु अणप्यपवाद्यते । तथाच सूत्रमस्ति 'छन्दसि घस[२]' इति ।

तदेवं ठञ् प्रत्ययाधिकारान्तर्गत विशेषातिविशेषशास्त्र णामुत्सर्गापवादभावो विज्ञातः ।

भाव कर्मार्थकप्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादत्वम

तत्र भावकर्मार्थिक प्रत्ययविधायकेषु "तस्यभावस्त्वतलौ[३]" इति शास्त्रमौत्सर्गिकं भाति । त्वतलप्रत्यययोरधिकारश्च 'ब्रह्मणस्त्वः[४]' इत्यतः प्राक्प्रवर्त्तते।तथा च सूत्रमस्ति 'आचत्वादिति। आङ् पदञ्चेह मर्यादायामेव व्याख्यातम् । अतस्तत्प्राग् इत्युक्तम् । अत्र त्वतलाधिकारविषये पृच्छयते यत् 'तस्य भावस्त्वतलौ' इति सूत्राद् उत्तरसत्रेष्वपि त्वतलोरनुवृत्ति र्भविष्यति पुनः 'आचत्वात्[५]' इत्यधिकारः किमर्थः ? एतत् समाधाने काशिकावृत्तौ चेदमुक्तम् यद्—'अपवादैः सह समावेशार्थं वचनम्' एतावता पृथोर्भावः प्रथिमा इत्यत्र 'पृथ्वादिभ्यइमनिज्वा[६]' इत्यादि विशेषशास्त्रैः त्वतलावपवाद्य इमनिजादि प्रत्यया विधीयन्ते । तत्रापि त्वतलौ भवत इति सूच्यते । तेन पृथुत्वं पृथुता इत्यपि प्रयुज्यते । सूत्रे वा ग्रहणफलं तु इमनिजभावे पृथोर्भावःपार्थवम् इत्यत्र 'इगन्ताच्च लघुपूर्वात्[७]' इत्यनेन अणसिद्धिरेव । तस्मादधिकारफलं अपवादैः सहत्वतलोः समुचयार्थमेव समुचितं प्रतिभाति । एवं शुक्लस्य भावः कर्म वा शौक्ल्यम् इत्यत्रापि 'वर्णदृढादिभ्यः ष्यञ्च[८]' इति विशेषशास्त्रेण त्वतलप्रत्ययावपवाद्य ष्यञ्प्रत्ययो जातः । अत्र सूत्रे चकाराच्च इमनिच् प्रत्ययोऽपि संगृह्यते । तेन शुक्लस्य भावः शुक्लिमा इत्यपि भवति । आचत्वादित्यधिकारबलाच्च औत्सर्गिकत्वतल्प्रत्ययावपि शुक्लत्वं शुक्लता इत्यत्र दृश्यते । तस्मादिह अधिकारसामर्थ्याद् उत्सर्गशास्त्रस्यापवादशास्त्रैर्विकल्पवद बाधः सिध्यति ।

---

१. पा० सू९ ५।१।८२
२. पा० सू० ५।१।१०६
३. पा० सू० ५।१।११९
४. पा० सू० ५।१।१३६
५. पा० सू० ५।१।१२०
६. पा० सू० ५।१।१२२
७. पा० सू० ५।१।१३१
८. पा० सू० ५।२।१२३

एवमितोऽन्यत्र भावकर्मोभयार्थबोधकप्रत्ययविधायकविशेषशास्त्रैरौत्सर्गिकत्वतलप्रत्यययोर्बाधस्थलेऽपि पूर्वोक्ताधिकारसामर्थ्यात् त्वतल्प्रत्यययोरपि समावेशो दृश्यते । तद्यथा–

विशेषशास्त्राणि	कार्यम्	उदाहरणानि
गुणवचनब्राह्मणादिभ्यः कर्मणि च[1]	ष्यञ्	जाड्यम्, जडत्वम्, जडता
स्तेनाद्यन्नलोपश्च[2]	यत्	स्तेयम्, स्तेनत्वम्, स्तेनता
सख्युर्यः[3]	यः	सख्यम् सखित्वम्, सखिता
कपिज्ञात्योर्ढक्[4]	ढक्	कापेयम्, कपित्वम्, कपिता
पत्यन्तपुरोहितादिभ्यो यक्[5]	यक्	सैनापत्यम्, सेनापतित्वम्, सेनापतिता
प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्[6]	अञ्	आश्वम्, अश्वता, अश्वत्वम्
हायनान्तयुवादिभ्योऽण्[7]	अण्	द्वैहायनम्, द्विहायनत्वम् द्विहायनता
इगन्ताच्च लघुपूर्वात्[8]	अण्	शौचम्, शुचित्वम्, शुचिता
योपधाद् गुरूपोत्तमाद्वुञ्[9]	वुञ्	रामणीयकम्, रमणीयत्वम् रमणीयता
द्वन्द्वमनोज्ञादिभ्यश्च[10]	वुञ्	गौपालपशुपालिका, गोपालपशुपालत्वम्, गोपालपशुपालता
गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु[11]	वुञ्	गार्गिक्या श्लाघते गार्ग्यतया श्लाघते, गार्ग्यत्वेन श्लाघते
होत्राभ्यश्छः[12]	छः	अच्छावाकीयम्, अच्छावाकत्वम्, अच्छावाकता

१. पा० सू० ५।१।१२४
२. पा० सू० ५।१।१२५
३. पा० सू० ५।१।१२६
४. पा० सू० ५।१।१२७
५. पा० सू० ५।१।१२८
६. पा० सू० ५।१।१२९
७. पा० सू० ५।१।१३०
८. पा० सू० ५।१।१३१
९. पा० सू० ५।१।१३२
१०. पा० सू० ५।१।१३३
११. पा० सू० ५।१।१३४
१२. पा० सू० ५।१।१३५

एषु विशेषशास्त्रोदाहरणेषु आचत्वादित्यधिकारसामर्थ्यादेव अपवादप्रत्ययानां औत्सर्गिकयोस्त्वतलप्रत्यययोश्च सम्बन्धः सिध्यति । नो चेदुत्सर्गापवादयोर्बाध्यबाधकभावात् कथमेकत्र सम्बन्धः स्यात् । इह जडस्य भावः कर्म वेति व्युत्पत्तौ जाड्यम, जडत्वम् जडेति विशेषसामान्यशास्त्रविहितप्रत्ययानामेकप्रकृतिसम्बन्धस्तु आचत्वादित्याधिकारसामर्थ्यादेवेति बोध्यम् ।

भावकर्मणोर्भावपदेन यस्मात् प्रकृतिभूतशब्दात् त्वतलौ विधीयते तद्व्यक्तिप्रकारीभूतोभावः गृह्यते । तथा च 'तस्य भावस्त्वतलौ' इति सूत्रस्थकाशिकावृत्तौ 'शब्दस्य प्रवृत्तिनिमित्तं भावशब्देन उच्यते' इति व्याख्यातम्, अपिसिद्धान्तकौमुद्यां प्रकृतिजन्यबोध प्रकारोभाव इत्यभिहितम् । तत्तात्पर्यं समानमेव । यतोहि गोपदाद् व्यक्तिबोधे गोत्वं प्रकारत्वेन भासते । गोशब्दस्य च गोत्वविशिष्टव्यक्तौ शक्तेः स्वीकारात् प्रवृत्तिनिमितत्वमपि भावपदार्थः सिद्धः । कर्मशब्दश्चेह कार्यार्थकः क्रियार्थको वा लोकप्रसिद्धः एव गृह्यते ।

तदेवं भावकर्मबोधकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादक्रमो विचारितः ।

भवनपूर्णार्थकप्रत्ययानामुत्सर्गापवादत्वम

तत्र भवनार्थेषु तावद् धान्यानां भवनं क्षेत्रे खञ्'[1] इति सामान्यशास्त्रेण मुद्गानां भवनं क्षेत्रमित्यर्थे खञ्प्रत्ययो विधीयते । तेन मौद्गीनमिति पदं सिध्यति ।

इह भवनक्षेत्रशब्दयोस्समानाधिकरण्यन्तु भवन्त्यस्मिन्नित्यधिकरणे ल्युट् प्रत्यये सति संपद्यते । अस्य सामान्यशास्त्रस्यापवादभूते 'व्रीहिशाल्योर्ढक्'[2] 'यवयवकषष्टिकाद्यत्[3]' इति द्वे विशेषशास्त्रे स्तः । तेन व्रीहीणां शालीनाञ्च भवनं क्षेत्रमित्यर्थे अवश्यप्राप्तस्य सामान्यशास्त्रविहितखञ् प्रत्ययस्य व्रीहिशाल्योर्ढक्' इति विशेषशास्त्रविहितढका भवति बाधे व्रैहेयम्, शालेयमिति च निष्पद्यते ।

एवं यवानां यवकानां षष्ठिकानाञ्च भवनं क्षेत्रमित्यर्थे 'यवयवकषष्ठिकाद्यत्' इति विशेषशास्त्रविहितयता खञ् प्रत्ययोऽपवाद्यते । ततश्च यव्यम्, यवक्यम्, षष्ठिक्यम्, चेति रूपाणि सिध्यन्ति । अत्र यव-

१. पा० सू० ५।२।१
२. पा० सू० ५।२।२
३. पा० सू० ५।२।३

यवकयोरस्ति सजातीयो भेदः। यतोहि यवक इत्यत्र अल्पो यवः इत्यल्पार्थे कन् प्रत्ययो जातः। लोकभाषायामपि तद्भेदज्ञानाय च जौ, जई, इति पदद्वयं प्रयुज्यते।

प्रकृते च भवनार्थे उक्तमेतच्छास्त्रद्वयमेव औत्सर्गिकस्य धान्यानां भवने क्षेत्रे खञ्' इति शास्त्रस्यापवादभूतमिति निश्चयः। तदनुपूरणार्थेऽपि- 'तस्य पूरणे डट्'[1] इति सामान्यशास्त्रविहितडट् प्रत्ययस्यापवादभूते 'द्वेस्तीय'[2] 'त्रेः सम्प्रसारणञ्च'[3] द्वे विशेषशास्त्रे दृश्येते। अतः एकादशानां पूरणः एकादश इत्यत्र द्वयोः पूरणः इत्यर्थेऽपि स यथा डट् प्रत्ययो जातः तथा सामान्यतः प्राप्नोति, किन्तु तदपवाद्य द्विशब्दाद् 'द्वेस्तीयः, इति विशेषशास्त्रेण तीयप्रत्ययो विधीयते। तेन द्वितीय इति रूपं सिध्यति।

एवमेव त्रयाणां पूरणः तृतीयः इत्यत्रापि 'त्रेः सम्प्रसारणञ्च' इति विशेषशास्त्रेण त्रिशब्दस्य सम्प्रसारणमपि क्रियते। भवतु अत्र सम्प्रसारणं बाधस्तूभयत्र सामान्यशास्त्रस्य समानमेवेति फलितम्।

मत्वर्थीयप्रत्ययानामुत्सर्गापवादत्वम्

मत्वर्थीयप्रत्येषु सामान्यशास्त्रमस्ति 'तदस्यास्त्यस्मिन्निति मतुप्'[4] इति। अनेन हि तदस्यास्ति, तदस्मिनस्तीति चार्थे सामान्यतो मतुप् प्रत्ययो विधीयते। तेन गावोऽस्य अस्मिन्न वा सन्तीति विग्रहे मतुपि गोमानिति रूपं सिध्यति। औत्सर्गिकस्यास्य मतुप् प्रत्ययस्यापवादभूत- विनीन्यादयः प्रत्ययाश्च सन्ति बहवः। अतः समेषां तद्विनिन्यादि विशेषप्रत्ययानां वर्गीकरणं तत्तत्सूत्रोदाहरणपूर्वकं पुरस्तात् प्रस्तूयते। तत्र सामान्यशास्त्रं 'तदस्यास्त्यस्मिन्निति मतुप्' इत्युक्तम्। अस्यापवादभूत- विशेषशास्त्राणि।

'तपः सहस्राभ्यां विनीनी'[5]	विनिः	इनिः तपस्वी, सहस्री
'अण् च'[6]	अण्	तापसः साहस्रः
'सिकता शर्कराभ्याञ्च'[7]	अण्	सैकतोघटः, शार्करं मधु
'दन्त उन्नत उरच्'[8]	उरच्	दन्तुरः

१. पा० सू० ५।२।४८
२. पा० सू० ५।२।५४
३. पा० सू० ५।२।५५
४. पा० सू० ५।२।९४
५. पा० सू० ५।२।१०२
६. पा० सू० ५।२।१०३
७. पा० सू० ५।२।१०४
८. पा० सू० ५।२।१०६

ऊषसुषिमुष्कमधो रः[1]	रः	ऊषरमक्षेत्रम
'द्यु द्रुभ्यामः[2]	मः	द्युमः, द्रुमः
'गाण्यजगात्संज्ञायाम्[3]	वः	गाण्डिवम् धनुः, अजगवं धनु
'काण्डाण्डादीरन्नीरचौ[4]'	ईरन्-ईरच्	काण्डीरः, आण्डीरः
'रजः कृष्यासुति परिषदो वलच्[5]'	वलच्	रजस्वला स्त्री कृषीवलः कुटुम्बी
'दन्तशिखात्संज्ञायाम्[6]'	वलच्	दन्तावलः सैन्यः शिखावलः केकी
'एकगोपूर्वात् ठञ् नित्यम्[7]'	ठञ्	ऐकशतिक ऐकसहस्त्रीकः
'शतसहस्रान्ताचानिष्कात्[8]'	ठञ्	नैष्किकः, नैष्क सहस्तिकः
'रूपादाहतप्रशंसयोर्यप्[9]'	यप्	रूप्यो दीनारः, रूप्यः पुरुषः
'अस्मायामेधास्त्रजोविनिः[10]'	विनिः	पयस्वी मायावी, मेधावी, स्राग्वी
'ऊर्णाया युस्[11]'	युस्	ऊर्णायुः
'वाचोग्मिनिः[12]'	ग्मिनिः	वाग्मी
'आलजाटचौ बहुभाषिणि[13]'	आलच्-आटच्	वाचालः, वाचाटः
'अर्श आदिभ्योऽच्[14]'	अच्	अर्शसः, उरसः
'द्वन्द्वोपतापगर्ह्यात् प्राणीस्थादिनिः[15]'	इनिः	कटकवलयिनी शङ्खनूपुरिणी
'वातातिसाराभ्यां कुक्च[16]'	इनिः	वातकी; अतिसारकी

१. पा० सू० ५।२।१०७
२. पा० सू० ५।२।१०८
३. पा० सू० ५।२।११०
४. पा० सू० ५।२।१११
५. पा० सु० ५।२।११२
६. पा० सु० ५।२।११३
७. पा० सु० ५।२।११८
८. पा० सु० ।२।११५९
९. पा० सू० ५।२।१२०
१०. पा० सू० ५।२।१२१
११. पा० सू० ५।२।१२३
१२. पा० सू० ५।२।१२४
१३. पा० सु० ५।२।१२५
१४. पा० सु० ५।२।१२७
१५. पा० सु० ५।२।१२८
१६. पा० सु० ५।२।१२९

'वयसि पूरणात[१]'	इनिः	सुखी, दुःखी
'धर्मशीलवर्णान्ताच्च[२]'	इनिः	ब्राह्मणधर्मी
'वर्णाद् ब्रह्मचारिणि[३]'	इनिः	वर्णी
पुष्करादिभ्यो देशे[४]	इनिः	पुष्करिणी, पद्मिनी
'सञ्ज्ञायां मन्माभ्याम्[५]'	इनिः	प्रथमिनी होमिनी
'कंशंभ्यां बभयुस्तितुतयसः[६]'	ब, भ इ यादि	कम्बः, शम्भः,
'तुन्दिवलिवटेर्भः[७]'	भः	तुन्दिभः, बलिभः
'अहं शुभयोर्युस्[८]'	युस	अहंयुः शुभंयुरिति

अत्र विनिप्रत्ययमादाय युस्प्रत्ययं यावद् ये किल खञ् प्रत्ययापवादभूता विशेषप्रत्ययाः सोदाहरणं निर्दिष्टाः, ते सर्वे मत्वर्थिया एव। मतुबादयश्च अस्तिविवक्षायां भूमादिषु विषयेषु विधीयन्ते। तथाचोक्तं महाभाष्ये—

'भूमनिन्दा प्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः[९]'

व्याख्यातञ्चैवम भूमा--गोमान यवमान्। निन्दा ककुदावर्तिनी, प्रशंसा रूपवान् वर्णवान्। नित्ययोगे क्षीरिणो वृक्षाः, कण्टकिनो वृक्षाः। अतिशयः—उदरिणीकन्या। संसर्गः—दण्डी छत्री इति।

अत्र तत्त्वबोधिनीकाराः श्रीमज्ज्ञानेन्द्रसरस्वतीमहाभागाः भूमा—बहुत्वम्, तच्चापेक्षिकम्, यस्य हि यावदुचितं तावदेव बहुत्वबोधकबहुशब्देनापि प्रतीयते। तथापञ्चषाभिरपि गोभिर्देवदत्तस्य बह्वयोगाव इति व्यवहारः। इति विशेषमाहुः।

वस्तुत आपेक्षिकम् बहुत्वमेवात्र भूमन् शब्दस्यार्थः संघटते, नतु 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'[१०] इति छान्दोग्योपनिषदुक्त ब्रह्मापरपर्यायस्य भूमन् शब्दस्येति तत्तात्पर्यं विद्मः।

एव विनि इनि प्रभृतिप्रत्यया अपि वार्त्तिकोक्तभूमादिविषयेषु विहिता इत्युदाहरणैः स्पष्टं भाति।

तदित्थमिह मत्वर्थीयप्रत्ययविधायकोत्सर्गापवादशास्त्रक्रमो विवेचितः।

१. पा० सु० ५।२।१३०
२. पा० सु० ५।२।१३२
३. पा० सू० ५।२।१३४
४. पा० सू० ५।२।१३५
५. पा० सू० ५।२।१३७
६. पा० सू० ५।२।१३८
५. पा० सू० २।७।१३९
८. पा० सू० ५।२।१४०
६. म० भा० ५ अ० २ पा० २ आ० ५५ सू०
१०. छा० नु० अ० ७ ख, २४

॥ इति सप्तमो विमर्शः ॥

अष्टमो: विमर्श:

स्वार्थिकप्रत्ययविधायकशास्त्राणामुत्सर्गापवादत्वम

इत: पूर्वं समर्थानां प्रथमाद्वेत्यधिकारान्तर्गततद्धितप्रत्यय-विधायकशास्त्राणामुत्सर्गापवादत्वं विचारितम् । अथेदानीं स्वार्थिक-प्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादत्वं विविच्यते । यतोहि 'समर्थानां प्रथमाद्वेत्यधिकारस्तु प्राग्दिशोविभक्तिरिति सूत्रात् प्रागेव प्रचलतीति पूर्वमिह प्रोक्तम् । अत: प्राग्दिशो विभक्तिरिति सूत्रादारभ्य वक्ष्यमाण-प्रत्ययाश्च स्वार्थिका एव सन्तीति समर्थानां प्रथमाद्वेत्यधिकारनिवर्तन-फलं व्याख्यातम् । 'स्वार्थिकप्रत्यय:' इत्यत्र स्वपदेन प्रकृतिर्गृह्यते । तत्र स्वीये-प्रकृत्यर्थे भव: स्वार्थिक: इति स्वार्थिकप्रत्ययस्य तात्पर्यं संघटते । यतोहि 'प्रत्याय्यते' इति व्युपत्या च प्रकृत्यर्थबोधे एव प्रत्यय-शब्दस्य सार्थक्यं सम्भवति ।

तथाचोक्तं प्रत्यय इति सूत्रभाष्ये भगवता पतञ्जलिना 'प्रत्यय' इति महती संज्ञा क्रियते, संज्ञाच नाम यतो न लघीय: कुत एतत् लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्या: संज्ञाया: करणे एतत् प्रयोजनम-अन्वर्थ-संज्ञा यथा विज्ञायते-प्रत्याययतीति प्रत्यया: । यदि प्रत्यायतीति प्रत्ययोऽवि-कादीनां प्रत्ययसंज्ञा न प्रानोति, नहि ते किञ्चित्प्रत्याययन्ति' एवं तर्हि प्रत्याय्यते इति प्रत्यय: । यदि प्रत्याय्यते प्रत्यय इति, एवमपि सनादीना न प्राप्नोति ? एवं तर्ह्युभयसाधनोऽयं कर्तृसाधन: कर्मसाधने-श्चे'[1] ति । एतावता स्वार्थिकप्रत्ययेष्वपि प्रत्ययपदप्रवृत्तिनिमित्तत्वं संगतमेव ।

अत्र स्वार्थिकप्रत्ययेषु प्रथमोपस्थितत्वाद विभक्तिसंज्ञक-स्वार्थिकप्रत्ययानामुत्सर्गापवादत्वं विविच्यते । इह तावत् पाणिनीय शब्दानुशासने 'विभक्तिश्च'[2] 'प्राग्दिशो विभक्ति[3]रिति सूत्रद्वयेन विभक्ति-संज्ञा विधीयते । तत्र सुप्तिङ् प्रत्याहारबोध्यप्रत्ययानां विभक्तिश्चेति सूत्रेण विभक्तिसंज्ञा क्रियते । प्राग्दिशो विभक्तिरिति सूत्रेण च तद्धित-

---

१. म० भा० ३।१।१

२. पा० सू० १।४।१०४

३. पा० सू० ५।३।१

प्रत्ययानां विभक्तिसंज्ञेति विवेकः । उभाभ्यामपि सूत्राभ्यां प्रत्ययेष्वेव विभक्तिपदबोध्यता सम्पाद्यते । तत्र विभक्तिसंज्ञकास्तद्धितप्रत्ययाश्च परिगणिता एव वर्त्तन्ते । यतोहि 'पञ्चम्यास्तसिल्'[1] इत्यारभ्य दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्तातिरिति'[2] सूत्रात प्राग् ये खलु तसिलादय थान्तास्तद्धितप्रत्ययाः निर्दिष्टाः सन्ति ते विभक्तिसंज्ञका इति प्राग्दिशोविभक्तिरिति[3] सूत्रेण सूच्यते विभक्तिसंज्ञा फलञ्च 'न विभक्तौ तुस्माः'[4] इत्संज्ञा निषेधः 'अष्टन आ विभक्तौ'[5] इत्यादौ विभक्तौ परतः आकाराद्यादेशश्चेति प्रसिद्धम् ।

विभक्तिसंज्ञकस्वार्थिकप्रत्ययानामुत्सर्गापवादत्वम्

अत्र विभक्तिसंज्ञकेषूत्सर्गापवादशास्त्रनिर्धारणे इदम इश[6]' सप्तम्यास्त्रल्[7] 'प्रकारवचने थाल्[8]' इत्येषां त्रयाणामेव सामान्यशास्त्राणामपवादशास्त्राणि मिलन्ति । एषु त्रिषु 'इदम इश्' इत्यनेन इदमितिविशेषपदमुद्दिश्य इशादेशविधानेऽपि प्राग्दिशीयविभक्तिरूपसामान्यनिमित्तत्वादुत्सर्गत्वमव्याहतम् अतएव 'एतेतौरथोः रति[9]' विशेषशास्त्रेण तदपवादो भवति । अनेन हि प्राग्दिशीयविभक्तिषु रेफथकाररूपविभक्तिपरत एव इदमशब्दस्य यथासंख्यमेतेतावादेशौ विधीयेते । अतोऽत्र सामान्यस्य 'इदमइश्' इति शास्त्रस्यावश्यप्राप्तौ 'एतेतौरथोरित्यस्यारम्भसामर्थ्यात्तस्य बाधोन्यायसिद्ध । ततश्च एतर्हि इत्थमित्यत्रास्यापवादशास्त्रस्य सार्थक्यम् एतद् भिन्नलक्ष्ये इतः, इह, इत्यत्र तु 'इदमइश् इत्युत्सर्ग शास्त्रस्य च साफल्यं स्पष्टं प्रतिभाति ।

एवं 'सप्तम्यास्त्रल् इति सामान्यशास्त्रेण किंशब्दाद् द्वयादिभिन्नसर्वनामसंज्ञकाद् बहुशब्दाच्च सप्तम्यन्तात त्रल् प्रत्ययो विधीयते । तेन कुत्र, यत्र, तत्र, अत्रेति पदानि सिध्यन्ति । अस्यापवादशास्त्राणि च इदमोहः[10]' किमोऽत[11]' 'सर्वैकान्यकियत्तदः काले दा[12]' इति त्रीणि विद्यन्ते । अतः सप्तम्यन्तेभ्य एभ्यो यथाक्रमं ह, अत्, दा, इति प्रत्यया

१. पा० सू० ५।३।७
२. पा० सू० ५।३।२७
३. पा० सू० ५।३।१
४. पा० सू० १।३।४
५. पा० सू० ७।४।८४
६. पा० सू० ५।३।३
७. पा० सू० ५।३।१०
८. पा० सू० ५।३।२३
९. पा० सू० ५।३।४
१०. पा० सू० ५।३।११
११. पा० सू० ५।३।१२
१२. पा० सू० ५।३।१५

भवन्ति त्रल्प्रत्ययमपवाद्य तस्माद् इह, क्व, सर्वदा एकदा, अन्यदा, कदा, यदा, तदेतितदुदाहारणानि संगच्छन्ते ।

एभ्यः पूर्वोक्तकियादिशब्देभ्य एव 'प्रकारवचने थाल्' इत्यनेन सामान्यतः थाल्प्रत्ययो विधीयते । तस्मात्तेन प्रकारेण तथा येन प्रकारेण यथा सर्वप्रकारेण सर्वथेति पदानि सिध्यन्ति । किन्तु अनेन प्रकारेण केन प्रकारेणेति विग्रहे तु इत्थम्. कथमिति पदे प्रयुज्येते । तस्मात् प्रकारवचने थाल्' इत्युत्सर्गशास्त्रस्य यथा क्रमम् 'इदमस्थमुः[१]' किमश्चेति[२]' सूत्रद्वयम् अपवादभतमुपतिष्ठते ।

तदेवं स्वार्थिकप्रत्ययेषु विभक्तिसंज्ञकप्रत्ययानामुत्सर्गापवाद-विवेचनं निष्पन्नम् ।

अस्तातिप्रत्ययसम्बन्ध्युत्सर्गापवाद शास्त्राणि

तत्र तावदस्ताति प्रत्ययो दिग्देशकालवृत्तिभ्यः सप्तमी पञ्चमी प्रथमान्तेभ्यो दिशि रुढेभ्यः पूर्वादिशब्देभ्यः स्वार्थे विधीयते तथा च सूत्रमस्ति 'दिक्शब्देभ्यः सप्तमी पञ्चमी प्रथमाभ्यो दिग्देशकालेष्वस्तातिरिति[३]' । अत्र विभक्तीनां दिगादीनाञ्च यथासंख्यं नेष्यते । इष्यते चेद दिग्वृत्तौ सप्तमी विभक्तिरेव सम्बन्धः स्यान्नतु पञ्चमीप्रथमयोः । किन्तु आसां तिसृणामपि विभक्तीनां सर्वैः साकं सम्बन्धो दृश्यत एव । तथाहि पूर्वस्यां पूर्वस्याः पूर्वा वा दिगित्यर्थे पुरस्तादिति पदं प्रयुज्यते ।

एवं पूर्वस्मिन्, पूर्वस्मात्, पूर्वो वा देशः कालो वा इत्यर्थेऽपि पुरस्तादित्युच्यते । अत्र पूर्वशब्दस्य पुरादेशस्तु 'अस्ताति च[४]' इति सूत्रेण संपद्यते। सूत्रेऽस्मिन् 'पूर्वाधरावराणामसि पुरधवश्चैषामिति[५]' पूर्वसूत्रघटकपूर्वाधरावराणां–पुरधव इति चानुवर्त्तते । तेन यथा पूर्वाधरावरेभ्योऽस्तात्यर्थे असि प्रत्यये सति पूर्वोक्तसूत्रेण पूर्वशब्दस्य पुर अधरशब्दस्य अध, अवरशब्दस्य अव, इत्याद्यादेशाः पुरः अधः अव इत्यत्र जाताः । तथैव पुरस्तात् अधस्तात् अवस्तादित्यत्र अस्ताति प्रत्यये परेऽपि 'अस्ताति चेति' शास्त्रेण पूर्वादिशब्दानां पुराद्यादेशाः भवन्ति । अस्ताति प्रत्यये परे अस्ताति चेति शास्त्रेण पुर अध अव इत्यादेशा विधानसामर्थ्यादेव दिक्शब्दव्यतिरिक्ताद् अवर-

१. पा० सु० ५।३।२४
२. पा० सु० ५।३।२५
३. पा० सु० ५।३।२९
४. पा० सु० ५।३।४०
५. पा० सु० ५।३।२७

शब्दादपि अस्ताति प्रत्ययः सम्भवति, असि प्रत्ययेन सह अस्ताति प्रत्ययस्य चाविरोधोऽप्यत्र दृष्टः। तथाचोक्तम्–अस्तातिचेति सूत्रव्याख्याने काशिका वृत्तौ 'इदमेवादेशविधानं ज्ञापकमस्तातिरेभ्यो भवति, असि प्रत्ययेन न बाध्यत इति[1]। अस्तु।

अस्य अस्ताति प्रत्ययस्यापवादभूतानि विशेषशास्त्राणि निम्नलिखितानि सन्ति

'दक्षिणोत्तराभ्यामतसुच्[2]'	अतसुच्	दक्षिणतः उत्तरतः
'उत्तराधरदक्षिणादातिः[3]'	आतिः	उत्तरादागतः
'दक्षिणादाच्[4]'	आच्	दक्षिणा वसति
'आहि च दूरे[5]'	आहिः आच्	दक्षिणाहि वसति
'उत्तराच्च[6]'	आहिः	उत्तराहि वसति

एषु पञ्चविशेषशास्त्रलक्ष्येष्वपि दिक्शब्दत्वात् अस्तातिप्रत्ययस्य अवश्यप्राप्तिरासीत्, किन्तु अतुसजादिभिरौत्सर्गिकस्य तस्य बाधो जातः। यद्यत्रापि अस्तातिरेव सामान्यतः स्यात्तदा अतुसजादिविधानं व्यर्थं भवेत्। तस्माद् विशेषशास्त्रेणेदं कल्प्यते यद् विशेषशास्त्रविषये यत् सामान्यशास्त्रं प्राप्नोतितद् विशेषशास्त्रेण बाध्यते। तथा च सार्थक्यं विशेषशास्त्राणां सुदृढं भवति, निरव काशोविधिरपवाद इत्यपवादलक्षणञ्च फलति। एवमग्र तमबिष्ठन प्रत्ययावपि सामान्यतः स्वार्थे भवतः। तथाच सूत्रमस्ति 'अतिशायने तमबिष्ठनौ[7]' इति। अत्र अतिशायने इतिपदार्थः प्रकृत्यर्थे विशेषणमस्ति। तेन अतिशयितरिविद्यमानात् प्रातिपदिकात स्वार्थेतमबिष्ठनौ भवत इति सूत्रस्यार्थो जायते। एतल्लक्ष्यं सर्वे इमे आढ्याः अयमेषामतिशयेन आढ्य इति विग्रहे तमपि सति आढ्यतम इति प्रयुज्यते। एवं सर्वे इमे पटवः अयमेषामतिशयेन पटुः इति विग्रहे च इष्ठनि पटिष्ठनि पटिष्ठः इति पदं सिध्यति।

अनयोरतिशायने तमबिष्ठनौ 'तिङश्च[8]' इति सामान्यशास्त्रयोरपि अपवादशास्त्रं वर्त्तते 'द्विवचनविभज्योपपदेतरबीयसुनौ[9]' इति। अनेन

---

१. पा० सु० ५।३।४०
२. पा० सु० ५।३।२८
३. पा० सू० ५।३।३४
४. पा० सु० ५।३।३६
५. पा० सु० ५।३।३७
६. पा० सू० ५।३।३८
७. पा० सू० ५।३।५५
८. पा० सू० ५।३।५६
९. पा० सू० ५।३।५७

हि द्वयोरेकस्या तिशये विभक्तव्येचोपपदे सुबन्तात् तिङन्ताच्च तरबीयसुनौ प्रत्ययौ विधीयते। तेन द्वाविमाढ्यौ अयमनयोरतिशयेनाढ्य इति आढयतर इत्यत्र तमप्प्रत्ययमपवाद्य तरपप्रत्ययो जातः। तथा द्वाविमौपटुः अयमनयोरति शयेन पटुरित्यत्र ईयसुनि च पटियानिति निष्पद्यते तिङन्तादपि द्वयोरेकस्या-तिशये द्योत्ये तमप्प्रत्ययमपवाद्य एतावेव प्रत्ययौ भवतः। तेन इमौ पचतः, अयमनयोरतिशयेन पचतीत्यर्थे पचतितरामित्युच्यते। इष्ठन्नीयसुनप्रत्यौ च गुणवचनादेव भवतः। तथा चानुशासनं वर्त्तते' अजादिगुणवचनादेवेति[१]'। अतोऽत्र तिङन्तस्य क्रियाशब्दत्वात् इष्ठन्नीयसुन्प्रत्ययोरुदाहरणं नोपलभ्येत इत्यवगन्तव्यम्।

विभज्योपपदे चैनयोः प्रत्यययोः माथुराः पाटलिपुत्रकेभ्यः आढ्य-तराः, दर्शनीयतराः, पटीयांसः, लधीयांसः, इत्याद्युदाहरणानि मिलन्ति। परन्तु बाध्यबाधकभावश्चात्र केवलं द्वयोरेकस्यातिशयविषयकः न तु विभक्तव्योपपदविषयकः यतोहि विभक्तव्योपपदे उत्सर्गस्य 'अतिशायने-तमबिष्ठनावित्यस्य प्रसङ्गो नास्ति।

एवं रूपप्प्रत्ययोऽपि सुबन्तात् तिङन्ताच्च 'प्रशंसायां रूपबिति[२]' सामान्यशास्त्रेण विधीयते। तेन प्रशस्तो वैयाकरणो वैयाकरणरूपः, प्रशस्तं पचति पचतिरूपमित्यत्र रूपप्प्रत्ययो दृश्यते। अस्य रूपप्प्रत्ययस्यापवाद-शास्त्रे द्वे स्तः–'सस्नौ प्रशसायाम्[३]' वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि[४]' इति तत्र सस्नौ प्रशंसायामित्यत्र 'मृदस्तिकन्[५]' इति सूत्राद् मृद् इति पञ्चम्यन्तं पदमनुवर्त्तते। अतः प्रशंसोपाधिकेऽर्थे वर्त्तमानाद् मृच्छब्दात् सस्नौ प्रत्ययौ स्वार्थे भवतः इति सूत्रार्थः संघटते। तेन प्रशस्तामृद् मृत्सा, मृत्स्नेति पदद्वयं सिध्यति। अत्र रूपप् प्रत्ययस्यापि सामान्यतः प्राप्ति-रासीत् किन्तु मृत्सम्बन्धिनी यत्र प्रशंसा द्योत्यते तत्र तु 'सस्नौ प्रशंसायाम्[६]' इति विशेषशास्त्रेण तदपवाद्यत इति भावः।

योनो दुरेवो वृकतिः, ज्येष्ठतातिं बर्हिषदम इति वैदिकप्रयोगे तु 'वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि, इति विशेषशास्त्रेण रूपप्प्रत्ययस्य बाधो दृश्यते।

---

१. पा० सू० ५।३।५८
२. पा० सू० ५।३।६६
३. पा० सू० ५।४।४०
४. पा० सू० ५।४।४१
५. पा० सू० ५।४।३९
६. पा० सू० ५।४।४०

तदेव स्तातिप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्रनिरूपणप्रसङ्गे स्वार्थिकत्वात् तमबिष्ठन् रूपप्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राण्यपीह विवेचितानि ।

कप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि

अत्र कप्रत्ययस्वार्थिकः। अतः सामान्यतः अज्ञातकुत्सितानुकम्पात्वाद्युपधिकेष्वर्थेषु वर्त्तमानेभ्यः प्रातिपदिकेभ्य प्रकृत्यर्थद्योतनाय 'अज्ञाते[1]' 'कुत्सिते[2]' 'अनुकम्पायामि[3]' त्यादि सामान्यशास्त्रैः कप्रत्ययो विधीयते। तद्यथा–अज्ञाते–कस्यायमश्वः अश्वकः तथा कुटिसतः, निन्दितः, गर्हितो वा अश्वः इति विग्रहेऽपि अश्वकः इति प्रयुज्यते। अनुकम्पितः पुत्रः पुत्रकः इत्यत्र चानुकम्पा द्योतकः कप्रत्ययः सिद्धः। अस्य कप्रत्ययाधिकारश्च 'प्रागिवात्कः[4]' इति सूत्रादारभ्य 'इवेप्रतिकृतौ[5]' इति सूत्रात् प्राक्-प्रवर्त्तत इत्यधिकार सूत्रेणैवागम्यते। अस्मिन् कप्रत्याधिकारे ये किल विशेषप्रत्यया विहितो सन्ति, तैरेष कप्रत्ययोऽपवाद्य ते ।

तस्मात्तेषां विशेष प्रत्ययानां परिचयः सानुशासनं सोदाहरणञ्चेह प्रस्तूयते—

क प्रत्ययस्यापवाद शास्त्राणि	कार्यम्	उदाहरणानि
अव्ययसर्वनाम्नामकच्प्राक्टेः[6],	अकच्	उच्चकैः, नीचकैः सर्वके
संज्ञायांकन्[7]'	कन्	शूद्रकः राधकः
जातिनाम्नःकन्[8]'	कन्	व्याघ्रकः सिंहकः
अजिनान्तस्योत्तरपदलोपश्च[9],	कन्	व्याघ्रकः सिंहकः
संज्ञायांकन्[10]'	कन्	वंशकः, वेणुकः

१. पा० सू० ५।३।७२
२. पा० सू० ५।३।७४
३. पा० सू० ५।३।७५
४. पा० सू० ५।३।७०
५. पा० सू० ५।३।९६
६. पा० सू० ५।३।७१
७. पा० सू० ५।३।७५ शूद्रकः राधक इति कुत्सित पुरुषस्य सज्ञा तद्द्योतनायानेनकन् प्रत्ययोः जातः
८. पा० सू० ५।३।८१
९. पा० सू० ५।३।८२
१०. पा० सू० ५।३।८७ वंशकः बेणुकः इत्यत्र च ह्रस्वः वेणुजाति विशेषस्यद्योतकः कन् प्रत्ययोऽयम विहित

कुटीशमीशुण्डाभ्योरः[1]	रः	कुटीरः, शमीरः
कुत्वाडुपच्[2]	डुपच्	कुतुपम्
कासूगोणीभ्यांष्टरच्[3]	ष्टरच्	कास्तूरी
वत्सोक्षाश्वर्षभेभ्यश्च-तउत्वेष्टरच्[4]	ष्टरच्	वत्सतरः उक्षतरः,
किंयत्तदोनिर्धारणे द्वयोरेकस्य उतरच्[5]	उतरच्	कतरोभवतोः कठः
वाबहूनांजातिपरिप्रश्नेउममच्[6]	उतमच्	कतमोभवतां कठः
एकाच्च प्राचाम्[7]	उतरच्	एकतरो भवतोदेवतः एकतमो भवतांदेवदत्तः
अवक्षेपणेकन्[8]	कन्	व्याकरणकेननामत्वंगर्वितः

एषु कप्रत्ययापवादभूताकजादि प्रत्ययोदाहरणेषु उच्चकैः, नीचकैः, सर्वके इत्यत्र काकचो भेदः सुलभः, यतोहि कप्रत्ययः प्रकृतेः परो भवति सामान्यतः। तदपवादभूतः अकच् प्रत्ययस्तु प्रकृतेः टेः प्रागिति विशेषः। यद्यत्रापि क प्रत्ययः स्यात्तदा उच्चैः कः, नीच्चैः कः, सर्वकाः इतिरूपमापद्येत तच्च नेष्टमिति तीह काकचो र्बाध्यबाधकभाव फलं स्पष्टम्।

अत्रायमपि काकचोर्विशेषो दृश्यते यत्तिङन्तात् कप्रत्ययो नेष्यते, अकच् प्रत्ययस्तु पचतकि, जल्पतकीत्यत्र इष्यत एव। पदानामिष्टा मिष्टविषये च शिष्टा एव प्रमाणमिति शब्दतत्व विदां सिद्धान्तः। अस्तु।

एवं कुटीर कुतुपादिलक्ष्येषु क प्रत्ययाद् भिन्नत्वं स्वरूपतः प्रत्यक्ष-मेवेति तत्र न किञ्चिद् वक्तव्यम्। अत्र ककनोर्बाध्यबाधक भाव फलं स्वरूपतो न ज्ञायते, अपि तु स्वरतः। तथाहि यत्र क प्रत्ययो भवति तत्र आद्युदात्तश्चेति[9] सामान्यशास्त्रेण प्रत्ययस्याद्युदात्तत्वं विधीयते, यत्र च कन् प्रत्ययो जायते तत्र तु 'ञ्नित्यादिर्नित्यम्[10]' इति विशेषशास्त्रेण ञिति निति प्रत्यये परे प्रकृतेराद्युदात्तत्वं सिध्यतीति क प्रत्ययात्कन् प्रत्ययस्य व्यतिरेकः स्वरजन्यः सिद्धः।

तदेवं कप्रत्ययाधिकारस्थोत्सर्गापवादशास्त्राणां निर्णयो निष्पन्नः।

---

१. पा० सू० ५।३।८८
२. पा० सू० ५।३।८९
३. पा० सू० ५।३।९०
४. पा० सू० ५।३।९१
५. पा० सू० ५।३।९२
६. पा० सू० ५।३।९३
७. पा० सू० ५।३।९४
८. पा० सू० ५।३।९५
९. पा० सू० ३।१।३
१०. पा० सू० ६।१।१९७

कन्कृत्वसुचप्रत्यययोरपवादशास्त्राणि

पूर्वप्रकरणे तावत् कप्रत्ययापवादभूतस्य कुत्सितसंज्ञाजातिनामादि-द्योतकस्य यस्य कन् प्रत्ययस्य परिचयो ज्ञातः, स तु कप्रत्ययाधिकारस्य आसीत्। इदानी तद्बहिर्भूत कन् प्रत्ययस्य विवेचनं क्रियते। तत्र क प्रत्ययस्याधिकारः इवे प्रतिकृताविति' सूत्रात् प्रागेवेति 'प्राग्विवात्कः' इति सूत्रेण बोधित। अतः 'इवे प्रतिकृताविति' शास्त्रेण यः कन् प्रत्ययो विधीयते, स तु इवार्थद्योतकः। यथा अश्व इव प्रतिकृतिरित्यत्र अश्वकः इति प्रयुज्यते। प्रतिकृतिपदेन मृदादि-निर्मितप्रतिमा गृह्यते। अतएव गौरिव गवय इत्यत्र साद्दश्यरूपेवार्थे क प्रत्ययो न दृश्यते।

प्रतिकृति-रूपसदृश-बोधक एष कन् प्रत्ययः कथं स्वार्थिक इति तु नात्र भ्रमितव्यम्। यतो हि यथा गौर्वाहीक इत्यत्र सादृश्यनिबन्धना भेदोपचारो दृश्यते, तथैवात्रापि अश्वशब्द एव प्रतिकृतौ वर्त्तते, एष कन प्रत्ययश्च तद्भेदोपचारस्य द्योतक इति समादधति विज्ञाः। अस्तु।

प्रायः पूर्ववदत्रापि कन् प्रत्ययः यं कमपि प्रत्ययमपवाद्य प्रवर्त्तते। यथा स्थूलप्रकारः, स्थूलकः अणुप्रकारः अणुकप्रभृतिषु 'प्रकारवचने जातीयर[1]' इति सामान्यशास्त्रविहित जातीयर प्रत्ययमपावद्य 'स्थूलादिभ्यः' प्रकार-वचने कन्[2]' इति विशेषशास्त्रेण कन् प्रत्ययो जातः। केवलं छिन्नकं भिन्न-कमित्यत्र इषच्छिन्न भिन्नार्थद्योत्ये 'अनत्यन्तगतौक्तात्[3]' इति सूत्र-विहित कन् प्रत्ययस्य 'सामिकृतम्' अर्धकृतम् नेमकृतमित्यत्र 'नसामि-वचने[4]' इति निषेधसपापवाद शास्त्रेण बाधो भवति अनत्यन्त गतिरि-त्यनेन वस्तुनः एकदेशो बोध्यते। यतो हि अत्यन्तगति पदेन सर्वावयव सम्बन्धो गृह्यते। अत्यन्तगतौ तु तदवयक सम्बन्ध एव समायाति। अतः छिन्नकं भिन्नकमित्यनेन किञ्चिदवयवाच्छेदेन छिन्नंभिन्न-मित्यर्थो जायते।

कृत्वसुच्प्रत्ययश्च 'संस्यायाः क्रियाभ्यावृत्ति गणनेकृत्वसुच्[5]' इति सामान्यशास्त्रेण विधीयते। तेन पञ्चवारानभुङ्क्ते सप्तवारान वा भुङ्क्ते इत्यादौ कृत्वसुचि सति पञ्चकृत्वः, सप्तकृत्वः इत्यादि पदानि सिद्धयन्ति।

---

१. पा६ सू० ५।३।६९
२. पा० सू० ५,४।३
३. पा० सू० ५।४।४
४. पा० सू० ५।४।५
५. पा० सू० ५।४।४

अस्य कृत्वसुच् प्रत्ययस्यापवादो भवति सुच् प्रत्ययश्च 'द्वित्रिचतुर्भ्यः, सुच्'[1] 'एकस्य सकृच्चेति'[2] विशेषशास्त्राभ्यां विधीयते। प्रथमसूत्रेण द्वित्रिचतुर इत्येभ्यः संख्याशब्देभ्यः क्रियाभ्योवृत्ति गणने सुच्प्रत्ययो भवति। यथा द्विर्भुङ्क्ते, त्रिर्भुङ्क्ते इत्ययेत्र। द्वितीयेन 'एकस्य सकृच्चेति सूत्रेण तु सुच् प्रत्ययेन सह एकशब्दस्थाने सकृदादेशोऽपि जायते, तेन एकवारः भुङ्क्ते इत्यत्र सकृद्भुक्तङ्‍ इति प्रयुज्यते। यद्यप्यत्र कियाभ्यावृत्तिर्नास्ति, तथापि क्रियागणनं तु विद्यत एव। अत उभयत्रापि सामान्यतः कृत्वसुच् प्रत्ययस्यावश्यप्राप्तिरस्त्येव। तस्मात्तस्यावश्यप्राप्तौ सुच् प्रत्ययस्य विधानेन कृत्व सुचः सुजपवाद इति फलति।

तदित्थमिह कन् कृत्वसुच प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्र-विवेचनेन साकं समेषां सुबन्ताद्विहित तद्धित प्रत्ययसम्बध्युत्सर्गापवादशास्त्राणां विमर्शः सम्पन्नः॥

---

१. पा० सू० ५।४।१८ २. पा० सू० ५।४।१९

नवमो विमर्शः

कारकविभक्तिविधावुत्सर्गापवादत्वम्

पूर्वविमर्शे प्रातिपदिकात् सुबन्ताच्च विहितप्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि विवेचितानि। तत्र च ये प्रातिपदिकेभ्यः स्वादयः एकविंशतिप्रत्ययाः विभक्तिसंज्ञकाः प्रोक्ताः। यतश्च एकैकस्य प्रातिपादिकशब्दस्य एकोनविंशतिरूपाणि जायन्ते तेषामेकविंशतिस्वादिप्रत्ययानां सम्बन्धादेव प्रथमादीनामपि विभक्तित्वं संघटते। अतोऽत्र तत्सम्बन्धिप्रथमाविभक्तिविधावुत्सर्गापवादत्वं विविच्यते। प्रथमाविभक्तयस्तावत् शब्दानुशासने सप्त प्रसिद्धाः। एताः सप्तविभक्तयश्च ऋग्वेदमन्त्रेऽपि श्रूयन्ते। तद्यथा

चत्वारि शृङ्गा त्रयोऽस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आविवेश[1]॥

तथा च व्याख्यातं शब्दानुशासनप्रयोजनप्रसङ्गे महाभाष्यकारेण पतञ्जलिना—चत्वारि शृंङ्गाणि-चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। "त्रयो अस्य पादाः—त्रयः काला - भूतभविष्यद्वर्तमानाः द्वे शीर्षे-द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्तहस्तासो-अस्य-सप्तविभक्तयः। त्रिधा बद्धः—त्रिषु स्थाने बद्ध उरसि कण्ठे शिरसीति। वृषभो—वर्षणात। रोरवीत्ति—शब्दं करोति। कुत एतत्? रौति शब्दकर्मा। "महोदेर्वा मर्त्यां आविवेशेति–महान्देवः शब्दः॥ मर्त्या मरणधर्माणो मनुष्यास्तानाविशेष महता देवेन-न साम्यं यथा स्यादित्यध्येयं व्याकरणम्[2] इति।

अत्र शब्दस्य वृषभत्वरूपके प्रथमादिसप्तविभक्तीनां हस्तत्वेन निर्देशो जात इति स्पष्टमेव। आसु सप्तविभक्तिषु कारक विभक्तिपदेन ग्रहणन्तु षण्णामेव भवति। यतोहि कारक इति महती संज्ञा, अतः करोति क्रियां निर्वर्त्तयतीत्यन्वर्थभूतेयं संज्ञा। क्रियानिवर्त्तकत्वं जनकत्वञ्च षण्णामेव सिध्यति। तथा चोक्तमभियुक्तैः—

१. ४ मः ५८ अ० ३ मंत्र

२. म. भा० पास्पशाठः

कर्त्ता कर्म च करणञ्च सम्प्रदानं तथैव च ।
अपादानमधिकरणमित्याहुः कारकाणि षट्'[१] इति ॥

ब्राह्मणस्य पुत्रो गच्छति" इत्यत्र तु ब्राह्मणस्य पुत्रेण सह जन्यजनकभावसम्बन्धो भाति न तु क्रियया। अत क्रियाजनकत्वाभावात् षष्ठयाः कारकत्वं नास्तीति निश्चयो जातः।

कारकविभक्तिविधिः विषयकोत्सर्गापवादेषु च प्रथमा द्वितीयेति विभक्तिद्वयमेव दृश्यते। तत्र प्रथमा विभक्तिस्तावत् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा[२]" "सम्बोधने च[३]" इति शास्त्रद्वयेन विधीयते। एतदुदाहरणानि च सिद्धान्तकौमुद्यां प्रातिपदिकार्थमात्रे-उच्चैः, कृष्णः, श्रीः, ज्ञानम्, लिङ्गमात्राद्याधिक्ये तटः, तटी, तटम्, परिमाणमात्रे-द्रोणो व्रीहिः, संख्यामात्रे एकः, द्वौ, बहवः, सम्बोधने च हे राम! इत्येवं प्रदर्शितानि। अत्र नियतोपस्थितिकः प्रातिपदिकार्थ इति प्रातिपदिकार्थः लक्षणमभिलक्ष्य "ग्रामस्य दूरम्" ग्रामस्य अन्तिकमित्यत्रापि दूरान्तिकशब्दात् सामान्यतः प्रथमाविभक्तिः प्राप्नोति, किन्तु "दूरान्तिकार्थेभ्यो द्वितीया च[४]" इति विशेषशास्त्रेण प्रातिपादिकार्थमात्रे प्राप्तस्य विधेरपवादो भवति। तेन 'ग्रामस्य दूरम्" ग्रामस्य अन्तिकम्" इति वाक्यमेव प्रयुज्यते, न तु "ग्रामस्य दूरम" ग्रामस्य अन्तिकम्" इति। अत्र दूरान्तिकशब्दात् पञ्चमी तृतीया विभक्तिद्वयमपि प्रयुज्यते। एतत् सूचनार्थं सूत्रेऽस्मिन् द्वितिया च इत्यत्र चकारः समुच्चयार्थको निबहः। 'दूरान्तिकार्थेभ्यो द्वितीया च" इत्यत्रार्थोपादानात् ग्रामस्य विप्रकृष्टम् ग्रामस्य समीपम् इत्यत्रापि प्रथमा विभक्तेरपवादो बोध्यः।

अत्रेदमप्यवधेयं यत् यत्र दूरान्तिकार्थ शब्दाः असत्ववचनाः, अर्थोल्लिङ्गसंख्यानन्विताः सन्ति, तत्रैव प्रथमाविभक्तेरपवादो भवति। यत्र तु सत्वरूपद्रव्यस्य विशेषणीभूतास्ते समुपलभ्यन्ते तत्र तु प्रथमाविभक्तिरेव भवति। यथा दूरः पन्थाः इत्यत्र दूरशब्दः पन्थाः इति द्रव्यपदार्थस्य विशेषणीभूतः। तस्मादत्र प्रातिपदिकार्थे प्रथमा विभक्तिर्भवति। एतच्चात्र 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य[५]' इति सूत्राद् अनुवृतस्यासत्ववचनस्य फलं बोध्यम्। तथाच भट्टोजीदीक्षित महाभागैरपि

१ परमलघुमञ्जुषायां
२. पा० सू० २।३।४६
३. पा० सू० २।३।४७
४. पा० सू० ३।३।३५
५. पा० सू० २।३।३३

'असत्ववचनस्य इत्यनुवृत्तेर्नेह दूरः पन्थाः इति व्याख्यातम्। एता च दूरान्तिकार्थेभ्यो द्वितीयाच्चेति विशेषशास्त्रेण प्रातिपदिकार्थ मात्रे प्राप्तस्य प्रथामाविभक्तेरपवादमार्गः सुलभो जातः।

द्वितीया विभक्तिश्च सामान्यतः 'कर्मणि द्वितीया[१]' इति शास्त्रेण विधीयते। कर्मसंज्ञाविधायकानि शास्त्राणि च सन्ति बहूनि। तेषु 'कर्तुरीप्सिततमं कर्म[२]' इति शास्त्रं प्रधानभूतमस्ति। अन्यानि च 'तथायुक्तं चानीप्सिततम्[३]' 'अकथितञ्च[४]' 'ज्ञातिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ[५]' 'अधिशीङ्स्थासां कर्म[६]' 'अभिनिविशश्च[७]' 'उपान्वध्याङ्वसः[८]' इत्यादीनि विद्यन्ते।

एषु सर्वेषु कर्मसंज्ञा विधायकस्थलेषु 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिभवति। तद्यथा 'हरिं भजति, ग्रामं गच्छँस्तृणं स्पृशति, गां दोग्धि पयः' शत्रूनगमयत स्वर्गम्, अतिशेते वैकुण्ठं हरिः, अभिनिविशते सन्मार्गम्, अधिवसति वैकुण्ठं हरिरित्यादौ द्वितीया विभक्तिः श्रूयते। अस्या द्वितीया विभक्तेश्चापवादभूतानि चत्वारि शास्त्राणि मिलन्ति। तत् तावत् फलान्याहर्तुं यातीत्यर्थे फलेभ्यो यातीत्यत्र 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः[९]' इति विशेषशास्त्रेण द्वितीयाविभक्तिमपवाद्य चतुर्थीविभक्तिर्विधीयते। एवं नमस्कुर्मो नृसिंहाय स्वयम्भुवे नमस्कृत्य इत्यादावपि कर्मणि चतुर्थी सिध्यति।

न त्वाँ तृणाय मन्ये, न त्वां तृणं मन्ये इत्यत्र च मन्यतेः कर्मणि द्वितीयाविभक्ते वैकल्पिकोऽपवादो दृश्यते। तथा चानुशासनमस्ति 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु[१०]' एवं संपूर्वकस्य जानातेः कर्मणि तृतीया विभक्तिरपि भवति वैकल्पिकी। तेन यथा पितरं सञ्जानीते मातरं सञ्जानीते इत्यत्र द्वितीया विभक्तिः प्रयुज्यते। तथैव पित्रा सञ्जानीते मात्रा सञ्जानीते इत्यत्र कर्मणि तृतीयाविभक्तिरपि शिष्टैरङ्गीकृता।

१. पा० सू० २।३।२९
२. पा० सू० १।४।४९
३. पा० सू० १।४।५०
४. पा० सू० १।४।५१
५. पा० सू० १।४।५२
६. पा० सू० १।४।४६
७ पा० सू० १।४।४७
८. पा० सू० १।४।४८
९. पा० सू० ५।३।१४
१०. पा० सू० १।४।२२

तथा च शास्त्रं विद्यते संज्ञोऽन्यतरस्यां कर्मणीति[१]।

द्वितीयाविभक्तेश्चतुर्थापवादस्थले अग्नेः छागस्य हविषोवपाया मेदसः प्रेष्य अनुब्रूहि वा इत्यत्र च द्वितीयाविभक्तिमपवाद्य षष्ठीविभक्तिर्जायते। तथा च अनुशासनमस्ति 'प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने[२]' इति। अनेन हि देवतासम्प्रदानकेऽर्थे विद्यमाने सति हविर्विशेषस्य कर्मणः षष्ठी विभक्तिर्विधीयते।

एषु द्वितीयाविभक्तेरपवादभूतचतुर्षु शास्त्रेषु 'क्रियार्थोपपदस्य कर्मणि स्थानिः' 'प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने' इति शास्त्रद्वयेन द्वितीया विभक्तिर्नित्यमपवाद्यते। 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' 'संज्ञोऽन्यतरस्यां कर्मणि' इति शास्त्रद्वयेन तु वैकल्पिको भवति बाध इति विशेषः। पूर्वोक्तलक्ष्येषु कर्मणि द्वितीयेति सामान्य शास्त्रस्यावश्यप्राप्तौ चैषामारम्भो जात इति निरवकाशत्वात्तदपवादत्वं स्पष्टमेवेति भावः।

तदित्थं कारकविभक्तिषु द्वितीया विभक्तेरप्यपवादशास्त्राणि निरूपितानि।

विशेषशास्त्रविहितद्वितीयादिविभक्तिसम्बन्ध्युत्सर्गापवादत्वम्

द्वितीयातृतीयादिविभक्तयश्च न केवलं कर्मकर्तृकरणादिसंज्ञाः समाश्रित्य प्रवर्तन्ते, अपितु अर्थं पदञ्चाश्रित्य सम्पद्यन्ते। तद्यथा— मासमधीते, क्रोशमधीते इत्यत्र 'कालाध्वनोरत्यन्तसंयोगे[२]' इति शास्त्रेण कालाध्वनोर्निरन्तरसंयोगरूपार्थद्योत्येऽपि द्वितीया विभक्तिर्विधीयते। अत्र द्वितीयाविधायकशास्त्रस्याप्यपवादशास्त्रं विद्यते 'अपवर्गे तृतीया[३]' इति। अपवर्गेऽर्थात् फलप्राप्तिप्रतीतौ कालाध्वनोरत्यन्तसंयोगे सति द्वितीयाविभक्तिमपवाद्य तृतीया विभक्तिर्भवति। अत देवदत्तेन अह्ना क्रोशेन वा अनुवाकोऽधीत इत्यत्र कालाध्वनोः तृतीयैव न तु द्वितीया।

यतोहि देवदत्तेन अनुवाकोधीतः अर्थात् कण्ठीकृतः इति फलप्राप्तिरत्र प्रतीयते। एवं पदमाश्रित्योपपन्नासु विभक्तिष्वपि बाध्यबाधकभावो दृश्यते। स च षष्ठी विभक्त्यपवादप्रसङ्गेऽनुपदं निरूपयिष्यते। धनेन कुलं विद्यया यशः इत्यत्र च हेत्वर्थे द्योत्ये "हेतौ[४]" इति सामान्यशास्त्रेण तृतीया विभक्तिर्विधीयते। सा च हेतुभूतजपोपलक्षितं वर्षणमित्यर्थके जपमनु-

१. पा० सू० २।३।६१
२. पा० सू० २।३।३२
३. पा० सू० २।३।५
४. पा० सू० २।३।१२

पावर्षत् इत्यत्र "अनुर्लक्षणे[1]" इति अनो कर्मप्रवचनीयसंज्ञा विधान-सामर्थ्यात् "कर्मप्रवचनयुक्ते द्वितीया" इति शास्त्रेण वाध्यते। यद्यप्यत्र हेतौ इति सत्रेण विधीयमानतृतीयायाः पर वाद् बलवत्व सिद्धम्। यतोहि "वृक्षमनु विद्योतते विद्युत्" इत्यत्र लक्षणे कर्मप्रवचनसंज्ञया अवकाशः धनेन कुल मित्यत्र च हेतु तृतीया या अवकाशो दृष्टः "जपमनु प्रावषत" इत्यत्र तु हेतु भूतलक्षणे उभयोः प्राप्तौ परत्वात् तृतीया स्यादिति, तथापि "अनुर्लक्षणे[2]" इति शास्त्रेण पुन कर्मप्रवचनीय संज्ञाविधानसामर्थ्यात "कर्मप्रवचनीययुक्ते द्वितियेति" शास्त्रेणात्र तृतीयाविभक्तिमपवाद्य द्वितीयैव भवति। तथा च व्याख्यातं भट्टोजीदिक्षितमहाभागैरपि "परापि हेतौ तृतीया अनेन वाध्यते। लक्षणेत्थम्भूत इत्यादिना सिद्धेः पुनः संज्ञा सामर्थ्यादिति[२]।

परार्धादधिका हरेर्गुणा इत्यर्थे उपपरार्धे हरेर्गुणाः इत्यत्र उपोऽधिके चेति सूत्रविहितकर्मप्रवचनीयसंज्ञामादाय प्राप्तद्वितीयाविभक्तेर्बाधश्च "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" इति विशेषशास्त्रेण भवति। ततश्चात्र सप्तमी सिध्यति। एवम् "अधिरीश्वरे" इति सूत्रेण स्वस्वामिसम्बन्धे अधेः कृतकर्मप्रवचनीयसंज्ञायामपि शास्त्रेणानेन अधि-भुवि रामः अधिरामे भू इत्यत्र सप्तमीविभक्तिः सिध्यति। अत्र स्ववाचकात् स्वामिवाचकाच्च पर्यायेणोभयत्रापि सप्तमी विभक्तिरिष्यते। तथा च भुवः स्वामी रामः, रामस्य स्वभूता भूरिति शाब्दबोधे विशेषो दृश्यते। अस्तु।

हेताविति सामान्यशास्त्रेण विधीयमानतृतीया विभक्तेरपवाद-शास्त्रेष्वपराण्यपि 'अकर्तयृणे पञ्चमी[3]' 'विभाषागुणेऽस्त्रियाम्[4]' 'षष्ठी हेतुप्रयोगे[5]' इति त्रीणि विशेषशास्त्राणि विद्यन्ते। ततश्च 'शताद् बद्धः' 'सहस्राद् बद्धः' इत्यत्र कर्तृवर्णिताद् हेतुभूताद् ऋण् बोधकात् शतसहस्र-शब्दाद् 'अकर्तयृणे पञ्चमी' इति विशेषशास्त्रेण पञ्चमीविभक्तिरेव विधीयते।

एवं जाड्याद् बद्धः जाड्येन वा बद्धः इत्यत्र हेताविति सामान्य-शास्त्रस्य 'विभाषा गुणेऽस्त्रियाम्' इति विशेषशास्त्रेण भवति वैकल्पिका-पवादः। अत्र स्त्रीलिङ्गभिन्नो हि गुणो हेतुपदेन गृह्यते। अत एव बुद्ध्यामुक्तः

---

१. पा० सू० २।४।४८
२. पा० सू० १।३।२८
सिद्धान्त कौमुद्या कारकप्रकारणम्।
३. पा० सू० २।३।२४
४. पा० सू० २।३।२५
५. पा० सू० २।३।२६

धनेन कुलमित्यत्र स्त्रीलिङ्ग द्रव्ये च हेतौ तृतीया विभक्तिरेव दृश्यते, नतु पञ्चमी इति। सूत्रोपात्तगुणेऽस्त्रियामिति पदद्वयस्य फलं बोध्यम्।

तथा षष्ठी हेतुप्रयोगे इति विशेषशास्त्रेणापि 'हेतुशब्दप्रयोगे हेतौ द्योत्ये च हेताविति सामान्यशास्त्रेण प्राप्तायाः तृतीयाविभक्तेर्भवति बाधः। ततश्च अन्नस्य हेतोर्वसतीत्यत्र षष्ठी विभक्तिरेव भवति साधु न तु तृतीया। यदि चात्र सर्वनाम्नो हेतुशब्दस्य प्रयोगः स्यात्तदा हेतौ द्योत्ये तृतीयाषठीत्युभयमपि समुच्चीयते। तथा चानुशासनमस्ति 'सर्वनाम्नस्तृतीया चेति[६]'। अत एव केन हेतुना, कस्य हेतोर्वसतीत्युभयमपि व्यवहृयते।

तदेवं हेताविति सामान्यशास्त्रस्य पूर्वोक्तकर्मप्रवचनीययुक्ते द्वितीया इति शास्त्रेण सह चत्वारि अपवादशास्त्राणीह संगृह्य विवेचितानि।

एषु हेताविल्युत्सर्गापवादभूतेषु चतुर्षु शास्त्रेषु 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यपवादशास्त्रस्याप्यपवादभूते 'पञ्चम्यपाङ्परिभिः[२]' 'प्रतिनिधिप्रतिदाने च यस्मात्[३]' इति द्वे शास्त्रे स्तः। यतो हि सामान्यतः येषां कर्मप्रवचनीयसंज्ञा भवति तद्योगे च 'कर्मप्रवचनीययुक्तेद्वितीया' इति सामान्यशास्त्रेण द्वितीयाविभक्तिर्विधीयते। तथा च 'अपपरिवर्जने[४]' आङ्मर्यादावचने[५]' इति सूत्राभ्यां अपपर्याङ् पदानामपि कर्मप्रवचनीय-संज्ञा क्रियते। अतः एषां कर्मप्रवचनीयत्वेऽपि पूर्वोक्तसामान्यशास्त्रेण द्वितीया प्राप्ता। ताञ्च प्रबाध्य 'पञ्चम्यपाङ्परिभिः' इति विशेषशास्त्रेण पञ्चमी विभक्तिर्विधीयते। अतः 'अपहरेः संसार' 'परिहरेः संसारः' 'आमुक्तेः संसार' इत्यत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिरेव दृश्यते न तु द्वितीयेति।

एवं प्रतिनिधिप्रतिदाने द्योत्यार्थे प्रतेरपि कर्मप्रवचनीयसंज्ञा भवति 'प्रतिः प्रतिनिधिप्रतिदानयोरिति[६]' शास्त्रेण। अतः 'प्रतिनिधिप्रतिदाने च यस्मात्' इति विशेषशास्त्रेणोत्सर्गतः प्राप्तद्वितीया विभक्तिमपवाद्य पञ्चमी विधीयते। तेन प्रद्युम्नः कृष्णात् प्रति इत्यत्र प्रतेः प्रतिनिधित्व-द्योतकत्वात् कृष्णशब्दात् भवति पञ्चमी। अत्रपञ्चम्यर्थः सादृश्यं, प्रतिस्तु

१. पा० सू० २।३।२७
२. पा० सू० २।३।१०
३, पा० सू० २।३।११
४. पा० सू० १।३।८८
५. पा० सू० १।४।८९
६. पा० सू० १।४।९२

तद्द्योतकः। अतः वृद्धादौ प्रद्युम्नः कृष्णनिरुपितसादृश्यवानित्यर्थः संघटते। तिलेभ्यः प्रतियच्छति माषानस्मै इत्यत्र च प्रतिशब्दः प्रतिदानार्थद्योतकः। ऋणत्वेन गृहीतस्य प्रत्यर्पणं हि प्रतिदानपदेनोच्यते। अत्रापि पूर्ववत् प्राप्तद्वितीयाविभक्तेरपवादो भवति पञ्चमी विभक्त्यात।

तस्मात् 'पञ्चम्यपाङ्परिभिः' 'प्रतिनिधिप्रतिदाने च यस्मादिति' शास्त्रद्वयं कर्मप्रवचनीययुक्ते द्वितीयेति शास्त्रस्यापवादभूतमिति सिध्यति।

तदेवञ्च विशेषशास्त्रविहितद्वितीयादिविभक्तिसम्बन्ध्युत्सर्गापवादस्वरूपमिह निष्पन्नम्।

षष्ठीविभक्तेरपवादशास्त्राणि

यद्यपि क्रियाजनकत्वाभावात् षष्ठयाः कारकत्वं नास्तीति सिद्धान्तः प्रसिद्धः, तथापि तत्र षष्ठीविभक्तिविधावुत्सर्गापवादत्वं तु दृश्यत एव। यतोहि सामान्यविशेषभावरूपोत्सर्गापवादविधिर्वै व्यापकः। स च प्रायः सर्वविधशास्त्रेषु समुपलभ्यते। अतः विभक्तिविधावपि तत्सम्बन्धो जागर्ति। उत्सर्गापवादभावः सर्वशास्त्रविषयः इत्यत्र विशेषरूपेण विचारस्तु प्रबन्धस्यास्य प्रस्तावनायां जातः।

अत्र षष्ठीविभक्तिविधौ च 'षष्ठी शेषे[१]' इति सामान्यशास्त्रं प्रवर्त्तते। तथा चोक्तादन्यः शेषः इति न्यायात् कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषपदेनात्र गृह्यते। अतः राज्ञः पुरुषः, राज्ञः कुमारः इत्यादौ स्वस्वामिभावजन्यजनकभावादि सम्बन्धेषु षष्ठी विभक्तिः सम्पद्यते।

एतदपवादशास्त्राणि सोदाहरणानि चाधोलिखितानि सन्ति—

'अन्तराऽन्तरेण युक्ते[२]'	अन्तरा त्वां मां हरिः, अन्तरेण हरिं न सुखम्।
'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते[३]'	अन्यो देवदत्तात् आरात् बनाद्
'यस्य च भावेन भावलक्षणम्[४]'	गोषु दुह्यमानसु गतः
'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः[५]'	मातरि साधुः, मातरि निपुणः

१. पा० सू० २।३।५०
२. पा० सू० २।३।४
३. पा० सू० २।३।२९
४. पा० सू० २।३।३७
५. पा० सू० २।२।४३

एषु अन्तरा त्वां मां हरिः अन्तरेण हरि न सुखम् इत्यत्र मध्यविनार्थबोधकान्तरान्तरेण शब्दयोगे 'अन्तराऽन्तरेण युक्ते' इति विशेषशास्त्रेण द्वितीया विभक्तिर्विधीयते। अत्रापि सामान्यतः षष्ठी प्राप्ता, किन्तु तस्या अपवादोऽनेन जातः।

ननु द्वयोश्चैवान्तरा कश्चिद् विद्यते इति हलोऽनन्तरासंयोगः' इति सूत्रस्थभाष्यप्रयोगे द्वितीया कथन्नेति प्रश्नमुद्भव्य कैयटमहाभागाः स्वप्रदीपे एवं समादधाति यत् यदा महयापेक्षया नियतावधिरूपत्वं विवक्ष्यते 'त्वां च मां चान्तरा कमण्डलुः' 'अग्नी अन्तरा धवखदिरावन्तरेति' तदा द्वितीया, यदा तु नियतावधित्वं न विवक्ष्यते अपि तु सम्बन्धमात्रं तदाषष्ठ येव भवति"। एतावता यत्रान्तरा शब्देन ययोर्हि मध्यत्वनिमित्तमवधित्वं निर्णीतं तत्र द्वितीया भवति, यत्र तु ययोः तन्निर्णयो न जातः तत्र सम्बन्धसामान्ये षष्ठी विभतिरेवेति निश्चीयते। तथा च द्वयोश्चैवान्तरा कश्चिक्त दित्यत्र द्वयोरेवावधित्वमुतान्य सहितयोरित्यवधिनियमाभावात् षष्ठीविभक्तिरेव भवितुमर्हति नतु द्वितीयेति भाष्याशयो बोध्यः।

एवमन्यारादितरादि योगे अन्यो देवदत्तादित्यादौ देवदत्तप्रतियोगिक भेदवानित्यर्थे षष्ठी प्राप्ता तस्या बाधश्च 'अन्यारादितरादितिविशेषशास्त्रेण जातः। अस्य अन्यारादिति विशेषशास्त्रस्यापवादशास्त्रमस्ति 'षष्ठ्यवसर्थप्रत्ययेन[2]' इति। अतः 'ग्रामस्य दक्षिणतः, ग्रामस्य उत्तरतः' इत्यत्र षष्ठी विभक्तिरेव सिद्धा। अत्र दिक्शब्दत्वात् पूर्वसूत्रेण पञ्चमी प्राप्ता, सा चानेन प्रबाध्यते।

दक्षिणेन ग्राममित्यत्र तु 'एनपा द्वितीयेति[3]' शास्त्रेण षष्ठ्यवसर्थ प्रत्ययेन इत्यस्यापवादो दृश्यते। एनप् प्रत्ययस्यापि अतसर्थ प्रत्ययान्तर्गतत्वादेवात्र षष्ठी प्राप्ता, सा च एनबिति नाम्ना निर्दिष्टविशेषशास्त्रेणानेन बाध्यते।

एवमग्रे गोषु दुह्यमानासु गतः देवदत्त इत्यत्र 'यस्य च भावेन भावलक्षणम्' इति शास्त्रेण या सप्तमी विहिता, सापि शेषे षष्ठीं प्रबाध्य जाता। यतोहि क्रियाश्रयकर्मणो वाचकाद् गोशब्दाद् लक्ष्यलक्षणभावसम्बन्धश्चात्र स्पष्टः। अत्र दोहनक्रियायाः साक्षाल्लक्षकत्वं गोश्च क्रियाद्वारेति भावः।

---

१. पा० सू० ११११७
२. पा० सू० ११३१३०
३. पा० सू० २१३१३१

एवं मातरि साधुः, मातरि निपुणः इत्यत्रापि शेषे षष्ठीमपवाद्य 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति विशेषशास्त्रेण सप्तमी विधीयते।

तदेवं षष्ठी शेषे इत्युत्सर्गापवादशास्त्राणि विवेचितानि। इदानीं कृष्णस्य कृतिः, जगतः कर्ता कृष्णः' इत्यत्र कृद्योगे कर्तरि कर्मणि च 'कर्तृकर्मणोः कृति[1]' इति शास्त्रविहिता या षष्ठी, तस्या अपवादशास्त्राण्यपीह विमृश्यन्ते। तत्र तावत् 'नलोकाव्ययनिष्ठाखलर्थतृनाम्[2]' 'अकेनोर्भविष्यदाधमर्ण्ययोः[3]' इति द्वे शास्त्रे तन्निषेधरूपापवादभूते स्तः। अतः ल, उ, उक्, अव्यय निष्ठा, खलर्थ तृन अक् इन इत्येषां योगे षष्ठी विभक्तिर्न भवति। एते च कृत् प्रत्ययान्तर्गता एव गृह्यन्ते। तद्यथा ल पदेन लडादीनां सामान्येन ग्रहणं भवति। लडादीनाञ्च साक्षात् प्रयोगाभावात्तदादेशभूतकृत्प्रत्यया एवात्र गृह्यन्ते। लादेशाः कृत्प्रत्ययाश्च शतृशानचौ कानच् क्वसू किकिनौ चेत्येते विद्यन्ते। तथा च ओदनं पचन्, ओदनं पचमानः, ओदनं पेचानः, ओदनं पेचिवान्, पपिः सोमम् ददिर्गाः इत्यत्र लादेशेषु कृत्सु षष्ठी विभक्तिर्निषिध्यते। एवं कटं चिकीर्षुः दैत्यान घातुको हरित्या धूकादीनामुदाहरणानि सिद्धान्तकौमुद्यां प्रदर्शितान्येव।

भविष्यत्काले विहितस्योकस्य भविष्यत्काले तथा आधमर्ण्ये विहितस्येनश्चोदाहरणेषु सज्जनान् पालयिष्यन् हरिः प्रादुर्भवतीत्यर्थे— यतः पालकोऽवतरति हरिरित्यत्र 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्[4]' इति सूत्रेण भविष्यति ण्वुल् भवति। यतो हि 'भविष्यति गम्यादयः[5]' इति सूत्रादत्र भविष्यति पदमनुवर्तते। ग्रामं गमिष्यन्नित्यर्थे ग्रामं गमी इत्यत्र ततु 'भविष्यति गम्यादयः' इति सूत्रेणेनि प्रत्ययो निपात्यते। एवमाधमर्ण्ये ऋणत्वेन गृहीतं शतं प्रत्यर्पयतीत्यर्थे शतं दायी इत्यत्र 'आवश्यकाधमर्ण्ययोर्णिनि[6]' इति सूत्रेण णिनि प्रत्ययो विधीयते। एषु सर्वेषु 'कर्तृकर्मणोः कृतिः' इति सामान्यशास्त्रेण षष्ठी प्राप्ता सा च आभ्यां विशेषशास्त्राभ्यां निषिद्धा। ततश्चात्र कर्मणि द्वितीया सिद्धा।

अत्र न लोकाव्ययनिष्ठेति निषेधशास्त्रस्यापि 'क्तस्य च वर्तमाने[7]' 'अधिकरणवाचिनश्च[8]' इत्यपवादशास्त्रद्वयं वर्त्तते। तेन राज्ञां मतः बुद्धः

१. पा० सू० २।३।६५
२. पा० सू० २।३।६९
३. पा० सू० २।३।७०
४. पा० सू० ३।३।१०
५. पा० सू० ३।३।३
६. पा० सू० ३।३।१७०
७. पा० सू० २।३।६७
८. पा० सू० २।३।६८

पूजितो वेत्यत्र 'मतिबुद्धिपूजार्थेभ्यश्च[१]' इति शास्त्रविहितवर्त्तमानकालसम्बन्धि क्तप्रत्यये परे निष्ठाप्रत्ययनिमित्तकं निषेध प्रतिषिध्य पुनः षष्ठी विधीयते। एवम् 'इदमेषासितम् शयितम्, गतम्, भुक्तम् वेत्यत्रापि 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः[२]' इति शास्त्रेण अधिकरणे विहितक्तप्रत्यये परे 'अधिकरणवाचिनश्चेति' विशेषशास्त्रविहित षष्ठ्या षष्ठीनिषेधः प्रतिषिद्धः। एते च 'क्तस्य वर्त्तमाने' 'अधिकरणवाचिनश्चेति' षष्ठीविधायकशास्त्रस्य पुरश्तादपवादरूपेण अष्टाध्याप्यां प्रस्तुते स्त.। तस्मादत्र 'नलोकाव्ययनिष्ठेति निषेधशास्त्रस्य प्रवृत्तौ सौकर्यं स्पष्टं प्रतिभाति।

तदित्थमिह सर्वविधषष्ठीविभक्तिसम्बन्ध्युत्सर्गापवादशास्त्राणां परिचयो जातः।

समाससम्बन्ध्युत्सर्गापवादशास्त्राणि

विभक्तिविधौ यान्युत्सर्गापवादशास्त्राणि सम्मिलन्ति तेषां विवेचनमितः पूर्वं जातम्। अथ समासविधायकशास्त्राणामुत्सर्गापवादत्वं विमृश्यते। विभक्तिविध्यनन्तरं हि समासप्रवृत्तिर्न्यायसिद्धा प्रतिभाति। यतोहि समासशास्त्रेषु विभक्तीनामेव सम्बन्धो दृश्यते। विभक्तिपदेन सुप्तिङ्प्रत्याहारश्चेत्युभयमपि संगृह्यते। तथा च सूत्रमस्ति विभक्तिश्चेति। सूत्रेऽस्मिन् तिङः सुपश्चेति पदद्वयं पूर्ववतोऽनुवर्त्तते। अतः सुप्तिङ् प्रत्याहारघटकप्रत्ययाः विभक्तिसंज्ञका भवन्तीत्यर्थोऽस्य सूत्रस्य जायते। समासविधौ चैनयोरुपयोगः प्रसिद्धः। तथाहि षड्विधसमासनिर्धारणे

'सूपां सुपा, तिङा नाम्ना धातुनाथ तिङा तिङा।

सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः[३]।

एषु षड्विधसमासेष्वपि यत्र सुबन्तस्य सुबन्तेन समासो विधीयते, प्रायस्तत्रैव समासविधायकशास्त्राणामुत्सर्गापवादो दृश्यते, नतु सर्वत्र। तथाहि समासविधायकशास्त्रेषु 'सहसुपेति[४]' शास्त्रमधिक्रियते। 'अत्र 'सुबामन्त्रिते प्राङ्कवत्सरे[५]' इति पूर्वसूत्रात् सुप्पदमनुवर्त्तते। ततः सुबन्तं सुबन्तेन सह समस्यते इत्यर्थः संघटते। समासाधिकारश्च 'सहसुपेति शास्त्र-

१. पा० सू० ३।२।१८८
२. पा० सू० ३।४।७६
३. वैयाकरणभूषणसारः १।८।३
४. पा० सू० २।१।४
५. पा० सू० २।१।२

मादाय 'कडाराः कर्मधारये[1]' इति सूत्रात् प्राक् प्रवर्त्तते। तथा च सहसुपेति सूत्राव्यवहितपूर्वसूत्रमस्ति 'प्राककडारात्समास[2]' इति। तेन समासाधिकारः 'कडाराकर्मधारये' इति सूत्रात प्राग् वेदितव्य इति निश्चीयते। अस्याधिकारे च प्राधान्येन अव्ययीभाव, तत्पुरुष बहुव्रीहि, द्वन्द्वसमासाः यथाक्रमं समायान्ति। तत्राव्ययीभावसमासविधायकशास्त्रेषूत्सर्गापवादो न दृश्यते। तत्पुरुषे तावत् 'द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः[3]' इति शास्त्रेण कृष्णं श्रितः, कृष्णश्रितः इत्यत्र समासे सति सुपो लुकि 'प्रथमानिर्दिष्टं समासउपसर्जनम्[4]' इति सूत्रेण कृष्णशब्दस्योपसर्जनसंज्ञायाम् 'उपसर्जनंपूर्वम[5]' इति शास्त्रेण तस्य पूर्वनिपातो भवति। ततश्च समासत्वात् प्रातिपदिकसंज्ञायां सत्यां सुविभक्तिः तस्या रुत्वे विसर्गे च कृष्णश्रितः कृष्णंश्रितः दुखातीतः इत्यादि समस्तपदानां प्रक्रियापद्धतिः प्रसिद्धयति। एवं सुखं प्राप्तः सुखप्राप्तः, सुखमापन्नः सुखापन्नः इत्यत्राप्यनेन द्वितीयासमासः सम्पद्यते। किन्तु यदा प्राप्तो जीविकाम्, आपन्नो जीविकामिति विग्रहः क्रियते तथा 'प्राप्तापन्ने च द्वितीयया[6]' इति विशेषशास्त्रेण समासे सति प्राप्तजीविकः, आपन्नजीविकः इति प्रयुज्यते। यतोहि 'प्राप्तापन्ने च द्वितीयया' इति समासविधायकशास्त्रे प्राप्तापन्नयोरेव प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात् पूर्वप्रयोगो भवति। प्राप्तापन्ने च इत्यत्र चकारपदोपादानात् जीविकाप्राप्तः, जीविकापन्न इत्यत्र पूर्वसूत्रेण द्वितीया समासोऽपि समुच्चीयते। समासे उपसर्जनकृतभेदात् भेद इति भावः।

अथ षष्ठी तत्पुरुषस्यापवादशास्त्राणि सन्ति बहूनि, तस्मात्तत्परिचयस्तत्तदविशेषशास्त्रविहितसमासोदाहरणैरिह प्रस्तूयते। तत्र 'षष्ठी[7]' इति सामान्यशास्त्रविहितसमासोदाहरणेषु च राजपुरुषः, राजकुमारप्रभृतिपदानि प्रसिद्धानि एतदपवादभूतानि च—

'पारेमध्येषष्ठ्या वा[8]'	पारेगङ्गम्, गङ्गापारम् गङ्गायाः पारम्
'पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे[9]'	पूर्वकायः
'अर्धं नपुंसकम्[10]'	अर्धपिप्पली

१. पा० सू० २।२।३८
२. पा० सू० २।१।३
३. पा० सू० २।१।२४
४. पा० सू० १।२।४३
५. पा० सू० २।२।३०
६. पा० सू० २।२।४
७. पा० सू० २।२।८
८. पा० सू० २।१।१८
९. पा० सू० २।२।१
१०. पा० सू० २।२।२

'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्[१]'	द्वितीय भिक्षा
'कालाः परिमाणिना[२]'	मासजातः
'न निर्धारणे[३]'	नृणां द्विजः श्रेष्ठः
'पूरणगुणसहितार्थसदव्यय-सामानाधिकरण्येन[४]'	सतां षष्ठः काक-स्य कार्ष्ण्यम्
'क्तेन च पूजायाम्[५]'	राज्ञां मतो बुद्धः पूजितो वा
'अधिकरणवाचिना च[६]'	इदमेषामासितं गतं भुक्तं वा
'कर्मणि च[७]'	आश्चर्यो गवां दोहोऽगोपेन
'तृजकाभ्यां कर्तरि[८]'	अपां स्रष्टा प्रजस्य भर्ता
'कर्तरि च[९]'	भवतः शायिका

इत्येतानि शास्त्राणि विद्यन्ते। एषु पारं गङ्गायाः इत्यत्र षष्ठी समासः प्राप्तः, तत्र 'पारेमध्ये षष्ठ्या वेति विशेषशास्त्रेणाव्ययीभावो विधीयते। ततश्च पारेगङ्गामिति रूप सिध्यति। सूत्रेऽस्मिन् वा ग्रहणात् पक्षे षष्ठी समासे सति गङ्गापारमित्यपि प्रयुज्यते। अत्र 'विभाषे[१०]'त्यधिकाराच्च गङ्गायाः पारमिति वाक्यमपि भवति।

अत्रेदं विचार्यते[११]' यत् अव्ययीभावसमासस्य षष्ठीसमासापवादत्वेऽपि विभाषेत्यधिकारात् अव्ययीभावसमासाभावपक्षे उत्सर्गतो गङ्गापारमित्यत्र षष्ठीतत्पुरुषसमासः सिध्यति। षष्ठीसमासस्यापि विभाषाधिकारान्तर्गतत्वात् तदभावपक्षे च गङ्गायाः पारमिति वाक्यन्तु सिद्धमेव, पुनः 'पारेमध्ये षष्ठ्या वेति सूत्रे वा ग्रहणं किमर्थमिति? एतत् समाधाने 'यत्र उत्सर्गापवादभावौ महाविभाषया विकल्पितौ तत्रापवादेन मुक्ते सति पुनरुत्सर्गो न प्रवर्तते' इति ज्ञापनार्थमिह वा ग्रहणमित्युक्तम् तत्फलञ्चेह 'पूर्वपराधरोत्तमेकदेशिनैकाधिकरणे' इत्युत्तरसूत्रेण 'पूर्वं कायस्येत्यत्र एकदेशिसमासाभावपक्षे पुनः षष्ठीसमासाभावः, तथा दक्षस्यापत्यं दाक्षिरित्यौत्सर्गिकाण् प्रत्ययमपवाद्य 'अत इञ्[१२]' इत्यनेन इञ्

---

१. पा० सू० २।२।३
२. पा० सू० २।२।५
३. पा० सू० २।२।१०
४. पा० सू० ३।२।११
५. पा० सू० २।२।१२
६. पा० सू० २।२।१३
७. पा० सू० २।२।१४
८. पा० सू० २।२।१५
९. पा० सू० २।२।१६
१०. सा० सू० २।२।११
११. पा० सू० ४।१।९५
१२. म० भा० २।१।१८

प्रत्यये जाते सति पक्षे पुनरौत्सर्गिकाण् प्रवृत्यभावश्चेति बोध्यम् । तस्माद् विभाषाधिकारफलं तु वृत्यभावे वाक्यस्य प्रयोग एवेति निष्कर्षः । अतएवेह वा ग्रहणप्रयोजनव्याख्याने महाभाष्यकारेणाप्युक्तम् 'एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति ? समासतद्धितानां वृत्तिर्विभाषा, वृत्तिविषये नित्योऽपवाद । इह पुनर्वावचने क्रियमाणे एकया वृत्तिविभाषा, अपरया वृत्तिविषये नित्योऽपवादः इति ।

'तस्माद' यत्रोत्सर्गापवादौ वृत्तिषु विभाषितौ तत्रापवादेन मुक्तः उत्सर्गो न भवतीति नियमो वा ग्रहणेनेह सिद्धः । एवमर्द्धं पिप्पल्याः अर्द्धपिप्पली, द्वितीयं भिक्षायाः द्वितीयभिक्षा, मासो जातस्य मासजात-प्रभृतिषु चोक्त विशेषशास्त्रैः षष्ठीसमासस्यापवादो भवति । सति षष्ठीसमासे चोपसर्जनत्वात् पिप्पल्यादीनां पूर्वप्रयोगः स्यादिति भावः ।

नृणां श्रेष्ठः, सतां षष्ठः, राज्ञां मतः, इत्याद्युदाहरणेषु च 'न निर्धारणे 'पूरणगुणसहितार्थप्रभृतिप्रोक्तसूत्रैः षष्ठीसमासस्य निषेधरूपोऽपवादो भवति । निषेधशास्त्रस्यापवादत्वं तु नाजलाविति सूत्रव्याख्याने सप्रमाण-मिहं प्राक् प्रोक्तम् ।

तदेवं षष्ठीसमासस्यापवादशास्त्राणि संगृह्यात्र व्याख्यातानि ।

समासविध्यङ्गभूतशास्त्रेषत्सर्गापवादभावः

समासविधौ हि यथा षष्ठीतत्पुरुषसमासस्यापवादशास्त्राणि विद्यन्ते, न तथा द्वन्द्वबहुव्रीहिसमासविधायकशास्त्रेषपलभ्यन्ते । किन्तु सामान्यतः सत्सु तत्तत्समासेषु क्वचित् उपसर्जनं पूर्वमित्यस्यापवादः क्वचित् परवल्लिङ्गतायाः क्वचिच्च पुंवद्भावस्य तथैकवद्भावस्यानङादेशा-देश्चापवादाः सम्मिलन्ति । तेषां विवेचनं यथाक्रममिह क्रियते । तत्र तावत् यत्र प्रथमा निर्दिष्टं समास उपसर्जनमिति शास्त्रेण यस्योपसर्जनसंज्ञा भवति, तस्य उपसर्जनं पूर्वमित्युत्सर्गशास्त्रेण समासे प्राक् प्रयोगो विधीयते । यथा कृष्णश्रितः, शङ्कुलाखण्डः, यूपदारु, वृकभयम्, राजपुरुषः, अक्षशौण्डः इत्यत्र द्वितीया तृतीयादि तत्पुरुषसमासोदाहरणेषु दृश्यते । किन्तु दन्तानां राजा राजदन्तः वनस्याग्रे अग्रेवण, मित्यादौ षष्ठीसमासे 'राजदन्तादिषु परम्[1]' इति विशेषशास्त्रेण तदपवादो जातः ।

परवल्लिङ्गता च द्वन्द्वतत्पुरुषसमासे 'परवल्लिङ्गद्वन्द्वतत्पुरुषयोः[2]' इत्युत्सर्गशास्त्रेण विधीयते । तेन कुक्कुटश्च मयूरी चेति विग्रहे समासे

१. पा० सू० २।२।३१ २. पा० सू० २।२।२४

सति कुक्कुटमयूर्याविति, मयूरी कुक्कुटश्चेति विग्रहे तु मयूरी कुक्कुटावित्युभयत्र द्वन्द्वसमासे परवल्लिङ्गताया विधानं भवति। उपसर्जनं पूर्वमिति शास्त्रस्य प्रवृत्तिप्रसङ्गस्तु नेह विद्यते, 'चार्थे द्वन्द्वः[१]' इत्यत्र 'अनेकमन्यपदार्थे[२]' इति सूत्रादनेकपदमनुवर्त्तते। ततश्चानेकं सुबन्तं चार्थे वर्त्तमानं समस्यते सच द्वन्द्व इति 'चार्थ द्वन्द्व' इत्यस्यार्थो भवति। ततश्च सर्वेषां प्रथमा निर्दिष्टत्वेनोपसर्जनसंज्ञाकृतविशेषोऽत्र नावगम्यते। तस्मादनियमे परवल्लिङ्गतानियमोऽनेन द्वन्द्वसमासे स्वीक्रियते। सच नियमः 'सःनपुंसकम्[३]' इति विशेषशात्रेणापवाद्यते, यतोहि 'पाण्योः पादयोश्चेति' समाहारद्वन्द्वे 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्[४]' इत्यनेन सत्येकवद्भावे 'सनपुंसकमिति विशेषशास्त्रेण एकवद्भावस्य नपुंसकलिङ्गविधानं सार्थकं भवति। तस्मात् परवल्लिङ्गद्वन्द्वतत्पुरुषयोरित्युत्सर्गशास्त्रं समाहारद्वन्द्वं परित्यज्य इतरेतरयोगद्वन्द्वे एव प्रवर्त्तते। तथा च परिभाषा विद्यते 'प्रकल्प्य चापवादविषयं तत् उत्सर्गोऽभिनिविशते' इति। अत्र प्रकल्प्येत्यस्य परित्यज्येत्यर्थः परिभाषेन्दुशेखरे धीमता नागेशेन व्याख्यातः। तत्पुरुषसमासे च परवल्लिङ्गतोदाहरणे अर्धं पिप्पल्याः इति विग्रहे अर्धपिप्पली इति समासपदं सिध्यति। पञ्चानां गवां समाहारः पञ्चगवमित्यत्र 'द्विगुरेकवचनम्[५]' इत्यनेनैकवद्भावे सति सनपुंसकमित्यनेन परवल्लिङ्गतामपवाद्य नपुंसकं विधीयते। पञ्चानां मूलानां समाहारे पञ्चमूली इत्यत्र तु 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट' इति वार्तिकेन सनपुंसकमिति विशेषशास्त्रमप्यपवाद्यते। द्विगुसमासश्च तत्पुरुषसमासस्यावान्तरभेदः यतोहि 'तत्पुरुषः समानाधिकरणकर्मधारयः[६]' तत्र 'संख्यापूर्वो द्विगुः[७]' इति सूत्राभ्यां कर्मधारयद्विगुसमासयोः तत्पुरुषत्वं स्वीक्रियते। अत एव पञ्च सुकपालेषु संस्कृतः पुरोडाशः पञ्चकपाल इत्यत्र प्राप्तस्य नपुंसकरूपपरवल्लिङ्गविधानस्य 'द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः[८]' इति वार्तिकेन परवल्लिङ्गतायाः प्रतिषेधः संघटते, अन्यथा तत्पुरुषाद्व्यतिरिक्ते द्विगौ तु परवल्लिङ्गतायाः प्राप्तेरभावात् कस्य प्रतिषेधः स्यादिति भावः। तस्माद् द्विगुसमासस्य तत्पुरुषत्वात् प्राप्तिस्तदपवादश्चात्र जातः।

---

१. पा० सू० २।२।२९
२. पा० सू० २।२।४६
३. पा० सू० २।४।३७
४. पा० सू० २।४।२
५. पा० सू० २।४।१
६. पा० सू० १।२।४२
७. पा० सू० २।१।५२
८. पा० सू० २।४।२६

बहुव्रीहौ तु चित्रागावो यस्येति विग्रहे समासे सति 'चित्रगु' रित्यत्र 'स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकारणे स्त्र्यामपूरणीप्रियादिषु[1]' इति शास्त्रेण चित्रा शब्दस्य पुंवद्भावोविधीयते। एवं रूपवती भार्या यस्येति विग्रहे रूपवद्भार्य इत्यत्रापि रूपवती शब्दस्य पुंवद्भावस्तेन जातः।

अस्य समान्यशास्त्रविहितपुंवद्भावस्य निषेधरूपापवादशास्त्राणां सोदाहरणं वर्गीकरणञ्चैवम्—

'न कोपधायाः[2]'	पाचिकाभार्यः, रसिकाभार्यः
'संज्ञापुरण्योश्च[3]'	दत्ताभार्यः
'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे[4]'	स्रौघ्नीभार्यः
'स्वाङ्गाच्चेतः[5]'	सुकेशीभार्यः
'जातेश्च[6]'	शूद्राभार्यः, ब्राह्मणीभार्यः।

एषु पाचिकाभार्य दत्ताभार्यप्रभृतिसमासपदेषु स्त्रियाः पुंवदित्यनेन पुंवद्भावः समान्यतः प्राप्तः, स च 'न कोपधायाः' संज्ञापूरण्योश्चेत्यादि विशेषशास्त्रैर्बाध्यते।

अत्रैकवदभावो हि द्वन्द्वसमासे 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति शास्त्रेण यथाक्रमं पाणिपादम्, मार्दङ्गिकपाणविकम्, रशिकाश्वारोहमित्यत्र विधीयते।

एवं 'जातिरप्राणिनाम्[7]' इत्यनेन धानाश्च शष्कुल्यश्च तासां समाहारे धानाशष्कुलि इत्यत्रेकवद्भाव ततश्च नपुंसकत्वाद् ह्रस्वः सिद्धयति।

अत्र समाहारस्यैकत्वन्तु[8] स्वतः सिद्धं पुनः एकवद्भावविधानं प्राण्यादीनां समाहारे एवैकवद्भाव इति नियमार्थं बोध्यम्। तथा च व्याख्यातं भट्टाजीदीक्षितमहाभागैः 'समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम्, प्राण्यङ्गादीनां एव यथास्यात्तेनैषां इतरेतरयोगद्वन्द्वे नैकवद्भाव इति फलति। दन्ताश्च ओष्ठाश्चेति विग्रहे दशदन्तोष्ठा इत्यत्र प्राप्तस्यैकवद्भावनियमस्य 'अधिकरणैतावत्वे च[9]' इति विशेषशास्त्रेण निषेधो भवति। अत्राधिकरणपदेन द्रव्यं गृह्यते। तस्य एतावत्वे इयताविशेषे

१. पा० सू९ ६।३।३४
२. पा० सू० ६।३।३७
३. पा० सू० ६।३।३८
४. पा० सू० ६।३।४०
५. पा० सू० ६।३।४१
६. पा० सू० ६।३।४१
७. पा९ सू० २।४।६
८. पा० सू० २।४।२ सिद्धान्तकौमुदी
९. पा० सू० २।४।१५

अर्थात् द्रव्यसंख्यतावगमे एकवदेवेति नियमो न स्यादिति सत्रार्थो जायते ।

जातिरप्राणिनामित्यनेन प्राप्तैकवद्भावस्य विकल्पविधिस्तु दधिघृतम् दधिघृते गोमहिषम् गोमहिषाः शुकबकम् शुकबकाः इत्यादौ 'विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्[१]' इति विशेषशास्त्रेण भवति ।

दधि च पयश्चेति विग्रहे दधिपयसी इत्यत्र तु व्यञ्जनत्वात् प्राप्तविभाषैकवद्भावस्यापि 'न दधिपय आदीनि[२]' इति ततोऽपि विशेषशास्त्रेण प्रतिषेधः क्रियते ।

तदेवं समाहारद्वन्द्वे एकवद्भावनियमस्य बाध्यबाधकभावो दृष्टः ।

द्वन्द्वसमासे आनङादेशविधायकम् 'आनङ् ऋतोद्वन्द्वे[३]' 'देवताद्वन्द्वे च[४]' इति शास्त्रद्वयं विद्यते । तेन होतापोतारौ, मातापितरावित्यत्र विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङादेश उत्तरपदे परे पूर्वसूत्रेण सिध्यति ।

इन्द्रश्च सोमश्चेति विग्रहे इन्द्रासोमावित्यत्र तु देवताद्वन्द्वे चेत्युत्तर सूत्रेणोत्तरपदेपरे आनङादेशो विधीयते । अत्र ऋदन्तत्वाभावात् पूर्वशास्त्रेणाप्राप्ते विधिरयमितिभावः । अस्य देवता द्वन्द्वे चेति शास्त्रस्य च वायुरूपदेवताद्वन्द्वे प्रतिषेधो भवति । तथाचोक्तम् आचार्यकात्यायनेनात्र 'वायुशब्दप्रयोगे प्रतिषेधः' इति । तेन अग्निवायू वाय्वग्नी इत्युभयत्राप्यानङादेशो न जातः ।

अग्निश्च सोमश्चेति विग्रहे अग्निषोमौ, तथा अग्निश्च वरुणश्चेति अग्निवरुणावित्यत्र तु 'ईदग्ने सोमवरुणयोः[५]' इति विशेषशास्त्रेण आनङादेशमपवाद्य अग्नेरीकादेशो विधीयते ।

एवम् अग्निश्च मरूच्चेति विग्रहे देवता द्वन्द्वे चेत्यनेनानङि अग्नामरुताविति सम्पद्यते । तत्र पुनः अग्नामरुतौ देवते अस्य विग्रहे 'सास्यदेवता[६]' इत्यनेनाणि सति आग्निमारुतं कर्म इत्यत्र तु 'इद्वृद्धौ[७]' इति ततोऽपि विशेषशास्त्रेण आनङमीत्वञ्च बाधित्वा इत् विधीयत इति द्वन्द्वसमासे आनङादेश विधेरुत्सर्गापवादभावोऽपि सिद्धः ।

---

१. पा० सू० २।४।१२
२. पा० सू० २।४।१४
३. पा० सू० ६।३।२५
४. पा० सू० ६।२।१४५
५. पा० सू० ६।३।२७
६. पा० सू० ४।२।२४
७. पा० सू० ६।३।२८

अलुगधिकारस्यापवादशास्त्राणि

समासे हि अलौकिकविग्रहे राजन् ङस् पुरुष सु इत्यवस्थायां षष्ठी इत्यनेन समासे जाते सुपोधातुप्रातिपदिकयोरिति सामान्यशास्त्रेण सुपोलुग् भवति। समासस्य भवति प्रातिपदिकसंज्ञा, अतस्तदन्तर्गतत्वाद् प्रातिपदिकसंज्ञासम्बन्धि सुपोलुगिति भावः। सुपोलुगपवादशास्त्राणि च 'अलुगुत्तरपदे[१]' इति सूत्राधिकारे पठितानि। अत्रालुगधिकारः सुपोलुकोऽवश्यप्राप्ति यावत् प्रवर्तते। उत्तरपदाधिकारश्चाङ्गाधिकारात्प्रागिति विवेकः। लुकः प्रतिषेधको हि अलुगधिकारोऽतोऽपवादरूपः। तस्मादलुगधिकारस्थानां तेषां समेषामत्र सोदाहरणं विवेचनं क्रियते—

'पञ्चम्याः स्तोकादिभ्यः[२]'	स्तोकान्मुक्तः
'ओजसहोऽम्भस्तमसस्तृतीयायाः[३]'	ओजसा कृतम्
'मनसः संज्ञायाम्[४]'	मनसा गुप्ता
'अज्ञायिनी च[५]'	मनसा ज्ञायी
'आत्मनश्च[६]'	आत्मना पञ्चमः
'वैयाकरणाख्यायां चतुर्थ्याः[७]'	आत्मनेपदम्, आत्मनेभाषा
'परस्य च[८]'	परस्मैपदम्, परस्मैभाषा
'हलदन्तात्सप्तम्याः संज्ञायाम्[९]'	त्वचिसारः
'कारनाम्नि च प्राचां हलादौ[१०]'	मुकुटे कार्षापणम्
'मध्याद्गुरौ[११]'	मध्येगुरुः
'अमूर्द्धमस्तकात्स्वाङ्गात्कामे[१२]'	कण्ठेकालः
'बन्धे च विभाषा[१३]'	हस्ते बन्धः, हस्तबन्धः,
'तत्पुरुषे कृति बहुलम्[१४]'	स्तम्बेरमः, कर्णेजपः
'प्रावृट्छरत्कालदिवां जे[१५]'	प्रावृषिजः

१. पा० सू० ६।३।१
२. पा० सू० ६।३।२
३. पा० सू० ६।३।३
४. पा० सू० ६।३।४
५. पा० सू० ६।३।५
६. पा० सू० ६।३।६
७. पा० सू० ६।३।७
८. पा० सू० ६।३।८
९. पा० सू० ६।३।९
१०. पा० सु० ६।३।१०
११. पा० सु० ६।३।११
१२. पा० सु० ६।३।१२
१३. पा० सु० ६।३।१३
१४. पा० सु० ६।३।१४ सांकाश्य सिद्धः इत्यत्रतु 'नेन्सिद्धबध्नातिषु च' इत्यनेन
१५. पा० सु० ६।३।१५ अस्यालुकः प्रतिषेधः क्रियते।

'विभाषावर्षक्षरशरवरात्[१]'	वर्षेजः, वर्षजः,
घकालतनेषु कालनाम्नः[२]'	पूर्वाह्णेतरे, पूर्वाह्णतरे
'शयवासवासिष्वकालात्[३]'	खेशयः, खशयः
'षष्ठ्या आक्रोशे[४]'	चौरस्य कुलम्
'पुत्रे ऽन्यतरस्याम्[५]'	दास्याः पुत्रः, दासीपुत्रः
'ऋतो विद्यायोनिसम्बन्धेभ्यः[६]'	होतुः पुत्रः, पितुरन्तेवासी
'विभाषा स्वसृपत्योः[७]'	मातुः ष्वसा, मातृष्वसा,

अत्र प्रथमा द्वितीया विभक्ति विहाय प्रायः सर्वा विभक्तयः तत्तद्विशेषनिमित्तमादाय अलुगधिकारान्तर्गता समायान्ति। तासाञ्चात्र लुङ् न भवतीति 'सुपोधातुप्रातिपदिकयोरपवादो जातः।

तदित्थमिह सर्वेषां समाससम्बन्ध्युत्सर्गापवादशास्त्राणां विवेचनं निष्पन्नम् ॥

॥ इति नवमो विमर्शः समाप्तः ॥

---

१. पा० सु० ६।४।१६

२. पा० सु० ६।३।१७

३. ५. पा० सू० स्थण्डिलशायी इत्यत्रापि 'नेसिद्ध विघ्नातिषु च' इत्यनेन अस्या अलुकः प्रतिषेधः क्रियते ।

४. पा० सू० ६।३।२१

५. पा० सू० ६।३।२२

६. पा० सू० ६।३।२३

७. पा० सू० ६।३।२४

दशमो विमर्शः

उदात्तादि स्वरविधावुत्सर्गापवादत्वम्

इतः पूर्वमुत्सर्गापवादशास्त्रैः शब्दानां निष्पत्तिप्रकारश्चिन्तितः। अथेदानीमुदात्तादिस्वरसम्बन्ध्युत्सर्गापवादशास्त्राणि विविच्यन्ते। तत्रोदात्तादिस्वराणां विधानञ्च प्राधान्येन वैदिकशब्देष्वेव दृश्यते। पाणिनीयव्याकरणं ह्युभयविधानां लौकिकवैदिकशब्दानामनुशासनं करोति। तथा च अथ शब्दानुशासनमिति महाभाष्यस्य प्रतिज्ञावाक्यानन्तरंकेषां शब्दानामितिप्रश्ने लौकिकानां वैदिकानाञ्चेति स्पष्टमुक्तम। दृश्यते चाष्टाध्याय्यामपि लौकिकशब्दानुशासनानन्तरमेव वैदिकशब्दनिष्पतिप्रकारः। तत्र वैदिकशब्दसाधुत्वप्रक्रियायां "बहुलं छन्दसि[१]" इतिशास्त्राणामाधिक्यं विद्यते। यथा "अतोभिस ऐस्" इतिशास्त्रेण सामान्यतः अदन्तप्रातिपदिकेभ्यः परस्य भिस् स्थाने ऐसादेशो भवति, किन्तु "कर्णेभिः शृणुयाम् देवाः" इतिवैदिकप्रयोगे तदपवादोऽपि दृश्यते। अतः महर्षि पाणिनिः तदर्थं "बहुलं छन्दसीति प्रोक्तवान्। एवं वृत्रं हनति वृत्रहा इति वैदिकवाक्ये हनतीत्यत्र शपो लुगभावः। दातिप्रियाणि चिद्वसु इत्यत्र श्लोरभावश्च बहुलं छन्दसि शास्त्रेण कृतः। एवमेव बहुत्र बहुलं छन्दसीति शास्त्रं दृश्यते। महाभाष्यकारस्तु "षष्ठीयुक्तश्छन्दसि वा" इतिसूत्रव्याख्याने "षष्ठीयुक्तश्छन्दसि ततो वेति योगं विभज्य छन्दसि पदस्यानुवर्तनं कृत्वा वा छन्दसि सर्वे विधयो भवन्तीत्युक्तवान्। एतावता सर्वे विधयः छन्दसि वैकल्पिकाः भवन्तीति निश्चयो जातः। तस्मादेव वैदिकशब्दानां प्रक्रियांशे उत्सर्गापवादभावो न दृश्यते। किन्तूदात्तादिस्वरविधाने च तत्राप्युत्सर्गापवादभावो विद्यत एव। अतोऽत्र स्वरविधावुत्सर्गापवादसम्बन्धिशास्त्राणां विवेचनं क्रियते। तत्रादौ स्वरप्रक्रियायां देवीं वाचम् इत्यत्र "अनुदात्तस्य च यत्रोदात्तलोपः[२]" इति शास्त्रेण ङीबुदात्तो विधीयते। यतोहि देवशब्दोऽच् प्रत्ययान्तः, "अतः "चितः[३]" इति शास्त्रणान्तोदात्तो विहितः। पचादिषु देवट्शब्दस्य पाठाच्च टित्वात् टिड्ढाणञिति शास्त्रेण ङीप् भवति। तस्य ङीप् प्रत्ययस्य पित्वात् "अनुदात्तौ सुप्पितौ[४]" इति शास्त्रेणानुदात्त्वे सति

---

१. पा० सू० १।४।९
२. पा० सू० ६।१।१६१
३. पा० सू० ६।१।१६३
४. पा० सू० ३।१।४

यस्येति चेति शास्त्रेणाकारस्य लोपकृते अस्य अनुदात्तस्य च यत्रोदात्तलोप' इति शास्त्रस्योदात्तत्वविधाने भवति प्रवृत्तिः। देव द्रीचीमित्यत्र तु "चौ[१]" इति विशेषशास्त्रेण तदपवाद्य लुप्ताकारेऽञ्चतौ परे पूर्वस्यान्तोदात्तो विहितः। तेनं द्रीत्यत्रेकार उदात्तः, ततः परस्यानुदात्तस्य ङीपस्तु "उदात्तानुदात्तस्य स्वरित[२]" इति शास्त्रेण स्वरितत्वं जातम्।

एवम् "अग्न इन्द्रवरुणमित्र देवाः इत्यत्र "आमन्त्रितस्य च[३]" इति सामान्यशास्त्रेण आमन्त्रितस्यादिरुदात्तस्वरो विधीयते। आमन्त्रितसंज्ञा च सम्बोधने या प्रथमातदन्तमामन्त्रितसंज्ञं स्यादित्यर्थकेन' 'सामान्त्रितम्[४]" इति सूत्रेण क्रियते। अस्य आमन्त्रितसम्बन्ध्याद्युदात्तस्वरस्यापवादश्च 'आमन्त्रितस्य चेति[५]' द्वितीयशास्त्रेण भवति। अनेन ही पदात्परस्यापादादि स्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः क्रियते। तेनः "इमं मे गङ्गे यमुने-सरस्वती" इत्यत्रामन्त्रितस्य सर्वस्यानुदात्तः सिद्धः। "आगच्छ भो माणवक" इत्यत्र दूरात्सम्बुद्धौ तु एकश्रुतिरेव भवति, अर्थात् उदात्तानुदात्त स्वरित स्वराणामविभागेनावस्थानं जायते। तथा च शास्त्रमस्ति 'एकश्रुतिदूरात्सम्बुद्धा[६]' विति। एकश्रुतित्वविधानादेव त्रैस्वर्यापवादत्वमस्य शास्त्रस्य व्याख्यातमस्ति।

एवं धातुप्रातिपदिकप्रत्ययसमासस्वरविधावप्युत्सर्गापवादभावो दृश्यते। तत्रादौ धातुस्वरविधौ 'धातो[७]' रिति सामान्यशास्त्रेण धातोरन्त उदात्तो विधीयते। यथा 'गोपाय तं नः' इत्यत्र 'सनाद्यन्ताधातवः' इति सूत्रेण गोपाय इत्यस्य धातुत्वे यकारस्योदात्तोऽनेन जातः। अस्य धातोरिति शास्त्रस्यापवादशास्त्रे 'अभ्यस्तानामादिः[८]' अनुदात्ते चे'ति द्वे स्तः। तत्र पूर्वशास्त्रेणानिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तो विधीयते 'ये ददति प्रिया वसु' इत्यत्र पूर्वदकारस्याकार उदात्तो जातः। द्वितीयशास्त्रेण च अविद्यमानोदात्ते[९]'लसार्थधातुके परे अभ्यस्तानामादिरुदात्त इति भेदः। तेन 'दधासि रत्नं द्रविणं च दाशुषे' इत्यत्र दधासिपदे दकारोत्तरवर्त्त्यकारस्योदात्तो निष्पद्यते।

---

१. पा० सू० ६।१।१११
२. पा० सू० ८।४।६६
३. पा० सू० ६।१।१९८
४. पा० सू० २।३।४८
५. पा० सू० १।२।४३
६. पा० सू० १।२।३३
७. पां० सू० ६।१।१६५
८. पा० सू० ६।१।१८९
९. पा० सू० ६।१।१९२

अत्र अभ्यस्तानामादि' रित्यपवादशास्त्रमस्ति 'भी ह्रीभृहुमदजनधनदारिद्राजागरां प्रत्ययात्पूर्वं पिति' । अनेन हि भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात् पूर्वमुदात्तो विधीयते । तेन बिभेति, जिह्रेति, बिभर्तीत्यादौ प्रत्ययात् पूर्वस्वरस्योदात्तविधिः सिध्यति ।

तदेवं धातुसम्बन्धिस्वरविधावुत्सर्गापवादभावो दृष्टः ।

प्रातिपदिकस्वरसम्बन्ध्युत्सर्गापवादशास्त्राणि

प्रातिपदिकस्वरविधावपि धातुस्वरवत् सामान्यतः अन्त उदात्तो विधीयते । तथा च सूत्रमस्ति 'फिषोऽन्त उदात्तः[1]' इति । फिट् पदेन पूर्वाचार्यैः प्रातिपदिकमुच्यते । अत फिषः प्रातिपदिकस्य अन्त उदात्तो भवतीति सूत्रार्थो जायते । यद्यपि सूत्रमिदं शान्तनवाचार्यप्रणीतफिटसूत्रान्तर्गतत्वादपाणिनीयम्, शब्दानुशासने चाद्युना पाणिन्यादिमुनित्रयस्य प्रामाण्यं प्रसिद्धं, तथापि फिट् सूत्राणि पाणिनीयैराश्रियन्ते, यतोहि आद्युदात्तश्चेति सूत्रभाष्ये—'धातोरन्तः प्रातिपदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्त्रात्युक्तम् । तत्कथं 'फिषोऽन्तउदात्तः' इति फिट् सूत्राश्रयणं विना संगच्छेत । अपि च अत्रेदमप्युक्तं यत् 'प्रत्ययाद्युदात्तस्याचावकाशः' यत्रानुदात्ता प्रकृतिः, समत्वं सिमत्वमिति, तच्च 'त्वत्त्वसमसिमेत्यनुच्चानि[2]' इत्यनुदात्तविधायकफिट्सूत्राश्रयणेनैव संघटते । अत एव भट्टोजीदीक्षितमहाभागैरपि सिद्धान्तकौमुद्यां पाणिनीयस्वरप्रकरणे फिट्सूत्राण्यपि व्याख्यातानि ।

तस्मादपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रियन्त इति सप्रमाणं सिध्यति । अस्य "फिषोऽन्त उदात्तः" इति फिटसूत्रस्यापवादशास्त्रमस्ति "ञ्नित्यादिर्नित्यम्" इति । अनेन हि ञिदन्तस्य निदन्तस्य च आदिरुदात्तो विधीयते, तेन "यस्मिन् विश्वानि पौंस्या" इत्यत्र पुंसः ष्यञि ञित्वात् "दधिष्व नश्वनः" इत्यत्र चायतेरसुनि नित्वाच्च आदिरुदात्तो निष्पन्नः । अस्य "ञिनित्यादिर्नित्यम" इत्यपवादशास्त्रस्याप्यपवादशास्त्रं विद्यते "कर्षात्वतोघञोऽन्त उदात्तः[4]" इति । तेन कर्षः, पाकः, इत्यत्र अन्त उदात्त एव सिद्धः । एवम् "उच्छ्वदीनां च[5]" चतुरःशसि[6]" इति शास्त्राभ्यामपि ञिदन्तत्वान्निदन्तत्वाच्च प्राप्तस्यादेरुदात्तस्य भवति बाधः । तेन "गावः

१. फिट्सूत्रेषु प्रथमपादस्य प्रथमं सूत्र ।
२. फिट्सूत्रेषु चतुर्थ पादस्य सू० ७८
३. पा० सू० १।१।१९७
४. पा० सू० ६।१।१५९
५. पा० सू० ६।१।१६०
६. पा० सू० ६।१।१६७

सोमस्य प्रथमस्य भक्षः" इत्यत्र भक्षस्य ञिदन्तत्वे "चतुरः कल्पयन्त" इत्यत्र "चतेरुरन्[1]" इत्यौणादिकसूत्रनिष्पन्नस्य चतुरशब्दस्य च निदन्तत्वेऽपि अन्त उदात्त एव भवति नतु ञ्नित्यादिर्नित्यनेनादिरुदात्त इति भाव :

अपि च "अन्तश्चतवै युगपत्[2]" "पथिमथःसर्वनामस्थाने[3]" क्षयो निवासे[4]" 'जयःकरणम्[5]" "वृषादीनाञ्च[6]" "निष्ठाञ्च द्वयजनात्[7]" इति शास्त्रैः आद्युदात्तश्च "फिषोऽन्त उदात्तः" इति शास्त्रद्वयमपवाद्यते। तेन कर्तवै, हर्तवै, इत्यत्र प्रत्ययाद्युदात्तत्वमपवाद्य युगपदुदात्तौ सिद्धौ। "क्षये जागृहि प्रपश्यन्' जयोऽश्वः" वृषः, जनः ज्वरः, दत्त, गुप्तः, बुद्धः, इत्यादौ क्षयादिशब्दानामादेरुदात्तत्वं निष्पन्नम्। कर्षः, पाकः इत्यत्र तु पूर्वोक्त "कर्षात्त्वतोधञोऽन्तउदात्तः" इत्यनेनादिरुदात्तो बाध्यत इति प्रातिपदिकस्वरसम्बन्ध्युत्सर्गापवादभावक्रमोऽपि दृष्टः।

प्रत्ययस्वरविधावुत्सर्गापवादत्वम्

तत्र प्रत्ययस्तावत् सामान्यत आद्युदात्तो भवति। तदर्थमुत्सर्गशास्त्रं विद्यते "आद्युदात्तश्चेति[8]। अस्याद्युदात्तश्चेत्युत्सर्गशास्त्रस्यापवादशास्त्राणां सोदाहरणं विवेचनञ्चाधोलिखितमस्ति—

उत्सर्गशास्त्रम्	कार्यम्	उदाहरणानि
आद्युदात्तश्च[9]"	आदिरुदात्तः	अग्निः, कर्तव्यम्
अस्यापवादशास्त्राणि-		
अनुदात्तौ सुप्पित्तौ"[10]	अनुदात्तः	यज्ञस्य
"तद्धितस्य"[11]"	अन्त उदात्तः	कौञ्जायनाः
"कितः[12]"	"	यदाग्नेयः
"तित्स्वरितम्"	स्वरितः	क्व नूनम्
"तास्यनुदात्तेन्ङिदपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङ[13]"	अनुदात्तः	कर्त्ता

१. उणादिषु पञ्चमपादस्य
२. पा० सू० ६।१।२००
३. पा० सू० ६।१।१६९
४. पा० सू० ६।१।२०१
५. पा० सू० ६।१।१०२
६. पा० सू० ६।१।२०३
७. पा० सू० ६।१।२०५
८. पा० सू० ३ १।३
९. पा० सू० ३।१।४
१०. पा० सू० ६।१।१६४
११. पा० सू० ६।१।१६५
१२. पा० सू० ६।१।१८५
१३. पा० सू० ६।१।१८६

उपोत्तमं रिति[1]" उदात्तः यदाहवनीये

आदाद्युत्तश्चेति सामान्यशास्त्रापवादभूतस्यात्र "अनुदात्तौ सुप्पिताविति विशेषशास्त्रस्याप्यपवादशास्त्राणां परिचयः एवं विद्यते—

तिसृभ्योजसः[2]	उदात्तः	तिस्रोद्यावः सवितुः
'सावेकाचस्तृतीयादिर्विभक्तिः[3]'	,,	वाचा विरूपः
'अञ्चेछन्दस्यसर्वनामस्थानम्[4]'	,,	इन्द्रो दधीचः
'उडिदम्पदाद्यप्पुम्रै द्युभ्यः[5]'	,,	प्रष्ठौहः
'अष्टनो दीर्घान्[6]'	,,	अष्टाभिर्दशभिः
'शतुरनुमोन्नद्याजादी[7]'	,,	अच्छा एवं प्रथमा जानती
'उदात्तयणो हल्पूर्वात्[8]'	,,	चोदयित्री सूनतानाम्
'ह्रस्वनुड्भ्यां मतुप्[9]'	,,	'यो अविदमांउदनिमांइयर्ति
षट्त्रिचतुर्भ्योहलादि[10]'	,,	'आषड्भिर्हूयमानः

एष्वनुदात्तौ सुप्पिताविति शास्त्रापवादभूतेषु 'सावेकाचस्तृतीयादिर्विभक्तिः' 'उदात्तयणोहल्पूर्वात्[11]' इति शास्त्रद्वयस्य निषेधरूपापवादशास्त्राण्यपि मिलन्ति। तत्र 'न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः[12]' 'दिवोझलः[13]' इति शास्त्रद्वयेन 'सावेकाचस्तृतीयादिर्विभक्तिः' इति विशेषशास्त्रप्राप्तस्योदात्तस्य निषेधो भवति। तेन 'गवां शता 'द्युभिरक्तुभिः' इत्यत्र प्रति प्रसवरूपेणानुदात्त एव सिध्यति।

एवम् 'उदात्तयणो हल्पूर्वात्' इति विशेषशास्त्रेणानुदात्तं प्रबाध्य प्रवृत्तस्योदात्तस्य निषेधो 'नोङ्धात्वो[14]' इति शास्त्रेण क्रियते। तेन 'ब्रह्मबन्ध्वा' 'सेत्पृशिनः सुम्वे' इत्यत्र सुप्त्वात् अनुदात्त एव भवति नोदात्त इति भावः।

अन्ते च 'षट्त्रिचतुर्भ्यो हलादिः' इति विशेषशास्त्रमनुदात्तस्य बाधकं संगृहीतम्। ततश्च ,आषड्भिर्हूयमानः' इत्यत्र हलादिविभक्ते

१. पा० सू० ६।१।१९७
२. पा० सू० ६।१।१६६
३. पा० सू० ६।१।१६८
४. पा० सू० ६।१।१७०
५. पा० सू० ६।१।१७६
६. पा० सू० ६।१।१७२
७. पा० सू० ६।१।१७३
८. पा० सू० ६।१।१७४
९. पा० सू० ६।१।१७६
१०. पा० सू० ६।१।१७९
११. वा० सू० ६।१।१७४
१२. पा० सू० ६।१।१८२
१३. पा० सू० ६।१।१८३
१४. पा० सू० ६।१।१७५

रुदात्तत्वं सिध्यति । अस्याप्यपवादशास्त्रं विद्यते 'झल्युपोत्तममिति'[१] । अनेन 'अध्वर्युभिः पञ्चभिः' इत्यत्र तदपवाद्य उपोत्तममुदात्तं विधीयते । यतोहि 'षट्त्रिचतुर्भ्योहलादिः' इति शास्त्रस्यावश्यप्राप्तौ झल्युपोत्तममिति शास्त्रमारभ्यते । तस्मात्तदपवादभूतमिदमपि शास्त्रमिति ।

तदेवं प्रत्ययस्वरविधावुत्सर्गापवादशास्त्राणां परिचयो जातः ।

समासस्वरसम्बन्ध्युत्सर्गापवादशास्त्राणि

समासस्वरविधौ 'समासस्येति[२]' सामान्यशास्त्रेण अन्त उदात्तो विधीयते । अत्र 'कर्षात्त्वतोघञोऽन्त उदात्तः, इतिपूर्वसूत्रादुदात्तपदम् 'अन्तोऽवत्याः[३]' सूत्रादन्तपदञ्चानुवर्त्तते । ततश्च समासस्यान्त उदात्तो भवतीति सूत्रार्थो जायते । तेन राजपुरुषः ब्राह्मणकम्बल इत्यादावन्त उदात्तः सिध्यति । अस्यान्तोदात्तविधायकोत्सर्गशास्त्रस्यापवादविधयः पूर्वपदप्रकृतिस्वरः, पूर्वपदस्यादिरुदात्तः, पूर्वपदस्यान्त उदात्तः, उत्तरपदस्यादिरुदात्तः, उत्तरपदस्यान्त उदात्तश्चेति सन्ति बहवः । तत्रादौ पूर्वपदप्रकृतिस्वरसमर्थकविशेषशास्त्राणाणीह सोदाहरणं प्रस्तूयन्ते —

'बहुव्रीहौ प्रकृत्यापूर्वपदम्[४]' (पू० प्र० स्वरः) सत्यश्चित्रश्रवस्तम्

'तत्पुरुषे तुल्यार्थ तृतीयासप्तम्युपमानाऽव्यय द्वितीयाकृत्याः[५]' तुल्यश्वेतः

'वर्णोवर्णेष्वनेते[६]'	,,	कृष्णसारङ्गः
'गाधलवणयोःप्रमाणे[७]'	,,	अरित्र गाधमुदकम्
'दायाद्यं दायादे[८]'	,,	धनदायादः
'प्रतिबन्धिचिरकृच्छ्रयोः[९]'	,,	गमनचिरम्
'पदेऽपदेशे[१०]'	,,	मूत्रपदेन प्रस्थितः
'निवातेवातत्राणे[११]'	,,	कुटी निवातम्
'शारदेऽनार्त्तवे[१२]'	,,	रज्जुशारदमुदकम्

१. पा० सू० ६।१।१८०
२. पा० सू० ६।१।२२३
३. पा० सू० ६।१।२२०
४. पा० सू० ६।२।१
५. पा० सू० ६।२।२
६. पा० सू० ६।२।३
७. पा० सू० ६।२।४
८. पा० सू० ६।२।५
९. पा० सू० ६।२।६
१०. पा० सू० ६।२।७
११. पा० सू० ६।२।८
१२. पा० सू० ६।२।९

अध्वर्युकषाययो र्जातौ[1]	(पू० प्र० स्वरः)	कठाध्वर्युः
सदृशप्रतिरूपयोः सादृश्ये[2]	,,	पितृसदृशः
द्विगौ प्रमाणे[3]	,,	प्राच्यसप्तसमः
गन्तव्यपण्यं वाणिजे[4]	,,	मद्रवाणिजः
मात्रोपज्ञोपक्रमच्छाये नपुंसके[5]	,,	भिक्षा मात्रम्
सुखप्रिययोर्हिते[6]	,,	गमनप्रियम् गमनसुखम्
प्रीतौच[7]	,,	ब्राह्मणसुखं पायसम्
स्वं स्वामिनि[8]	,,	गोस्वामी
पत्यावैश्वर्ये[9]	,,	दमुनागृहपतिर्दमे
वा भूवनम्[10]	,,	भुवनपतिः
आशङ्काबाधनेदीयस्सुसंभावने[11]	,,	गमनाशङ्कमस्ति
पूर्वे भूतपूर्वे[12]	,,	आढ्यपूर्वः
सविधसनीडसमर्यादसवेश-सदेशेषु सामीप्ये[13]	,,	मद्रसविधम्
विस्ष्पटादीनि गुणवचनेषु[14]	,,	विस्पष्टकटुकम्
श्रज्यावमकन्पापवत्सु भावे कर्मधारये[15]	,,	गमनश्रेष्ठम्
कुमारश्च[16]	,,	कुमारश्रमणा
आदिः प्रत्येनसि[17]	,,	कुमारप्रत्येनाः
इगन्तकालकपालमगालशरावेषुद्विगौ[18]	,,	पञ्चारत्निः
दिष्टिवितस्त्योश्च[19]	,,	पञ्चदिष्टिः
सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्[20]	,,	साङ्कश्यसिद्धः

१. पा० सू० ६।२।१०
२. पा० सू० ६।२।११
३. पा० सू० ६।२।१२
४. पा० सू० ६।२।१३
५. पा० सू० ६।२।१४
६. पा० सू० ६।२।१५
७. पा० सू० ६।२।१६
८. पा० सू० ६।२।१७
९. पा० सू० ६।२।१८
१०. पा० सू० ६।२।२०
११. पा० सू० ६।२।२१
१२. पा० सू० ६।२।२२
१३. पा० सू० ६।२।२३
१४. पा० सू० ६।२।२४
१५. पा० सू० ६।२।२५
१६. पा० सू० ६।२।२६
१७. पा० सू० ६।२।२७
१८. पा० सू० ६।२।२९
१९. पा० सू० ६।२।३१
२०. पा० सू० ६।२।३२

परिप्रत्युपापावर्ज्यमानाऽहोरात्रावयये पु[१]	'(पू. प्र. स्वरः)	परित्रिगर्तं वृष्णेदेवः
राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु[२]	,,	श्वाफल्कचैत्रकाः
संख्या[३]	,,	द्वादश, त्रयोदश
आचार्योपसर्जनश्चान्तेवासी[४]	,,	पाणिनीय रौढीयाः
कार्तकौजपादयश्च[५]	,,	कार्तकौ जपौ
महान्ब्रीह्यपराह्णगृष्टीष्वासजाबाल-भारभारतहैलिहिलरौरवप्रवृद्धेषु[६]	,,	महाव्रीहिः
क्षुल्लकश्च वैश्वदेवे[७]	,,	क्षुल्लकवैश्वदेवम्
उष्ट्रः सादिवाम्योः[८]	,,	उष्ट्रसादी, उष्ट्रवामी
गौः सादसादिसारथिषु[९]	,,	गोसादः, गोसादिः
कुरुगार्हपतरिक्तगुर्वसूतजरत्य-श्लीलदृढरूपापारेवडवातैतिलकद्रूः-पण्यकम्बालोदासीभाराणां च[१०]	,,	कुरुगार्हपतम्
चतुर्थी तदर्थे[११]	,,	यूपदारू
अर्थे[१२]	,,	देवार्थम्
क्ते च[१३]	,,	गोहितम्
'कर्मधारयेऽनिष्ठा[१४]'	,,	'श्रेणिकृताः'
अहीने द्वितीया[१५]	,,	'कष्टश्रितः'
'तृतीया कर्मणि[१६]'	,,	'रूद्रहतः, महाराजहतः'
'गतिरनन्तरः'[१७]	,,	'पुरोहितम्'
तादौ च निति कृत्यतौ[१८]	,,	अग्नेरायो नृतमस्य प्रभृतौ'
तवैचान्तश्च युगपत्[१९]	,,	'अन्तेतवा उ'

१. पा० सू० ३।२।३३
२. पा० सू० ६।२।३४
३. पा० सू० ६।२।३५
४. पा० सू० ६।२।३६
५. पा० सू० ६।२।३७
६. पा० सू० ६।२।३८
७ पा० सू० ६।२।३९
८. पा० सू० ६।२।४०
९. पा० सू० ६।२।४१
१०. पा० सू० ६।२।४२
११. पा० सू० ६।२।४३
१२. पा० सू० ६।२।४४
१३. पा० सू० ६।२।४५
१४. पा० सू० ६।२।४६
१५. पा० सू० ६।२।४७
१६. पा० सू० ६।२।४८
१७. पा० सू० ६।२।४९
१८. पा० सू० ६।२।५०
१९. पा० सू० ६।२।५१

अनिगन्तोऽञ्चतौ व प्रत्यये[1]	(पू. प्र. स्वरः)	यै पराञ्चस्तान्'
न्यधीच[2]'	,,	न्यङ्ङुतानः'
इषदन्यतरस्याम्[3]'	,,	इष:कडारः
हिरण्यपरिमाणं धने[4]'	,,	द्विसुवर्णधनम्
प्रथमोऽचिरोपसंपत्तौ[5]'	,,	प्रथमवैयाकरणः
कतरकतमौ कर्मधारये[6]'	,,	कतरकठः
आर्योब्राह्मणकुमारयोः[7]'	,,	आर्यकुमारः
राजा च[8]'	,	राजब्राह्मणः
षष्ठीप्रत्येनसि[9]'	,,	राजप्रत्येनाः
क्ते नित्यार्थे[10]'	,,	नित्यप्रहसितः
ग्रामः शिल्पिनि[11]'	,,	ग्रामनापितः
राजा च प्रशंसायाम्[12]'	,,	राजनापितः ।

एभिर्विशेषशास्त्रैरत्र पूर्वपदप्रकृतिस्वरविधानादेव बहुव्रीहिसमासे तत्पुरुषसमासविशेषे च सामान्यतः समासस्येति शास्त्रेण प्राप्तस्यान्तोदात्तविधेर्भवति बाधः । पुरोहितमित्यत्र तु 'पुरोऽव्ययमिति' सूत्रेण गतिसंज्ञायां 'कुगतिप्रादयः' इति शास्त्रेण समासे जाते पूर्वसमासस्येति सामान्यशास्त्रेण अन्त उदात्तः प्राप्तः तं प्रबाध्य 'तत्पुरुषे तुल्यातृतीयासप्तम्युपमानाऽव्ययद्वितीयाकृत्याः' इति विशेषशास्त्रेण अव्ययपूर्वपदप्रकृतिस्वरः प्राप्तः कृदुत्तरपदप्रकृतिस्वरविधायकेन 'गतिकारकोपपदात् कृत्' इति ततोऽपि त्रिशेषशास्त्रेण चैष स्वरोऽपि बाध्यते । पुनरप्येष कृदुत्तरपदप्रकृतिस्वरः 'वाधघञ्क्ताजविलक्ताणाम्च' इति शास्त्रेणापवाद्यान्त उदात्तो विधीयते । एष अन्तोदात्तविधिश्च 'गतिरनन्तरः' सर्वतोविशेषभूतेन शास्त्रेणापवाद्य पूर्वपदप्रकृतिस्वर एव विधीयत इति पुरोहितम् इत्यत्र यथाक्रममपवादपरम्परा दृश्यते । यद्यत्र पूर्वपदप्रकृतिस्वरो न भवेत् तदोत्सर्गतः समासान्तोदात्तत्वे सति 'अनुदात्तापदमेकवर्जम्' इति शास्त्रेण

१. पा० सू० ६।२।५२
२. पा० सू० ६।२।५३
३. पा० सू० ६।२।५४
४. पा० सू० ६।२।५५
५. पा० सू० ६।२।५६
६. पा० सू० ६।२।५७
७. पा० सू० ६।२।५८
८. पा० सू० ६।२।५९
९. पा० सू० ६।२।६०
१०. पा० सू० ६।२।६१
११. पा० सू० ३।२।६२
१२. पा० सू० ६।२।६३

सोऽनुदात्तः स्यादिति भावः। तस्मात् समासान्तोदात्तत्वापवादभूतानि पूर्वपदप्रकृतिस्वरविधायकान्येतानि शास्त्राणीति निश्चीयते।

समासस्येत्युत्सर्गशास्त्रस्यापवादभूतानि पूर्वपदस्यादेरुदात्तत्वविधायकानि विशेषशास्त्राणि चाधोलिखितानि विद्यन्ते—

'सप्तमी हारिणौ धर्म्येऽहरणे'[1]		मुकुटे कार्षापणम्
युक्ते च[2]'		गोवल्लवः
विभाषाऽध्यक्षे[3]'		गवाध्यक्षः
पापं च शिल्पिनि[4]'		पापनापितः
गोत्रान्ते वासिमाणवब्राह्मणेषु क्षेपे[5]'		भार्यासौश्रुतः
अङ्गानि मैरेये[6]'		मधुमैरेयः
भक्ताख्यस्तदर्थेषु[7]'		भक्तमन्नम्
गोविडालसिंहसैन्धवेषूपमाने[8]'	,,	धान्यगवः
अके जीविकार्थे[9]'	,,	दन्तलेखकः
प्राचां क्रीडायाम्[10]'	,,	उद्दालकपुष्पभञ्जिका
अणिनियुक्तः[11]' (पू० प० आदेरुदात्तस्वरः)		छत्रधारः
शिल्पिनि चाकृञः[12]'	,,	तन्तुवायः
संज्ञाया च [13]'	,,	तन्तुवायोनामकृमिः
गोतन्तियवंपाले[14]'	,,	गोपालः तन्तिपालः
णिनिः''[15]	,,	पुष्पहारी
उपमानं शब्दार्थप्रकृतावेव''[16]	,,	उष्ट्रकोशी
युक्तारोह्यादयश्च''[17]	,,	युक्तारोही
दीर्घकाशतुषभ्राष्ट्रवटंजे[18]	,,	कुटीजः, काशजः

१. पा० सू० ६।२।६५
२. पा० सू० ६।२।६६
३. पा० सू० ६।२।६७
४. पा० सू० ६।२।६७
५. पा० सू० ६।२।६९
६. पा० सू० ६।२।७०
७. पा० सू० ६।२।७१
८. पा० सू० ६।२।७२
९. पा० सू० ३।२।७३
१०. पा० सू० ६।२।७४
११. पा० सू० ६।२।७५
१२. पा० सू० ६।२।७६
१३. पा० सू० ६।२।७७
१४. पा० सू० ६।२।७८
१५. पा० सू० ६।२।७९
१६. पा० सू० ६।२।८०
१७. वा० सू० ६।२।८१
१८. पा० सू० ६।२।८२

अन्यात्पूर्वं बह्वचः[१],	,,	उपसरजः,
ग्रामेऽनिवसन्तः[२]	,,	मल्लग्रामः
घोषादिषु च[३]	,,	दाक्षिघोषः
छात्र्यादयः शालायाम्[४]	,,	छात्रिशालाः
प्रस्थेऽवृद्धमकर्क्यादीनाम्[५]	,,	इन्द्रप्रस्थः
मालादीनां च[६]	,,	मालाप्रस्थः
अमहन्नवन्नगरेऽनुदीचाम्[७]	,,	ब्रह्मनगरम्
अमेचावर्णं द्वयच् त्र्यच्[८]	,,	गुप्तार्मम्

एतानि समाससम्बन्धितस्वरविधायकविशेषशास्त्राणि च ,आदिरुदात्तः' इत्यधिकारसूत्रान्तर्गतानि सन्ति। तस्मादन्तोदात्तविधायकस्य समासस्येत्युत्सर्गशास्त्रस्याप्राप्तिस्थले चारितार्थ्याभावात्तदपवादत्वमेषामिति मतम्।

एवमग्रे यत्र समाससम्बन्धिपूर्वपदस्यान्त उदात्तो भवति, सोऽपि समासस्येति सामान्यशास्त्रं प्रबाध्यैव प्रवर्त्तते। तद्यथा—सर्वश्चासौ-श्वेतः सर्वश्वेत इत्यत्र 'सर्वं गुणकार्त्स्न्ये' इति विशेषशास्त्रेण सर्वशब्दः पूर्वपदमन्तोदात्तं भवति। अत्र 'अन्तः' इति सूत्रमधिक्रियते। तेनादिरुदात्त इत्यस्याधिकारो निवृत्त इति सुतरां सिद्धम्। अस्मिन्नन्त इत्यधिकारे चान्यान्यपि विशेषशास्त्राणि वर्त्तन्ते, येषा सोदाहरणं वर्गीकरणञ्चैवं विद्यते—

संज्ञायां गिरिनिकाययोः[१०]	अञ्जनागिरि
कुमार्यां वयसि[११]	वृद्धकुमारी
उदकेऽकेवले[१२]	गुडोदकम्
द्विगौ क्रतौ[१३]	गर्गत्रिरात्रः
सभायां नपुंसके[१४]	गोपालसभम्

१. पा० सू० ६।२।८३
२. पा० सू० ६।२।८४
३. पा० सू० ६।२।८५
४. पा० सू० ६।२।८६
५. पा० सू० ६।२।८७
६. पा० सू० ६।२।८८
७. पा० सू० ६।२।८९
८. पा० सू० ६।२।९०
९. पा० सू० ६।२।९२
१०. पा० सू० ६।२।९४
११. पा० सू० ६।२।९५
१२. पा० सू० ६।२।९६
१३. पा० सू० ६।२।९७
१४. पा० सू० ६।२।९८

पुरे प्राचाम्[१]	देवदत्तपुरम्
अरिष्टगौडपर्वे च[२]	अरिष्टपुरम्
कुसूलकूपकुम्भशालं बिले[३]	कुसूलबिलम्
दिक्शब्दाग्रामजनपदाख्यानचानराटेषु[४]	पूर्वेषु कामशमी
आचार्योपसर्जनश्चान्तेवासिनि[५]	पर्वपाणिनीया
उत्तरपदवृद्धौ सर्वं च[६]	सर्वपाञ्चालकः
बहुव्रीहौ विश्वं संज्ञायाम्[७]	विश्वकर्मणा, विश्वदेव्यावता
उदराश्वेषुषु[८]	वृकोदरः
क्षेपे[९]	घटोदरः
नदीबन्धुनि[१०]	गार्गीबन्धुः
निष्ठोपसर्गपूर्वमन्यतरस्याम्[११]	प्रद्यौतपादः

अत्रैतान्युदाहरणानि हि समासविधायकसामान्यविशेषशास्त्रनिष्पन्नानि सन्ति । एषु समस्तपदेषु सामान्यतः प्रवृत्तस्य समासस्येत्युत्सर्गशास्त्रस्य बाध एभिरेव पूर्वपदान्तोदात्तविधायकशास्त्रैर्भवतीति निर्णयो जातः ।

अतः परं यानि समासघटकोत्तरपदस्यादेरुदात्तत्वविधायकशास्त्राणि विद्यन्ते, यैश्च समासस्येत्युत्सर्गशास्त्रस्य भवति बाधः, तान्यपीह परिचीयन्ते—

कर्णो वर्णलक्षणात्[१२]	शुक्लकर्णः
संज्ञौपम्ययोश्च[१३]	मणिकर्णः
कण्ठपृष्ठग्रीवाजङ्घं च[१४]	शितिकण्ठः
शृङ्गमवस्थायां च[१५]	उद्गतशृङ्गः

१. पा० सू० ६।२।९९
२. पा० सू० ६।२।१००
३. पा० सू० ६।२।१०२
४. पा० सू० ६।२।१०३
५. पा० सू० ६।२।१०४
६. पा० सू० ६।२।१०५
७. पा० सू० ६।२।१०६ अनेन हि विशेषतः प्रकृतिस्वरप्राप्तस्याद्युदात्तस्यापवादो भवति । सामान्यतस्तु समासस्येत्युत्सर्गशास्त्रस्यापीति भावः ।
८. पा० सू० ६।२।१०७
९. पा० सू० ६।२।१०८
१०. पा० सू० ६।२।१०९
११. पा० सू० ६।२।११०
१२. पा० सू० ६।२।११२
१३. पा० सू० ६।२।११३
१४. पा० सू० ६।२।११४
१५. पा० सू० ६।२।११५

'नञोजरमरमित्रमृताः[1]' नमे जरा अजरम्
'सोर्मनसी अलोमोषसी[2]' सु कर्माणः
'क्रत्वादयश्च[3]' साम्राज्याय सुक्रतुः
'आद्युदात्तं द्वयच्छन्दसि[4]' अद्या-स्वश्वाः
'वीरवीर्यौ च[5]' सुवीरेण रथिणा
'कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे[6]' उपकूलम्
'कंसमन्थशूर्पपाय्यकाण्डं द्विगौ[7]'
(उ प. आद्युदात्तः) द्विकंसः
'तत्पुरुषे शालायां नपुंसके[8]' ब्राह्मणशालम्
'कन्था च[9]' सौशमिकन्थम्
'आदिश्चिहणादीनाम्[10]' चिहणकन्थम
'चेलखेटकटुककाण्डंगर्हायाम्[11]' पुत्रचेलम्
'चीरमुपमानम्[12]' ,, वस्त्रचिरम्
'पललसूपशाकं मिश्रे[13]' ,, घृतपललम्
'कूलसूदस्थलकर्षाः संज्ञायाम्[14]' ,, दाक्षिकूलम्
'अकर्मधारये राज्यम्[15]' ,, ब्राह्मणराज्यम्
'वर्ग्यादयश्च[16]' ,, अर्जुनवर्ग्यः
'पुत्रः पुम्भ्यः[17]' ,, दाशकिपुत्रः
'चूर्णादीन्यप्राणिषष्ठ्या[18]' ,, मुद्गचूर्णम्

१. पा० सू० ६।२।११६
२. पा० सू० ।२।११७
३. पा० सू० ६।२।११८
४. पा० सू० ६।२।११९
५. पा० सू० ६।२।१२० सुकर्माण इत्यत्र समान्यतः समासस्येति सूत्रमपवाद्य नञ् सुभ्यामित्यनेन बहुव्रीहावुत्तरपदमन्तोदात्तं प्राप्तम्, तदपवाद्यानेन 'सोर्मनसी अलोमोषसी' इति ततोऽपि विशेषशास्त्रेणोत्तरपदस्यादेरुदात्तो विधीयते ।
६. पा० सू० ६।२।१२१
७. पा० सू० ६।२।१२२
८. पा० सू० ६।२।१२३
९. पा० सू० ६।२।१२४
१०. पा० सू० ६।२।१२५
११. पा० सू० ६।२।१२६
१२. पा० सू० ६।२।१२७
१३. पा० सू० ६।२।१२८
१४. पा० सू० ६।२।१२९
१५. पा० सू० ६।२।१३०
१६. पा० सू० ६।२।१३१
१७. पा० सू० ६।२।१३२
१८. पा० सू० ६।२।१३३

'खट्च काण्डादीनि[१]'	"	दर्भकाण्डम्
'कुण्डंवनम्[२]'	"	दर्भकुण्डम्

एतानि किल उत्तरपदादिरितिसूत्राधिकारान्तर्गतानि शास्त्राणि समासस्येति सामान्यशास्त्रस्य नाप्राप्ते सति आरभ्यन्ते। तस्मातदपवादभूतानीति निश्चयः। अथ समासघटकोत्तरपदस्यान्तोदात्तविधि विविच्यते। तथा चात्राप्यधिकारसूत्रं वर्त्तते "अन्तः[३] इति। अत्र उत्तरपदादिरिति सूत्रादुत्तरपदं केवलमनुवर्त्तते। आदिपदं तु अन्तपदं श्रुत्वा निवृत्तम्। समासस्येति सूत्रेण सामान्यतः समासस्यान्त उदात्तः क्रियते, अनेन तु समासघटकोत्तरपदस्यान्तस्योदात्तो विधीयते। तस्मादेतदधिकारान्तर्गतविशेषशास्त्रैरपि समासस्येत्युत्सर्गशास्त्रस्य भवति बाधः। येषां सोदाहरणं वर्गीकरणञ्चैवं भवितुमर्हति—

'थाथ घञ्क्ताजवित्रकाणाम्[४]'		प्रभृथस्यायोः
'सूपमानात्कः[५]'		ऋतस्य योनौ सुकृतस्य
'संज्ञायामनाचितादीनाम्[६]'		उपहृतः शाकल्यः
'प्रवृद्धादीनां च[७]'		प्रवृद्धः
'कारकाद्दत्तश्रुतयोरेवाशिषि[८]'	"	देवदत्तः
'इत्थम्भूतेन कृतमिति च[९]'	"	सुप्तप्रलपितम्
'अनोभावकर्मवचनः[१०]'	"	पयः पानं सुखम्
'मन्क्तिन्व्याख्यानशयनाऽऽसन-	"	
स्थानययाजकादिक्रीताः[११]'	"	रथवर्त्म
'सप्तम्याः पुण्यम्[१२]' (उ. प० अन्तउदात्तः)		अध्ययनपुण्यम्
'ऊनार्थककलहंतृतीयायाः[१३]'		माषोनम्
'मिश्रंचानुपसर्गमसन्धौ[१४]'		तिलमिश्राः

१. पा० सू० ६।२।१३५
२. पा० सू० ६।२।१३६
३. पा० सू० ६।२।१४३
४. पा० सू० ६।२।१[illegible]
५. पा० सू० ६।२।१४[illegible]
६. पा० सू० ६।२।१४६
७. पा० सू० ६।२।१४७
८. पा० सू० ६।२।१४८
९. पा० सू० ६।२।१४९
१०. पा० सू० ६।२।१५०
११. पा० सू० ६।२।१५१
१२. पा० सू० ६।२।१५२
१३. पा० सू० ६।२।१५३
अनेन हि "गतिकारकोपपदात्कृत्" इति शास्त्राविहितकृत्स्वरस्य साक्षादपवादो भवति, समासस्येत्यस्य चैतत् परम्परयेति विवेकः।
१४. पा० सू० ६।२।१५४

'नञोगुणप्रतिषेधे सम्पाद्यर्ह- हिताऽलमर्थास्तद्धिता.[1]'	कार्णवेष्टकिकम्
'ययतोश्चाऽतदर्थे[2]'	अपाश्या
'अच्कावशक्तौ[3]'	अजयः
'आक्रोशे च[4]'	अपचो जाल्मः
'संज्ञायाम्[5]'	अदेवदत्तः
'कृत्योकेष्णुच्चार्वादयश्च[6]'	अकर्त्तव्यः
'विभाषातृन्नन्नतीक्ष्णशुचिषु[7]'	अकर्ता अन्नः
'बहुव्रीहाविदमेतत्तदभ्यः प्रथम-- पूरणयोःक्रियागणने[8]'	इदं प्रथमः
'संख्यायाः स्तनः[9]'	द्विस्तनाः, चतुःस्तना
'विभाषाछन्दसि[10]'	द्विस्तनां करोति
'संज्ञायायां मित्राजिनयोः[11]'	देवमित्रः
'व्यावायिनोऽन्तरम्[12]'	वस्त्रान्तरः
'मुखं स्वाङ्गम्[13]'	गौरमुखः
'निष्ठोपमानादन्यतरस्याम्[14]'	प्रक्षालितमुखः
'जातिकालसुखादिभ्योऽनाच्छादनात्'— 'क्तोऽकृतमितप्रतिपन्नाः[15]' (उ.प. अन्तउदात्तः)	सारङ्गजग्धः
'वा जाते[16]'	दन्तजातः
'नञ्सुभ्याम्[17]'	अव्रीहिः
'उपसर्गात्स्वाङ्गं ध्रुवपर्शु[18]'	प्रपृष्ठः
'वनं समासे[19]'	तस्येदमिमेप्रवणे

१. पा० सू० ६।२।१५५
२. पा० सू० ६।२।१५६
३. पा० सू० ६।२।१५७
४. पा० सू० ६।२।१५८
५. पा० सू० ६।२।१६९
६. पा० सू० ६।२।१६०
७. पा० सू० ६।२।१६१
८. पा० सू० ६।२।१६२
९. पा० सू० ६।२।१६३
१०. पा० सू० ६।२।१६४
११. पा० सू० ६।२।१६५
१२. पा० सू० ६।२।१६६
१३. पा० सू० ६।२।१६७
१४. पा० सू० ६।२।१६९
१५. पा० सू० ६।२१७०
१६. पा० सू० ६।२।१७१
१७. पा० सू० ६।२।१७२
१८. पा० सू० ६।२।१७३
१९. पा० सू० ६।२।१७८

'अन्तः[१]'	अन्तर्वर्णोदेशः
'अन्तश्च[२]'	पर्यन्तः समन्तः
'परेरभितो भाविमण्डलम्[३]'	परिकूलम्
'प्रादस्वाङ्गं संज्ञायाम्[४]'	प्रगृह्यम्
'निरुदकादीनि च[५]'	निरुदकम्
'अभेर्मुखम्[६]'	अभिमुखम्
'अपाच्च[७]'	अपमुखम्
'स्फिगपूतवीणाऽञ्जोध्वकुक्षि'—	
'सीरनामनाम च[८]'	अपस्फिगम्
अधेरुपरिस्थम्[९]'	अधिदन्तः
'अनोरप्रधानकनीयसी[१०]'	अनुज्येष्ठः
'पुरूषश्चान्वादिष्टः[११]'	अनुपुरुषः
'अतेरकृत्पदे[१२]'	अत्यङ्कुशोनागः
'नेरनिधाने[१३]' (ऊ प. अन्त उदस्तः)	निमूलम्
'प्रतेरंश्वादयस्तत्पुरुषे[१४]'	प्रत्यंशुः
'उपाद्द्वयजजिनमगौरादयः[१५]'	उपदेवः
'सोरवक्षेपणे[१६]'	सुप्रत्यवसितः
'विभाषोत्पुच्छे[१७]'	उत्पुच्छः
'द्वित्रिभ्यां पाद्दन्मूर्धसुबहुव्रीहौ[१८]'	द्विपाच्चतुष्पाच्चरथाय
'सक्थं चाऽक्रान्तात्[१९]'	गौरसक्थः

तदित्थं समासस्वरविधौ समासस्येत्युत्सर्गशास्त्रसम्बन्ध्यपवाद शास्त्राणां विवेचनं निष्पन्नम् ।

१. पा० सू० ६।२।१७९
२. पा० सू० ६।२।१८०
३. पा० सू० ६।२।१८२
४. पा० सू० ६।२।१८३
५. पा० सू० ६।२।१८४
६. पा० सू० ६।२।१८५
७. पा० सू० ६।२।१८६
८. पा० सू० ६।२।१८७
९. पा० सू० ६।२।१८८
१०. पा० सू० ६।२।१८९
११. पा० सू० ६।२।१९०
१२. पा० सू० ६।२।१९१
१३. पा० सू० ६।२।१९२
१४. पा० सू० ६।२।१९३
१५. पा० सू० ६।२।१९४
१६. पा० सू० ६।२।१९५
१७. पा० सू० ६।२।१९६
१८. पा० सू० ६।२।१९७
१९. पा० सू० ६।२।१९८

तिङन्तपदस्वरविधावुत्सर्गापवादभावः

तत्र तावदतिङन्तात् पदात् परं तिङन्तपदमनुदात्तमुत्सर्गतो भवति। तथा च शास्त्रं विद्यते 'तिङ् तिङः' इति। तेन 'अग्निमीडेपुरोहितम्' इत्यत्र ईडे इति तिङन्तपदमनुदात्तं सिद्धम्। अस्य सामान्यशास्त्रस्य निषेधरूपाण्यपवादशास्त्राण्येव समुपलभ्यन्ते। तद्यथा—

'न लुट्[1]' श्वः कर्ता, श्वः कर्तारौ

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण—

'कच्चिद्यत्र युक्तम्[2]' 'यदग्नेस्यामहत्वम्'!

'नह प्रत्ययारम्भे[3]' नह भोक्ष्यसे

'सत्यं प्रश्ने[4]' सत्यं भोक्ष्यसे

'अङ्गात्प्रातिलोम्ये[5]' अङ्ग कुरु

'हिच[6]' आहिष्मा याति

इत्यादीनि विशेष शास्त्राण्यष्टात्रिंशत् विद्यन्ते, येषां संग्रहोऽष्टाध्याय्याः अष्टमाध्यायस्य प्रथमपादे 'न लुट्' इति सूत्रादारभ्य 'यद्वृतान्नित्यम्[8]' इति सूत्रं यावज्जातः। सिद्धान्तकौमुद्यामपि तथैव व्याख्यातः। अतो विस्तरभयात् पिष्टपेषणदोषाच्च तत्सर्वमिहनोपन्यस्यते। निषेधशास्त्राण्यप्यपवादशास्त्राण्येव सन्तीति तु सप्रमाणमिह पूर्वमेव प्रतिपादितम्।

अन्तः'तिङतिङः' इत्युत्सर्गशास्त्रस्य न लुट्प्रभृतिविशेषशास्त्राण्येपवादरूपाणीति सिध्यति।

---

१. पा० चू० ८।१।२९
२. पा० सू० ८।१।३०
३. पा० सू० ८।१।३१
४. पा० सू० ८।१।३२
५. पा० सू० ८।१।३३
६. पा० सू० ८।१।३४
७. पा० सू० ८।१।३४
८. पा० सू० ८।१।६६

समापनम्

शब्दानुशासने उत्सर्गापवादशास्त्रविमर्शनामके प्रबन्धेऽस्मिन् मुख्यतो महर्षिपाणिनेः सूत्राणामुत्सर्गापवादभावो विवेचितः। तत्र यद्यपि

'संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ।।

इति षड्विधसूत्रेषु विधिशास्त्रस्य प्राधान्यं विद्यते, यतो हि विधिशास्त्रार्थमेव संज्ञापरिभाषादिसूत्राणामुपयोगः सर्वत्र दृश्यते। अत एव लघुनोपायेन शब्दानां प्रतिपत्तावुत्सर्गापवादभावं प्रदर्शयन् महाभाष्यकारः—
'सामान्येनोत्सर्गः कर्त्तव्यः, तद्यथा 'कर्मण्यण्' तस्य विशेषेणापवादः। तद्यथा 'आतोऽनुपसर्गे कः[१]' इत्यत्र विधिशास्त्रमेव प्रथममुदाजहार' तथापि संज्ञापरिभाषासूत्रेष्वपि सामान्यविशेषभावरूपोत्सर्गापवादभावः समुपलभ्यते। तद्यथा 'स्वादिष्वसर्वनामस्थाने[२]' इति सूत्रोक्तपदसंज्ञायाः 'यचिभम्[३]' इति विशेषशास्त्रप्रोक्तभसंज्ञया अपवादो भवति। किञ्च 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः[४]' इति सूत्रबोधितसम्प्रदानसंज्ञा 'क्रुधद्रुहोरुपसृष्टयोः कर्म[५]' इत्यनेनापवाद्यते। तेन देवदत्तमभिक्रुध्यतीत्यत्र कर्मणि द्वितीया सिध्यति। एवम् 'अधिशीङ्स्थासां कर्म[६]' 'अभिनिविशश्च[७]' 'उपान्वध्याङ्वसः[८]' इति विशेषशास्त्रविहितकर्मसंज्ञया 'आधारोऽधिकरणमिति[९]' सामान्यशास्त्रप्राप्ताधिकरणसंज्ञाया अपवादो भवति। तत्फलञ्च 'अधिशेते वैकुण्ठं हरिः, 'अभिनिविशते सन्मार्गम्, अधिवसति काशीं शिव इत्यादौ द्वितीया विभक्तेः सिद्धिः।
'कर्मप्रवचनीयाः[१०]' इत्यधिकारान्तर्गतकर्मप्रवचनीयसंज्ञया च गत्युपसर्गसंज्ञयोरपवादो भवति। तेन 'पर्यन्योजपमनुप्रावर्षत्, इत्यादौ 'कर्मप्रवचनीययुक्ते द्वितीया[११]' इत्यनेन द्वितीया विभक्तिः, अनुसिञ्चतीत्यत्र च षत्वाभावः सिध्यतः।

---

१. म० भा० पस्पशाह्निके
२. पा० सू० १।४।१७
३. पा० सू० १।४।१८
४. पा० सू० १।४।३७
५. पा० सू० १।४।३८
६. पा० सू० १।४।४६
७. पा० सू० १।४।४७
८. पा० सू० १।४।४८
९. पा० सू० १।४।४५
१०. पा० सू० १।४।८३
११. पा० सू० २।३।८

तिङ्स्थले च लादेशाः परस्मैपदसंज्ञकाः भवन्तीति 'लः परस्मैपदम्'[1], इति सामान्यशास्त्रमनुशास्ति । तदपवादभूतं 'तङानावात्मनेपदमिति'[2], शास्त्रं प्रसिद्धमेव। एवम् आर्धधातुकसंज्ञया सार्वधातुकसज्ञायाः बाधः प्रसिद्धः। तत्र तिङ्शित्सार्वधातुकम्[3], इति सूत्रेण सामान्यतः सार्वधातुकसंज्ञा भवति। तदपवादश्च 'लिट् च'[4], 'लिङाशिषि'[5], इति सूत्राभ्यां क्रियते।

एवमेव'अलोऽन्त्यस्य'[6], तिपरिभाषाशास्त्रस्याप्यपवादभूते 'आदेः परस्य'[7], 'अनेकाल्शित्सर्वस्य'[8], इति द्वे शास्त्रे स्तः। तत्रानेकाल्शित्सर्वस्येति सूत्रमपि 'ङिच्चेति'[9], विशेषशास्त्रेणापवाद्यते। एतत्फलञ्च तत्तद्विधिशास्त्राणामुत्सर्गापवादविवेचनप्रसङ्गे पूर्वमिहोपन्यस्तम्।

पूर्वमिह प्रथमविमर्शे शब्दानां प्रतिपत्तौ लाघवरूपमुत्सर्गापवादशास्त्रप्रयोजनं प्रदर्श्य सामान्यसूत्रं ह्युत्सर्गशास्त्रम्, तद्विशेषसूत्रञ्चापवादशास्त्रमित्युत्सर्गापवादलक्षणं सामान्यतः पुरस्कृत्य, येन नाप्राप्ते योविधिरारभ्यते स तस्य बाधको भवति, इत्यपवादपदार्थः सोदाहरणं व्याख्यात। तत्र सामान्यशास्त्रस्यावश्यप्राप्तौ यच्छास्त्रं प्रवर्तते तच्छास्त्रं हि सामान्यशास्त्रं निराकरोति, अन्यथा तद्विशेषषास्त्रं निरर्थकं स्यादिति निरवकाशशास्त्राणामुत्सर्गशास्त्रस्य बाधकत्वें बीजमुपस्थापितम्।

तदनु अपवादशास्त्रप्रवृत्तिप्रकारे असति सम्भवे सति सम्भवे चापवादो भवतीति प्रकारद्वयमुपवर्ण्य बाध्यसामान्यविशेषसामान्यचिन्तापक्षाभ्यामप्यपवादशास्त्रस्य प्रवृत्तिप्रकारो विवेचितः। प्रसङ्गतः अपवादशास्त्रप्रवृत्तौ च ये किल 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्, 'मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान, 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति, 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः, अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते, इत्यादि संकोचरूपनियमाः शब्दानुशासने सिद्धान्तरूपेण स्वीकृताः सन्ति, तान् व्याख्याय अपवादशास्त्रस्य कुत्राप्रवृत्तिः, कुत्र च वैकल्पिकी प्रवृत्ति र्भवतीत्येतत् सर्वं संगृह्योपपादितम्। ततः अधिकारसूत्रमाधारीकृत्योत्सर्गापवादक्रमो विवेचितः। तत्र प्रथममेकः

१. पा० सू० २।३।९९
२. पा० सू० १।४।१००
३. पा० सू० ३।४।११३
४. पा० सू० ३।४।११५
५. पा० सू२ ३।४।११६
६. पा० सू० १।१।५२
७. पा० सू० १।१।५४
८. पा० सू० १।१।५५
९. पा० सू० १।१।५३

पूर्वपरयोरङ्गस्येत्यधिकारसूत्रद्वयान्तर्गतगुणवृद्धिशास्त्रयोर्विमर्शे गुणवृद्धेरत्र प्राथम्येनोपन्यासकारणं निगद्य एकादेशपररूपगुणवृद्धिविधायकशास्त्राणां तथा इगन्ताङ्गस्य लघूपधस्य चैकोगुणवृद्धिविधायकशास्त्राणामुत्सर्गापवादभावं निरूप्य तद्वर्गीकरणमुपदर्शितम्।

एवमग्रे तृतीयविमर्शे पूर्वोक्ताधिकारस्थसर्वविधदीर्घविधायकशास्त्राणामुत्सर्गापवादभावविवेचने क्वचित् शकन्धुः, कर्कन्धुरित्यत्र पररूपेण, क्वचिच्च हरी इमावित्यत्र प्रकृतिभावेन एकादेशरूपदीर्घस्यापवादो दृष्टः। दीर्घविधिरपि गुणविधि यण् विधिं चापवाद्य प्राप्तः, स च विशेषशास्त्रेण पररूपेण प्रकृतिभावेन चात्र निरस्तः।

एवं पूर्वसवर्णदीर्घविधिरपि अग्नि औ, वायु औ इत्यवस्थायां सामान्यतः "इकोयणचि" इति शास्त्रेण प्राप्तयणादेशमपवाद्य प्रवर्तते। तेन अग्नी, वायू इति रूप निष्पद्यते। अग्निम्, वायुमित्यत्र तु "अमिपूर्वः" इति ततोऽपि विशेषशास्त्रेण पूर्वरूपमेव भवति। अतः पूर्वसवर्णदीर्घस्यापि पूर्वरूपेण बाधः प्रोक्तः। 'नादिचि' दीर्घाज्जसि'चेति' शास्त्रद्वयन्तु पूर्वसवर्णदीर्घस्य निषेधरूपापवादत्वेन संगृहीतम्।

अङ्गाधिकारस्थदीर्घविधायकशास्त्राणां निषेधरूपाण्यपवादशास्त्राणि दृष्टानि, अतस्तान्यपि संगृह्य विवेचितानि। प्रसङ्गत उत्तरपदे परे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' प्रभृतिदीर्घविधायकशास्त्राणां 'र्वोरूपधाया दीर्घ इकः' 'हलि च' उपधायाञ्चेति शास्त्रत्रयविहितधातोरुपधाया इकोदीर्घविधायकशास्त्राणाञ्च परिचयोऽपि साधु सम्पादितः।

दीर्घमनु ह्रस्वविधेः प्रसङ्गः समायाति। यतोहि दीर्घस्यैव ह्रस्वविधानेन ह्रस्वविधेर्भवति सार्थकता। जगाद इत्यत्र ह्रस्वत्वे तु शास्त्राणां पर्यन्यवल्लक्षणप्रवृतिर्बोध्यिा। अर्थाद् ह्रदे वृष्टेर्नास्त्युपयोगः, पुनरपि मेघस्तत्रापि वर्षत्युत्सर्गतः। एवमत्रापि ह्रस्वशास्त्रस्य प्रवृतिरिति भावः। दीर्घश्च कृत्रिमाकृत्रिमाभ्यां द्विविधः। उभयत्रापि ह्रस्वविधिर्दृश्यते। स च संहितायाम् उत्तरपदे अङ्गस्येत्यधिकारत्रयमवलम्ब्य प्रवर्तते। तत्र संहिताधिकारे "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" "ऋत्यकः" इति शास्त्राभ्यां ह्रस्वप्रकृतिभावौ विधीयेते, तेन यथाक्रमं चक्रि अत्र, ब्रह्म ऋषिरित्यत्र ह्रस्वविधिना सार्धं प्रकृतिभावे च यण्गुणौ न भवतः। अत्र संहिताधिकारस्य ह्रस्वविधेर्नास्त्यपवादशास्त्रम्। एवमुत्तरपदे परे ह्रस्वविधिरप्यपवादविरहित एव दृष्टः। अङ्गाधिकारस्थह्रस्वविधौ तु निषेधरूपा-

पवादत्वेन वार्त्तिकत्रयं सूत्रद्वयञ्च व्यख्याय अङ्गाधिकारस्यापवाद-विरहितह्रस्वविधायकशास्त्राण्यपि सोदाहरण समुपस्थापितानि।

तदनु लोपविधावुत्सर्गापवादभावविमर्शे लोपस्य प्रकृतिप्रत्ययो: सम्बन्धाद् द्वैविध्यं प्रतिपाद्य प्रथम प्रकृतिसम्बधिलोपशास्त्राणि विवेचितानि। तत्रापि पूर्वमङ्गाधिकारस्य प्रकृतेर्लोपविधायकशास्त्राणि विविच्योत्तरपदाधिकारस्थप्रकृतिसम्बन्धिलोपशास्त्राणि अन्यान्यपवादविरहितान्यपि चोपन्यस्तानि। एव प्रत्ययसम्बन्धिलोपशास्त्राणां परिशीलनेऽपि पूर्वमङ्गाधिकारस्थशास्त्राणामुत्सर्गापवादभावो विवेचित:। तत्र "बहोर्लोपोभूच बहो:" "द्विगोर्लुगनपत्ये" "लुक्तद्धितलुकि" इति शास्त्रत्रय सापवाद च व्याख्याय अन्यान्यपवादवर्जितानि प्रत्ययसम्बधिलोपशास्त्राण्यपि सोदाहरणमेकत्र सगृहीतानि।

आगमविधिविमर्शेऽपि प्रथमङ्गाधिकारान्तर्गतशास्त्राणि विवेचितानि। तत्र अणनुमिडागमसम्बन्धिसामान्यशास्त्राणां 'न माङ्योगे' 'नेट्यलिधिरधे:' 'न रुदुर्या केवलाभ्याम् नेड्वशिकृति' प्रभृतिनिषेधरूपाण्यपवादशास्त्राण्येव प्राय: मिलन्ति। केवलमाङ्जादीनामित्येक विधिशास्त्रमेवाड्शास्त्रस्यापवादभूत वर्तते। इतोऽन्यत् सर्व निषेधशास्त्रमिति निश्चय: तत्र पुनरिडागमापवादस्य 'नेड्वशिकृति' इति शास्त्रस्य 'वस्वेकाजाद्धसाम्, इति विशेषशास्त्रेण आदिवान ददिवानित्यत्र प्रतिरोधो दृष्ट:। एवमसावीत्, हनिष्यति, जरिष्येत्यादावपवादस्याप्यपवाद: प्रतिप्रसवरूपेण व्याख्यात:। प्रसङ्गतश्चापवादविनिर्मुक्तानीड्विधायकानि सर्वाणि शास्त्राणि सोदाहरण सञ्चितानि।

तदनु एच् युक् सीयुडागमानामुत्सर्गापवादत्व निरूप्य अपवादवर्जितानां सर्वविधागमशास्त्राणां विवेचन सोदाहरण कृतम्।

तदनु चतुर्थविमर्शे षत्वणत्वसम्बन्ध्युत्सर्गापवादशास्त्राणि परिशीलितानि। तत्र इण्कोरित्यधिकारसत्र पुरस्कृत्य प्रथममादेशसम्बन्धिषत्वविधे:, ततश्च प्रत्ययसम्बन्धिषत्वविधे विवेचन कृतम्, यतो हि आदेशप्रत्यययोरिति शास्त्रेण आदेशप्रत्ययसम्बन्धिसकारस्य षत्वविधाने आदेशपदमेव प्रथममुपात्तम्। आदेशसम्बन्धिषत्वञ्च प्रकृतिमेवावगाहते न प्रत्ययमिति निश्चित्य सर्वाणि तत्सम्बन्ध्युत्सर्गापवादशास्त्राणि व्याख्यातानि।

सुप्तिङ्भेदेन प्रत्ययस्य द्वैविध्यमाधारीकृत्य च प्रत्ययसम्बन्धिषत्वविधिर्विचारित:। तत्र सात्पदाद्योरिति निषेधरूपापवादशास्त्रेण आदेश-

प्रत्यययोः षत्वनिषेधे 'अग्निसात् दधि सिञ्चति इत्युदाहरणद्वयं निरूप्य षत्वसम्बन्धिसर्वशास्त्राणि चैकत्र वर्गीकृतानि ।

एवमेव णत्वविधिविवेचनेऽपि 'रषाभ्यां नो णः' इतिणत्वविधायकं सामान्यशास्त्रं पुरस्कृत्य णत्वविधायकसर्वविधिशास्त्राणां प्रवृत्तौ प्रकृति-प्रत्ययभेदेन लक्ष्यस्य द्वैविध्यमुपपाद्य णत्वविधेरुत्सर्गापवादत्वं निर्धारितम् ।

तदनु प्रत्ययविधायकोत्सर्गापवादशास्त्राणां विवेचनमत्र पञ्चम-विमर्शादारभ्याष्टमविमर्शं यावज्जातम् । यतोहि प्रत्ययविधेः क्षेत्रं बहुविस्तृतं विद्यते । महर्षिपाणिनेरष्टाध्याय्या तृतीयाध्यायादारभ्य पञ्चमाध्यायपर्यन्त हि प्रत्ययसम्बन्धिसूत्राणां सन्निवेशो दृश्यते । तत्र प्रत्ययानामुद्देश्यभूताः प्रकृतयश्च धातुप्रातिपदिकसुबन्तभेदेन त्रिधाः प्रसिद्धाः । अतः पूर्वं धातु-विहितसर्वविधकृत्प्रत्ययसम्बन्ध्युत्सर्गापवादशास्त्राणि निरूप्य धातुविहित-तिङ् प्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवादभावो विवेचितः । तत्र प्रसङ्गतः आत्मनेपदपरस्मैपदविधायकशास्त्राणामुत्सर्गापवादत्वं प्रतिपादितम् । यतो हि धातुविहितलादेशप्रत्ययैः साकमपि परस्मैपदात्मनेपदविध्योः सम्बन्धः सिद्धः ।

अतः परं प्रातिपदिकविहितप्रत्ययसम्बन्धिशास्त्राणामुत्सर्गापवाद-भावनिर्धारणे ङ्याप्प्रातिपदिकादित्यधिकारसूत्रमाधारीकृत्य पूर्वं स्त्र्य-धिकारोक्तङ्याब्विधेरुत्सर्गापवादत्वं विवेचितम् । तदनु सौपस्थानिकादेश-विधायकशास्त्राणामुत्सर्गापवादभावो निर्धारितः । स्वौजसाद्येकविंशति-प्रत्ययाश्चैकेनैव शास्त्रेण विधीयन्ते । अतस्तत्रोत्सर्गापवादस्य यद्यपि संभावना नास्ति, तथापि स्वादिप्रत्ययसम्बन्ध्यादेशविधायकशास्त्रेषु सा सुलभा । तद्यथा- 'स्वमोर्नपुंसकादिति सामान्यशास्त्रस्य अतोऽमिति विशेषशास्त्रेण भवति बाधः । क्वचिच्चातोऽमितिशास्त्रमप्यपवाद्यते । तथा च सूत्रं विद्यते 'अद्ड्डतरादिभ्यः पञ्चभ्य' इति ।

एवम् रामैः ज्ञानैरित्यत्र अतो भिसऐसितिविशेषशास्त्रेण सुपिचेति सामान्यशास्त्रस्य नेदमदसोरकोरिति शास्त्रेण चैभिरमीभिरित्यत्रातोभिस्-ऐसितिशास्त्रस्याप्यपवादो दृष्टः । अपि च सौपस्थानिकादेशविधायकेषु 'ङेर्यः' 'टाङसिङसामिनात्स्याः' इत्यादिसामान्यशास्त्राणां 'सर्वनाम्नः' स्मै प्रभृतिविशेषशास्त्रैश्चापवादक्रमो व्याख्यातः ।

ततश्च प्रकरणप्राप्तप्रातिपदिकस्थानीयादेशविधायकशास्त्राणामुत्सर्गा-पवादभावो निर्धारितः । तत्राजन्तप्रातिपदिकेषु इयङ् यण् नादेशादि-

विधीनां हलन्तप्रातिपदिकेषु च ढत्वघत्वविध्योत्सर्गापवादत्वं विविच्य 'त्यदादीनामः, इत्युत्सर्गशास्त्रस्य 'इदमो मः' 'अदस औ सुलोपश्चेत्याद्य-पवादशास्त्राणि व्याख्यातानि ।

एवं धातुप्रातिपदिकप्रकृतिप्रत्ययादेशविधायकशास्त्राणि सामान्य-विशेषविधिना निरूप्य सुबन्तप्रकृतिकतद्धितप्रत्ययविधायकशास्त्राणां सामान्यविशेषभावो विवेचितः । तत्र तद्धितप्रत्ययो द्विधा प्रसिद्धः । एक-स्तावत् 'समर्थानां प्रथमाद्वे'त्यधिकारान्तर्गतः सन् प्रत्ययार्थबोधकः अपरः पुनस्तदधिकारात् बहिर्भूतः स्वार्थिकः । अत्र स्वपदेन प्रकृतिरेव गृह्यते । अतः प्रकृतेर्योऽर्थः स एव तद्विहितप्रत्ययस्यार्थ इति स्वार्थिकप्रत्ययानामप्यर्थ-प्रत्ययनात् प्रत्ययत्वं संगतम् । तदत्रोभयविधतद्धितप्रत्ययविधायकशास्त्राणि यथार्थक्रममधिकारक्रमञ्चाधारीकृत्य निरूपितानि ।

इतोऽग्रे नवमविमर्शे च प्रथमादिविभक्तिविधिविषयकोत्सर्गापवाद-भावो विचारितः । तत्र षट्सु कारकविभक्तिषु सामान्यविशेषभावेन बाधक्रमः प्रथमा द्वितीयाविभक्तिविषयक एव दृष्टः । तद्यथा ग्रामस्य दूरम्, ग्रामस्यान्तिकम् इत्यत्रासत्वार्थकदूरान्तिकशब्दात् प्रातिपादिकार्थे प्रथमा प्राप्ता, सा च दूरान्तिकार्थेभ्यो द्वितीया चेति विशेषशास्त्रेण बाध्यते । दूरः पन्था इत्यत्र तु दूरशब्दः पन्था इति द्रव्यपदार्थस्य विशेषणी भूतः, अतो न तस्या बाध इति मतम ।

कर्मसंज्ञामाधारीकृत्य प्रवर्तमानद्वितीयाविभक्तेरपवादशास्त्राणि च चत्वारि विद्यन्ते । येषु 'क्रियार्थोपपदस्य कर्मणि स्थानिनः' 'प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने' इति शास्त्रद्वयेन द्वितीया विभक्ते र्नित्यो बाधो भवति । 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु, 'संज्ञोऽन्यतरस्यां कर्मणि, इति शास्त्र-द्वयेन तु वैकल्पिको बाध्यः । तेन तृणाय तृणं वा मन्ये 'पित्रा पितरं वा सञ्जानीते, इत्यत्र विभक्तिद्वयमपि सिध्यति । अत्र पदमर्थं वा पुरस्कृत्य प्रवर्तमानद्वितीयाविभक्तेरप्यपवादशास्त्राणि संगृह्य व्याख्यातानि ।

एवं षष्ठीविभक्तिविधेरपि सर्वविधापवादशास्त्राणि निर्णितानि ।

तदनु समाससम्बन्ध्युत्सर्गापवादशास्त्रनिर्धारणे प्रथमं षष्ठी इति सायान्यशास्त्रविहितषष्ठी समासस्यापवादशास्त्राणि समुपन्यस्य समास-विध्यङ्गभूतानामुपसर्जनं पूर्वम् 'राजदन्तादिषु परम्, 'परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः, स नपुंसकमित्यादि सामान्यविशेषशास्त्राणां सोदाहरणं नि-र्वचनञ्च विधाय तत्र सुपोधातुप्रातिपदिकयोरिति सामान्यशास्त्रेण प्राप्तस्य

सुपोलुकः यैरलुगुत्तरपदे इति सूत्राधिकारपठितविशेषशास्त्रै र्भवत्यपवादः' तत्सर्वमपवादभूतं शास्त्रमिह निरूपितम् ।

अपि च दशमविमर्शे प्रथमं वैदिकशब्दानामनुशासनपद्धतिं प्रदर्श्य उदात्तादिस्वराणां लक्ष्याणि चोपन्यस्य धातुप्रातिपदिकप्रत्ययसमाससम्बन्धिस्वरविधायकशास्त्राणामुत्सर्गापवादभावो निर्णितः । तत्रतावद् धातोरिति सामान्यशात्रेण प्राप्तान्तोदात्तविधेरपवादः अभ्यस्तानामादिः, अनुदात्ते चेति शास्त्रद्वयेनानुमतः । ततः प्रातिपदिकस्वरेऽपि फिषोऽन्तः इत्युत्सर्गशास्त्रेणान्त उदात्तो विहितः पौस्या नश्चन इत्यत्र । ञ्नित्यादिर्नित्यमित्याद्युदात्तविधायकेन विशेषशास्त्रेण तु ञित्वान्नित्वाच्च तस्य बाधो दृष्टः । अस्याद्युदात्तविधेश्च बाधः 'कर्षात्वतो घञोऽन्त उदात्त' इति शास्त्रेणावगत इत्येव प्रातिपदिकस्वरो व्याख्यातः

प्रत्ययस्वरे च आद्युदात्तश्चेत्युत्सर्गशास्त्रस्य 'अनुदात्तौ सुप्पितौ, 'तद्धितस्य, कितः, इत्याद्यनेकविशेषशास्त्राणि समुपलभ्यन्ते, तानि सर्वाणि सोदाहरणं संगृह्य व्याख्यातानि ।

तदनु समासस्वरसम्बन्ध्युत्सर्गापवादशास्त्रनिरूपणे समासस्येति सामान्यशास्त्रेण विधीयमानान्तोदात्तविधेरुदाहरणान्युपन्यस्य पूर्वपदप्रकृतिस्वरः पूर्वपदस्यादिरुदात्तः, पूर्वपदस्यान्त उदात्तः, इत्तरपदस्यादिरुदात्तः, उत्तरपदस्यान्त उदात्तः इति पञ्चविधयस्तदपवादभूता विवेचिताः । एषां विधीनां विधायकविशेषशास्त्राणि तदुदाहरणानि च यथाक्रममिहोपदर्शितानीत्येवं ग्रन्थोपवर्णितविषयाणां समासतः परिचयो विद्यते ।

यद्यप्येष वै शास्त्राणामुत्सर्गापवादभावक्रमः शिष्टप्रयुक्तशब्दानामन्वाख्यायाने सुकरो भाति, तथापि तत्र कस्योत्सर्गशास्त्रस्य कान्यापवादशास्त्राणि ? तदपवादशास्त्राणामपवादशास्त्राणि च कानीति निर्णयो सुलभः । उत्सर्गापवादशास्त्राणां तथा विधं विवेचनं च नैवोपलभ्यते । अतस्तन्निर्णयार्थमधिकारसूत्रमाधारीकृत्य सर्वेषां विधिशास्त्राणां तदङ्गभूतानां संज्ञापरिभाषाशास्त्राणाञ्चोत्सर्गापवादत्वविवेचने मया ग्रन्थेऽस्मिन् यथामति प्रयासो विहितः । तत्र कियन्मे साफल्यमित्यत्र विशेषज्ञा एव प्रमाणम् ।

अथ च यदनुग्रहेण ग्रन्थोऽयं पूर्णतां प्रापितः—

तस्मै गणाधिपतये मङ्गलमूर्तये मुदा ।
चिन्तामणिगणेशाय विनिवेद्य विरम्यते ॥

हमारे प्रमुख प्रकाशन

१. पौराणिक काल परिज्ञानम्
   पं० रामचन्द्र पाठक १९८६, — रू० १५-००
२. बृहदारण्यक उपनिषद्, एक समीक्षात्मक अध्ययन
   डॉ० रघुवंश झा, १९८४ — रू० ८०-००
३. धर्मद्रुमः (धर्मशास्त्रों का इतिहास।
   आचार्य राजेन्द्र प्र० पाण्डेय, १९८० — रू० ७५-००
४. भगवान श्री कृष्ण और शिव तत्त्व
   म० म० गिरिधर शर्मा चतुर्वेदी, १९८१, — रू० २५-००
५. भारतीय दर्शनों में आत्मा
   म० म० गिरिधर शर्मा चतुर्वेदी १९८०, — रू० ३०-००
६. महाभारत में रुद्र, श्री कृष्ण मेनन, १९७९, — रू० २५-००
७. वैदिक वर्ण व्यवस्था और श्राद्ध,
   म० म० गिरिधर शर्मा चतुर्वेदी १९७९, — रू० २०-००
८. संस्कृत वाङ्मय में त्रैगुण्य,
   डॉ० ईश्वर प्र० चतुर्वेदी, १९७९, — रू० २५-००
९. भारत में बौद्ध निकायों का इतिहास,
   डॉ० श्री नारायण श्रीवास्तव, १९८१ — रू० ६०-००
१०. भारतीय दर्शनों में कामतत्त्व,
   डॉ० लक्ष्मीश्वर प्र० सिंह १९८६ — रू० १००-००
11. Siromani's Akhyata Sakti-vada, Text with Englis Tr By Dr. K. N. Chatterje 19.. — Rs. 55 00
12. Vijnapti Matrata Siddhi, Text with Englis Tr. by Dr. K. N. Chatterje 1980. — Rs 45 00
13. Disposal of the dead in the Mahabharta, J. N Tiwari 1979. — Rs. 35.00
14 Shrotriyas of Mithila. Dr. Abhaya Nath Mishra 1984 — Rs 70 00
15. Change of Tribal Indentity in Chotanag-Pur. Dr. K. N. Sahay. 1985 — Rs. 60 00
१६. उपन्यास विधा और प्रताप नारायण श्रीवास्तव : व्यक्तित्व एवं कृतित्व,
   —डॉ० मृत्युञ्जय उपाध्याय, १९८६, ८०—००

Kishor Vidya Niketan
B 2/236—A. Bhadaini
Varanasi-221001

राज्य के
रम्भिक
शक्षा के
श्रीरग-
९७६ में
णाचार्य
से चक्र-
प्त कर
संस्कृत।
द्यालय
ध्यापक
द सूत्र
 महा-
जिसके
उपकार